प्राप्ता यथापूर्वं गतज्वराः; तथात्वमपि राजेन्द्र यदिच्छसि यथेप्सितं प्राप्तुमैश्वर्यमतुलं तूर्णमारा
धयस्वतम् ॥ ० ॥ मार्कंडेयपुराणे ॥ ० ॥ पुत्र उवाच इत्यर्षिवचनं श्रुत्वा कार्तवीर्यो नरेश्वरः द
त्तात्रेयं श्रमं गत्वा तंभक्त्या समपूजयत् पादसंवाहनाद्येन मत्याद्याहरणेन च श्रकचन्दनादि पु०
गन्धाम्बुफलाद्याहरणेन च तथान्नसाधनैस्तस्य उच्छिष्टापोहनेन च परितुष्टो मुनिर्भूपं त्वमु ५१
वाचतं थैवस यथैवोक्ताः पुरादेवा मद्यभोगादिकुत्सितं स्त्रीचेयं मम पार्श्वस्था दोषो ह्योगाश्च
कृतितः; मद्देवाहन्तु मामेवमुपरोद्धुं त्वमर्हसि अशक्तयुगाकारायशक्तमाराधयस भो जड

पुरा तेनैवमुक्तो मुनिना स्मृत्वा गर्जेव वक्तृतः प्रत्युवाच पुराप्येवं कार्त्तवीर्यार्जुनः सदा देववन्द्य
ऋषिपुरा गीर्वे स्वां भार्यां समुपाश्रिताः अनघस्त्वं तथैव यद्देवी सर्वे भवान्तरा इत्युक्तः प्रीतिमान्देवं
स्तुतं प्रत्युवाचह कार्त्तवीर्यं महावीर्यं वशीकृत्य महीतलम् वरं वृणीष्व गुह्यं मे तया नाम यदीरि
तं तेन तुष्टिः परा जाता त्वय्यत्र मम पार्थिव ये च मां पूजयिष्यन्ति गन्धमाल्यादिभिर्नराः मांसमद्यो
पहारैश्च मृष्टान्नैश्चात्मसन्मतैः लक्ष्मीसमेतं गीतैश्च ब्राह्मणानां तथार्चनैः वाद्यैर्मनोरमैर्वीणावे
णुशङ्खादिभिस्तथा तेषामहं परां पुष्टिं पुत्रदाराधनादिकां प्रदास्याम्यवधूतश्च हनिष्याम्यवग
मतां सत्यं वरयभद्रं ते वरं यन्मनसेप्सितम् प्रसादसुमुखस्तेऽहं गुह्यनामप्रकीर्त्तनात् ॥ कार्त्तवीर्य
उवाच यदि देव प्रसन्नस्त्वं तत्प्रयच्छर्द्धिमुत्तमां यया प्रजाः पालयेयं न चाधर्ममवाप्नुयां परानुस्म
रणं ज्ञानमप्रतिद्वन्द्वितां रणे सहस्रमिच्छया बाहूनां लाघवगुणं असङ्गा गतयः सन्तु शै
लाकाशाम्बुभूमिषु पातालेषु च सर्वेषु वधश्चाभ्यधिकाद्रणात् तथोन्मार्गप्रवृत्तस्य सन्तु सन्मा

मार्कं० गंधैशिकः मत्तुमेतिथयः श्लाघ्याविनंदानेऽह्ययतस्था अनष्टद्रव्यता राष्ट्रे ममानन्यस्मरणेन च त्वयि
५२ भक्तिश्चैवदेवास्तुनित्यमव्यभिचारिणी दत्तात्रेयउवाच य एते कीर्त्तिताः सर्वे तान्सवरान्समवाप्स्यसि म
त्प्रसादाच्चभविता चक्रवर्त्ती त्वमीश्वरः जडउवाच प्रणिपत्यततस्तस्मै दत्तात्रेयाय सोऽर्जुनः
आनाय्य प्रकृतीः सम्यगभिषेकमगृह्णत अघोषयामास तदा स्थितो राज्ये स हैहयः दत्तात्रेयात्प
रां भूतिमवाप्यातिबलान्वितः अद्यप्रभृति यः शस्त्रं मामृतेऽन्यो ग्रहीष्यति हन्तव्यः स मया दस्युः परहिं
सारतोपि वा इत्याज्ञप्ते ततस्तत्र न कश्चिदायुधधृङ्नरः तमृते पुरुषव्याघ्रं बभूवोरुपराक्रमं स ए
व ग्रामपालोभूत्पशुपालः स एव तु क्षेत्रपालः स एवासीद्द्विजातीनां च रक्षिता तपस्विनां पालयि पु०
ता सार्थपालश्च सोऽभवत् दस्युव्यालाग्निशस्त्रादिभये चोद्धो निमज्जतां अन्यासु चैव मग्ना
नामापत्सु परवीरहा स एव संस्मृतः सद्यः समभून्नृणां अनष्टद्रव्यता चासीत्तस्मिन्शा ५२
सति पार्थिवे तेनेष्टं बहुभिर्यज्ञैः समाप्तवरदक्षिणैः तेनचैव तपस्तप्तं संग्रामेष्वति चेष्टितं तस्य

ड्डिमद्दिमानश्च दृष्ट्वा प्राहाङ्गिरा मुनिः न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवा यज्ञैर्दानैस्तपो
भिर्वा संग्रामे चातिचेष्टितैः दत्तात्रेयाद्दिने तस्मिन् संप्राप्तर्द्धिन्नरेश्वरः तस्मिंस्तस्मिन्दिने यागं दत्ता
त्रेयस्य सोऽकरोत् तथैव च प्रजाः सर्व्वास्तस्मिन्नहनि भूपतेः तस्यर्द्धिं परमां दृष्ट्वा यागश्चक्रुः समा
धिना इत्येतत्तस्य माहात्म्यं दत्तात्रेयस्य धीमतः तथैव जम्भस्य चाख्यातमलर्कं कथयामि ते यथा च यो
गः कथितो दत्तात्रेयेन तस्य वै पितृभक्तस्य राजर्षेवलर्कस्य महात्मनः ॥०॥ इति मार्कण्डेयपुराणे
॥ जडउवाच ॥ प्राग्वभूव महावीर्य्यः शत्रुजिन्नाम पार्थिवः ततोष यस्य यज्ञेषु सोमं पीत्वा पुरन्द
रः तस्यात्मजो महावीर्यो बभूवारिविदारणः बुद्धिविक्रमलावण्यैर्गुरुशक्राश्विभिः समः समा
न वयो बुद्धिसत्वविक्रमचेष्टितैः नृपपुत्रैर्नृपसुतो नित्यमास्ते समावृतः कदाचिच्छास्त्रसद्भा
वविवेककृतनिश्चयः कदाचित्काव्यसंलापगीतनाटकसम्भवैः तथैवाक्षविनोदैश्च शस्त्रास्त्रवि
नयेषु च योग्यानि युद्धनागाश्वस्यन्दनास्वासततपरम् रेमे नरेन्द्रपुत्रोऽसौ नरेन्द्रतनयैः सह दिवे

मां क॰ वद्धिदिवातद्वद्रात्रावपि मुदान्वितः तेषान्तु क्रीडतां तत्र द्विजभूपविशां सुताः समानवयसः प्रीत्याव
५३ सीमायात्मनेकशः कस्यचित्त्वथ कालस्य नागलोकान्महीतलं कुमारावागतौ नागौ पुत्रावश्वतरस्य
तु ब्रह्मरूपप्रतिच्छन्नौ तरुणावप्रियदर्शिनौ तौ तैः नृपसुतैः सार्द्धं तथावान्यैर्द्विजन्मजैः विनोदैर्वि
53 विधैर्जग्मतुः प्रीतिसंयुता सर्वे च ते नृपसुतास्ते च ब्रह्मविशां सुताः नागराजात्मजौ तौ च स्नानसं
वाहनादिकं वस्त्रगन्धानुसंयुक्तास्त्रक्कुभोगभुजः क्रियां अहन्यहन्यनुप्राप्ते तौ च नागकुमारकौ
स्वाजस्त्रस्तुर्यदायुक्तौ प्रीत्या स्वनाम्महीयते स च तास्यां नृपसुतः पूर्वं निर्वाणमाप्तवान् विनोदै
र्विविधैर्हास्यसंलापादिभिरेव च विनाताभ्यां न बुभुजे न सस्नौ न पपौ मधु सरूपमनजग्राहशस्त्रा पु०
रया। मयुराप्रघे रसातले च तौ रात्रिं विनाते न महात्मना विश्वासपरमौ प्रीत्यां नीत्वाजग्मतु ५३
ऽदिने दिने मर्त्यलोके परा प्रीतिर्भवतोः केन पुत्रकौ सहेति पप्रच्छ पितातावुभौ नागदारकौ
…त्र पाताले वर्द्धनिदिवसानि मे दिवा रजन्यां भवतौ पश्यामि प्रियदर्शनौ जडवाच इति

पिकास्वयं पृष्टो प्रणिपत्य कृताञ्जली प्रत्युवाच मुदा भागाबुरगाधिपतेः सुतो पुत्रावूचतुः पुत्रः शत्रु
जित्सेन नाम्ना ख्यातमानध्वजः रूपवानार्जवोपेतः शूरो भीनीप्रियम्वदः अनाष्टष्ठकथो वाग्मी विद्वा
न्मैत्रो गुणाधिकः मान्यमानयिता धीमान् ह्रीमान्विनयभूषणः तस्योपचारः सं प्रीतिः संयोगापहृ
तम्मनः नागलोके नरालोके न रतिं विन्दते पितः तद्वियोगेन नः कान्त निशापतिलशीतला परिणामाय
तत्संगादाह्लादाय रविद्दीवा पितोवाच पुत्रः पुण्यवतो धन्यः सयस्यैवं भवद्विधैः परोक्षस्यापि गुणि
भिः क्रियते गुणकीर्त्तनम् सन्ति शास्त्रविदोऽशीलाः सन्ति मूर्खाः सुशीलिनः शास्त्रशीलसमा मन्ये पुत्रो
धन्यतरं नौ तं यस्य मित्रगुणानेते अमित्राश्च पराक्रमम् कथयन्ति सदा सत्सु पुत्रौ वीरसेन वेपितानत
स्योपकारिणाः किञ्चिद्वस्तुन्यपि वाञ्छितम् किं विनिष्पादितावत्सो परितोषाय चेतसः यध न्यो जी
वितं तस्य तस्य जन्म सुजन्मनः यस्यार्थिनो न विमुखा मित्राथश्चनद्वेलः मदृहेयत्स्ववस्वादिरत्न
वाहनमासनं तद्दानं प्रीतये तस्य तद्दृश्यमविशङ्कया विक्रतस्य जीवितं पुंसो मित्राणामुपकारिणाम्

मा.क॰ प्रतिरूपमकुर्वन्यो जीवामीत्यवगच्छति । उपकारं सुहृद्वर्गे योपकारश्च शत्रुषु । नृमेघो वर्षति प्राज्ञ
५४ स्तस्येच्छति संदोन्नतिम् । पुत्रा ऊचुः । किं तस्य कृतकृत्यस्य कर्तुं शक्यं तकेनचित् । यस्य सर्वाणि नाग
54 हे सर्वकामैः समन्विताः । यानि रत्नानि तद्गेहे पाताले तानि नः कुतः । वाहनासनयानानि भूषणान्यम्ब
राणि च । विज्ञानं यच्च यत्रास्ति न तदन्यत्र विद्यते । प्राज्ञो नामप्यसौ तात सर्वसन्देहहृत्तमः । एकं तस्या
स्ति कर्तव्यमसाध्यं तच्च नो मतं । हिरण्यगर्भगोविन्दशर्वादीनीश्वरान्ते । पितोवाच । तथापि श्रोतुमिच्छामि
तस्य तत्कार्यमुत्तमम् । असाध्यमथवा साध्यं किं वा साध्यं विपश्चितां । देवत्वममरेशत्वं तत्पदत्वञ्च मा
नवाः । प्रयान्ति वाञ्छितं त्वन्यद्दृष्टं येऽत्र च साधिनः । नाविज्ञानं न चागम्यं नाप्राप्यं दिवि चेह च उद्युक्ता पु॰
ंसां मनुष्याणां यतचित्तेन्द्रियात्मनां । योजनानां सहस्राणि यान्त्यपि पिपीलिकाः । अगच्छन्वैनते ५४
योपि पदमेकं न गच्छति । क्व भूतलं क्व वा ध्रौव्यं स्थानं यत्प्राप्तवान्ध्रुवः । उत्तानपादनृपतेः पुत्रस्स
न्भूमिगोचरः । तत्कथ्यतां महाभाग कार्यं वान्येन पुत्रका । सभूपालसुतः साधुर्येनानृण्यं व भवान्

पुत्राद्भूपसुतु तेनाख्यातमिदं ज्ञातपूर्ववृत्तमश्वात्मना कौमारके यथा तस्य वृत्तं सदृत्तमालिनः तस्य
शत्रुजित् स्नातपूर्वं कश्चिद्द्विजोत्तमः । गालवो स्वागमद्धीमान्गृहीत्वा तुरगोत्तमम् । प्रत्युवाच चरा
जातं समुपेत्याश्रमं मम कोऽपि दैत्याधमो राजन्नाविध्वंसयति पापकृत् । नानारूपं समास्थाय सिं
हेभवनचारिणाम् । अन्येषां चाल्पकायानां महान्वेशमकारणात् । समाधिध्यानसक्तस्य मौनव्र
तधरस्य च । तथा करोति विघ्नानि यथा चलति मे मनः । दग्धं कोपाग्निना सद्यः समर्थास्तु सहन्नद्रु दुः ।
खार्जितस्य तपसो व्ययमिच्छामि पार्थिव । एकदा तु मया राजन्नभिनिर्विण्णचेतसा । संक्षोभितेन नि
श्वासो निरीक्ष्याम्बरमुज्झितः । ततोऽम्बरतलात्सद्यः पतितोऽयं तुरंगमः । वाक्चाशरीरिणी प्रादुर्नरना
थ शृणुष्व ताम् । अश्रान्तः सकलं भूमेर्वलयं तुरगोत्तमः । समर्थः समनुक्रान्तमर्कस्यात वायुभूतिपा
दितः । पातालाम्बरतोयेषु नास्य प्रतिहता गतिः । समस्तादिक्षु व्रजतो न भंगः पर्वतेषु च । यतो भू
वलयं सर्वमश्रान्तो यश्च विष्यति । ततः कुवलयो नाम्ना ख्यातिं लोकेषु यास्यति । क्लिश्नाद्यदहर्निशं

मां.क० पापो यस्माद्दानवाधमः तमश्वपृष्ठं समारुह्य द्विजश्रेष्ठ हनिष्यति शत्रुजिन्नाम भूपालस्तस्य पुत्रश्च तद्ध
५५ जः प्राप्य तदश्वरत्नं ख्यातिं मेदिन्यां यास्यति सोऽहं त्वामनुसंप्राप्तस्तपसो विघ्नकारिणः तन्निवार
55 य भूपाल भागभाक् नृपते यतः तदेतदश्वरत्नं ते मया भूप निवेदितम् पुत्रमाज्ञापय तथा धर्मो यथा
न लुप्यते इत्यस्य वचनाद्राजा तं पुत्रमृतध्वजं तमश्वरत्नमारोप्य कृतकौतुकमंगलम् व्यसर्जय
त धर्मात्मा गालवेन समं तदा स्वमाश्रमपदं प्रापितमादाय ययौ मुनिः ॥ ० ॥ इति मार्कण्डेयपुराणे ॥
॥ ० ॥ पितोवाच गालवेन समं गत्वा नृपपुत्रेण तेन यत् कृतं तत्कथ्यतां पुत्रौ विचित्रा युवयोः क
था पुत्रावूचतुः स गालवाश्रमे रम्ये तिष्ठन् भूपालनन्दनः सर्वविघ्नोपशमनं चक्रे ब्रह्मवादि पु०
नाम् वीरं कुवलयाश्वं तं वसन्तं गालवाश्रमे मदावलेपान्मूढोऽसौ नाज्ञासीद्दानवाधमः ततः सं गा
लवं विप्रं सन्ध्योपासनतत्परम् सौकरं रूपमास्थाय प्रधर्षयितुमागमत् मुनिशिष्यैरथोत्क्रु ५५
ष्टे शीघ्रमारुह्य तं हयम् अन्वधावद्वराहं तं नृपपुत्रः शरासनी सजघान च बाणेन चन्द्रार्द्धाका

खर्वदेहा आकृष्य च महाचापश्चारुचित्रोपशोभितम् नाराचाभिहतः शीघ्रमात्मत्राणपरो मृगः गि
रिपादपसंबाधां सोप्यगच्छन्महाटवीं तमन्वधावद्वेगेन तुरगोसौ मनोजवः चोदितो राजपुत्रेणापि
तुरंदेशकारिणा अतिक्रम्याथ वेगेन योजनानि सहस्रशः धरण्यां विवृते गर्ते निपपात लघुक्रमः
तस्यानन्तरमेवाश्वः सोप्यश्वा नृपतेः सुतः निपपात महागर्ते तिमिरेऽघसमावृते ततो नादृश्यत मृ
गः स तस्मिन्नारसूनुना प्रकाशश्च स पातालमपश्यत्तत्र चान्विषम् ततोऽपश्यत्स सौवर्णप्रासाद
शतसंकुलम् पुरन्दरपुरप्रख्यं पुरं प्राकारशोभितम् तत्प्रविश्य स नापश्यत्तत्र किंचिन्नरं पुरे भ्र
मता च तेनोदृष्टा तत्र योषित्त्वरान्विता सा पृष्टा तेन तन्वंगी प्रस्थिता क्वेति कस्य वा नोवाच किंचित्प्रासा
दभूरुरोहच भाविनी सोप्यश्वमेकतो बद्धा तामेवानुससार वै विस्मयोत्फुल्लनयनो निःशंको
नृपतेः सुतः ततोऽपश्यत्सविस्तीर्णे पर्यंके सर्वकाञ्चने निषण्णां कन्यकामेकां कामयुक्तां रती
मिव विस्पष्टेन्दुमुखीं सुभ्रूं पीनश्रोणिं पयोधरां विम्बाधरोष्ठीं तन्वंगीं नीलोत्पलविलोचनां

मा०क०
५६
56

रक्तांतुंगनखां श्यामां मृदुताम्रकरांघ्रिकां करभोरुं सुदशनां सूक्ष्मपक्ष्मस्थिराननकाम् तां दृष्ट्वा चारुस
र्वांगीं मत्तदंताभलतामिव सोमन्यत नृपसुतः स्त्रीं रसातलदेवतां साच दृष्ट्वैव तं बाला नीलकुंचित
मूर्द्धजम् पीनोरुस्कन्धरा बाहुमभंग्नमदनं शुभा उत्तस्थौ च शुभाकारा चित्तक्षोभमवाप्य सा म
ज्ञा विस्मितं दैन्या नामत्य स्वन्वीवसंगता कोयं देवोत्र यक्षो वा गंधर्वो वोरगाधिपः विद्याधरो वा संप्रा
प्तः कृतपुण्यरतीश्वरः एवं विचिन्त्य बहुधा निःश्वस्य च महीतले उपविश्य तदा भेजे मूर्छां सा मदिरे
क्षणा सोपि कामशराघातमवाप्य नृपतेः सुतः तां समाश्वासयामास न भेतव्यमिति ब्रुवन् सा च स्त्री
या तदा दृष्टा पूर्वं तेन महात्मना तालवृंतमुपादाय पर्यवीजयदाकुला समाश्वास्य तदा पृष्टाते
न सा मोहस्य कारणम् किंचिल्लज्जान्विता बाला तस्याः सख्युन्यवेदयत् सचाशेषे कथयामास तद्वृ
त्तं यद्विस्तरात् मोहस्य कारणं सर्वं दृष्टश्चेन समुद्भवम् यथा तथा समाख्यातं तं तद्वृत्तान्तमस्य भा
मिनी स्त्र्युवाच विश्वावसुरिति ख्यातो दिवि गंधर्वराट् प्रभो तस्येयमात्मजा सुभ्रूः नाम्नाख्या

पु०
५६

त्रा मदालसा रत्नकेतोः सुतज्ञो ग्रोदानवोरिविदारणः पातालकेतुर्विख्यातः पातालान्तरसंश्रयः
तेन यज्ञोद्यानगता कृत्वा मायातमो महीम् अपकृत्य द्दृष्टा मीता मयाद्रीनाद्दुरात्मना आगामिन्या
स्त्रयोदश्यामुद्वक्ष्यति किलाधमः मेगान्ना रुगि चार्वंगी श्रुत्वेदं अतीरिव अतीते चह्निने बाला मा
थ्यापादनोद्यताम् सुरभी प्राह नार्थं त्वां प्राप्स्यते दानवाधमः मर्त्यलोकमनुप्राप्ते यः प्रथमं भेत्स्यते
शरैः स ते भर्ता महाभाग न चिरेणा भविष्यति अहमस्याः सखी नाम्ना कुंडलेति मनस्विनी सुता वि
न्ध्यवतः पत्नी वीरपुष्करमालिनः हते भर्तरि शुंभेन तीर्थात्तीर्थमनुव्रता चरामि दिव्यया गत्या पर
लोकानुमुद्यता पातालकेतुर्दुष्टात्मा वाराहं वपुरास्थितः केनापि विद्धो बाणेन मुनीनां त्राण
कारणात् तच्चानुगम्य तीर्णात्वा त्वरिता पुनरागता सत्यमेव स केनापि ताडितो दुष्टमानवः अहं
यथा मूर्छामगमम् तत्कारणाय च शृणु स्वतत्त्व त्वयि प्रीतिमती बाला दर्शनादेव मानद देवपुत्रो
पमे चारुवाक्यरूपादिशालिनी भार्या चान्यस्य विहिता येन विद्धः स दानवः एतस्मात्कारणा

मा॰क॰ मोऽहं महान्तमियमागता: यावज्जीवश्च तन्वंगी दुःखमेवोपभोक्ष्यते त्वया सा हृदयं वाधिमत्तो
५७ स्वाध्योभविष्यति यावज्जीवमतो दुःखं सुरम्यानान्यथा वृथा: अहं तस्या: सखी प्रीत्या दुःखितात्र
समागता यतो विशेषो नैवास्ति मम सखी निजदेहयोः यद्येषाभिमतं वीरपतिं माप्नोति शोभनतु
तपस्त्वङ्क्मात: कुर्यां निर्वृत्तिं का किन्न चेतसा त्वं च को वा किमथावसं प्राप्तोत्र महामते देवो दैत्यो
ऽथ गन्धर्वः पन्नगः किन्नरोऽपि वा नह्यत्र मानुषगतिर्न चेदृड्मानुषं वपुः तद्रूमाख्याहि कथितं
तथैवावितथं मया कुवलयाश्व भवाच यन्मां पृच्छसि धर्मज्ञे कस्त्वं किम्मासमागतः तच्छृणुष्वा पु॰
मलप्राज्ञ काथयाम्याद्दितस्तव राज्ञा शत्रुजित पुत्रः पित्रा संप्रेषितः शुभे मुनिरक्षार्थमुद्दिश्यगा ५७
लवाश्रममागतः कुर्वतो मम रक्षाञ्च मुनीनां धर्मचारिणां विघ्नार्थमागतः कोऽपि सोकररूप
पुरास्थितः मया सविद्धो बाणेन चन्द्रार्द्धाकारवर्चसा अतिक्रान्तोऽतिवेगेन यातमस्त्वनुगतो हयो
पयात सहसा गर्ते सकोडोऽश्वश्च मामकः सोहनाश्वसमारूढ तमस्येक परिभ्रमन प्रकाश

भासादितवान्दृष्टा च भवती मया पृष्टया च न मे किंचिदुक्तवत्या तदनंतरं त्वामिच्छन्प्रविष्टोऽह
मिमं प्रासादमुत्तमं इत्येतत्कथितं सर्वं नदेवोऽहं न दानवः न पन्नगो न गंधर्वो न किन्नरो वा शुचिस्मि
ते समस्ता पृष्टपदैर्वेदवाद्या मम कुंडले मनुष्योऽस्मि विशंकां ते कर्तुं यानात्र काचिदिह ॥ पुर
चूचतुः ततः प्रहृष्टा सा कन्या सखीवदनमुल्लसं लज्जाजडवीक्षमाना किंचिन्नोवाच भाविनी त
त्सखी पुनरप्येवं प्रहृष्टा प्रत्युवाच ह यथा वः कथितं तेन सर्वं सत्यं वचनानुगे ॥ ० ॥ कुंडलोवाच
वीर सत्यमसंदिग्धं भवताभिहितं वचः नान्यत्र हृदयं ह्यस्या दृष्टा सौम्यं प्रयास्यति चंद्रमेवाधिका
कांतिं स्वरूपेति रविं प्रभा भूतिर्मध्यं धृतिर्हीरं स्वानि रत्यैति चोत्तमम् तथैव विद्धि संदिग्धं सप्राप्य
दानवाधमः स्वरभिः साम रं माता कथं मिथ्या वदिष्यति तदूर्ध्वेषं सभाग्याचनत्सम्प्रवर्तं समेत्य
वै कुरुत्व वीर मत्कार्ये विधिनैव समाहितम् पुत्रा चूचतुः परवान्हमित्याह राजपुत्रः सत्तां पि
तुः सा च तं चिनया भा सम्प्रत्ययु गुरुं तन्न कुले गुरुं सचापि तत्र स्वगात्प्राप्त गृहीते सनित कुशः भद्रा

मां०क० सायासंप्रीत्या कुंडला गौरवेन च प्रज्वाल्य पावकं दत्वा मंत्रवत्कृतमंगलं वैवाहिकविधिं कन्यां प्रतिपा
५८ द्य यथागतं जगाम तपःसिद्धीमानुस्वमाश्रमपदं ततः साचाहतांसखीम्बालां कृतार्थास्मि वरानने
58 संयुतामम्वना दृष्टा त्वामहं रूपशालिना तपस्तस्येह मतुलं निर्व्यलीकेन चेतसा तीर्थाम्बुधुतपापा
च भवित्री नेदृशी यथा पुत्रपूर्वकः तस्माद्राजपुत्रे सा प्रश्रयावचनं ततः गन्तुकामा निजसखीं
हविक्लवभाषिणी कुंडलोवाच पुत्तिरप्यभिमप्रसः नोपदेशो भवद्विधैर्दातव्यः किंपुनः स्त्रीभिरतो
नोपदिशामि ते किन्त्वस्याः स्नेहमध्यायाः स्नेहाक्षिप्तेन चेतसा त्वया विश्रम्भिता चास्मि स्मारयाम्यरि
सूदनः भर्तव्या रक्षितव्या च भार्य्या हि पतिना सदा धर्मानुकामसंसिद्ध्यै भार्य्या भर्तुः सहायिनी पु०
यदा भार्य्या च भर्त्ता च परस्परमनुव्रतौ तदा धर्माथकामानां त्रयाणामपि संगतम् कथं भार्य्या
मृते धर्मं मन्ववाप्नु पुरुषप्रभो प्राप्नोति काममन्त्वम्याततस्त्रितयमाहितम् तथैव भर्तारमृते भा ५८
र्य्या धर्मादिसाधने समथा न त्रिवर्गायं दाम्पत्यं समुपाश्रितः देवतातिथिभृत्यानामतिथीना

स्वपूजनं न पुंभिः शक्यते कर्त्तुं मृतभार्य्यै नृपात्मज। प्राप्तोपि चार्थो मनुजैरानीतोऽपि निजं गृहं स्व
यमेति विना भार्य्यां कुभार्य्यां संश्रयेपि वा कामस्य तस्य नैवास्ति प्रत्यहं सोपलक्ष्यते दाम्पत्योः सह
धर्म्मेणाश्रयी धर्म्ममवाप्नुयात्‌। पितॄन्‌ पुत्रैस्तथैवान्नसाधनैरतिथीन्नरः। पूजाभिरमर्त्यांस्तद्वत्सा
ध्वीं भार्य्यां नाराध्यंते त्रिधा स्त्रीापि विना भर्त्रा धर्म्मकामार्थसन्ततिः नैव तस्मात्समन्ताभ्यामपत्यमवि
गच्छति एतन्मयोक्तं पुत्र योजयिष्यामि यथेप्सितम्‌ वर्द्धस्व मनया सार्द्धं धनपुत्रसुखान्वितः इत्युक्त्वा
संपरिष्वज्य स्वसखीनन्वमस्य च जगाम दिव्यया गत्या यथाभिप्रेतमात्मनः सोपि शत्रुजितः पुत्रः समा
रोप्य तुरंगमं निर्भित्तुकामः पातालाद्विज्ञातो हनुमन्द्वे ततस्तैः सह सोऽन्‌ कष्टं क्रियते क्रियते तैर्दिवे क
न्या रत्नं यदानीतं दिवः पातालकेतुना ततः परिघनिस्त्रिंशगदाशूलधरायुधं दानवानां वर्गं प्राप्तम
ह पातालकेतुना तिष्ठति द्वेति जल्पतः श्रुतस्तो दानवोत्तमाः शूरवर्गैस्तदा शूले वै दृष्टु नृपनन्दनम
स च शत्रुजितः पुत्रस्तदा त्वाष्ट्रयति वीर्य्यवान्‌ चिच्छेद शरजालेन प्रहसन्निव लीलया वर्षीनपाता

मा॰क॰
५९ ततस्तं शूलभिन्नं दृष्टिसायकैः। छिन्नैश्च संछन्नमभवद्दानवजशिरोत्करैः। ततोऽस्त्रं त्वाष्ट्रमादाय चिक्षेप प्र
तिदानवान्। तेन ते दानवाः सर्वे सह पातालकेतुना ज्वालामालातितीव्रेण स्फुटदस्थिचया सदा
निर्दग्धाः कपिलेनेव समा साद्यैव सागराः। ततस्स राजपुत्रोऽसौ निहत्यासुरसत्तमान् स्त्रीरत्नेन
समेतेन समागच्छत पितुः पुरम् प्रणिपत्य च तत्सर्वं स तत्पित्रे न्यवेदयत् पातालगमनं चैव कुण्डला
याश्च दर्शनं तद्वन्मदालसाप्राप्तिर्दानवैश्चापि संगरं वधश्च तेषां शस्त्रेण पुनरागमनं तथा इति श्रुत्वा
पिता तस्य चरितं चारुचेतसः। प्रीतिमानभवद्वृद्धः परिष्वज्याह चात्मजं सत्पुत्रेण त्वया पुत्र भावितोऽहं पु॰
महात्मना भयेभ्यो मुनयस्त्राता नये सद्धर्मचारिणाम्। मत्पूर्वैः ख्यातिमानीतं मया विस्तारितं पुरः।
पराक्रमवता वीर त्वया तद्बहुलीकृतम्। तदुपात्तं यशः पित्रा धनं वीर्यमथापि वा तन्न ह्रापयते य ५९
स्तन्नरो मध्यमः स्मृतः तद्वीर्यादधिकं यस्तु पुनरन्यत्स्वशक्तितः। निष्पादयति तं प्राज्ञा वदन्ति न
रसत्तमम्। यः पित्रा समुपात्तानि धनवीर्ययशांसि वै न्यूनतां नयति प्राज्ञास्तमाहुः पुरुषाधमं तन्म

॥ आज्ञया ज्ञातं कृतमासीद्यथा त्वया पातालगमनं यच्च यच्चासुरनिपातनं एतदभ्यधिकं वत्सतेन
त्वं पुरुषोत्तमः तत्वन्योस्ति वा नून्त्व मद्भेव गुणाधिकः त्वां पुत्रमीदृशं प्राप्य श्लाघ्यः पुत्रवतामपि नत्सपु
त्रवतां प्रीतिमन्यः प्राप्नोति मानवः पुत्रेणातिशयितो यः प्रज्ञादानविक्रमैः धिक्कृतस्य जन्म यः पितृ
लोके विज्ञायते नरः यः पुत्रात्ख्यातिमन्वेति तस्य जन्म सुजन्मनः आत्मना ज्ञायते धन्यो मध्यमः पितृ
पितामहैः मातृपक्षेण मात्रा ख्यातिमेति नराधमः तत्पुत्र धनवीर्य्यैस्त्वं विवर्द्धस्व सुखेन च गम्यतां न
याचेयं भाविद्युज्यतां वे त्वया इति पित्रा बहुविधं प्रियमुक्त्वा पुनः पुनः परिष्वज्य स्वमावासं सभार्य्यः
सविसर्जितः सतया भार्य्यया सार्द्धं रेमे तत्र पितुः पुरे अन्येषु च तथोद्यानवनपर्वतसानुषु भुक्ष्व
गुरयोः पादौ प्रणिपत्य च सायं भा प्रातः प्रातस्ततो तेन सह रेमे स्वमध्यमा ततः काले बहुतिथे गते रा
जा पुनः सुतं प्राह गच्छाशु विप्राणां आश्रमाय च रम्ये दिने अश्वमेधं समारुह्य प्रातः प्रातर्द्दिने दिने
आराधा द्विजमुख्यानाम् न्विष्ट्या सदेवहि दुर्हृताः सन्ति शतशो दानवाः पापबुद्धयः तेभ्यो न साध्व

मा.क. याबाधा मुनीनां त्वन्तथा कुरु सततो क्रमस्तदा पित्रा तथा चक्रे तदात्मजः परिक्रम्य महीं सर्वां ववन्दे चरणौ
६० पितुः अहन्यहन्यनुप्राप्ते पूर्वाह्ने नृपनन्दनः ततश्च शेषं दिवसं तयारिभेस्व मध्यया एकदा तु चरन्सोथ
ददर्श यमुनातटे पातालकेतोरनुजं तालकेतुं कृताश्रमं मायावी दानवः सोथ मुनिरूपं समाश्रितः स
60 प्राह राजपुत्रं तं पूर्ववैरमनुस्मरन् राजपुत्र ब्रवीमि त्वां तत्कुरुष्व यदीच्छसि न चैते प्रार्थनाभंगः कार्यः
सत्यप्रतिश्रुते यक्ष्ये यज्ञेन धर्म्मोपकर्तृत्याश्रमे पेष्टयः चितयस्तत्र कर्त्तव्या नारिकृतानुस्मृतायतः ततः
प्रयच्छ मे वीर हिरण्यं त्वं स्वभूषणम् यदेतत्कण्ठलग्नं ते रक्ष चेमं ममाश्रमम् यावदन्तर्जले देवं वरुणं याद पु०
सां पतिम् वैदिकैर्मंत्रैः प्रजानां पुष्टिहेतुकैः अभिष्टुयत्वरायुक्तः समात्यमीति वादिनं तं तु ६०
स्तुत्या ततः प्रादात्तस्मै कण्ठभूषणम् प्राह चैनं भवान्यातु निर्व्यलीकेन चेतसा स्नास्यामि तावद्दृहे
[illegible]तु वाश्रमसमीपतः नवादेशात्म[illegible]भागं यावदागमनं तव नेत्र का[illegible]द्वाधा कारिष्यति भवि
[illegible]ते विघ्नं त्वाश्रमं तावन् ब्रवन्नकुरु ये दुंगताताग[illegible] पुत्रावृपद्रः एवमुक्त[illegible]ते न समज्ञनदीजले

[illegible] सोऽपि तस्यैव मायाविहितमाश्रमं गत्वा जलाशयात्तस्मात्तालकेतुस्ततः स्वयं मदालसायाः प्रत्ययद
म्येषा स्वैतद्दत्तवान् तालकेतुरुवाच वीरः कुवलयाश्वोसौ ममाश्रमसमीपतः केनापि दुष्टदैत्येन कु
र्वन्रक्षान्तपस्विनाम् युध्यमानो यथाशक्ति निघ्नन् ब्रह्मद्विषो युधि मायामाश्रित्य पापेन भिन्नः शूले
न वक्षसि म्रियमाणेन तेनेदं दत्तं मे कण्ठभूषणं प्रापितश्चाग्निसंयोगं स वने शूद्रतापसैः कृता ह्रेषा
शब्दो वै त्रस्तः साश्रुविलोचनः नीतः सोऽश्वस्तेनैव सत्वरात्मना एतन्मया नृशंसेन दृष्टं दुष्कृतकर्मणा
यदत्रानन्तरं कार्यं कुरु चोत्तरकालिकं हृदयाश्वासनश्चैतद्गृह्यतां रुक्मभूषणं नास्माकं हि सुवर्णेन कृ
त्यमस्ति तपस्विनां इत्युक्त्वोत्सृज्य तं भूमौ स जगाम यथागतं निपपात जनः सोऽथ शोकार्तो मूर्छयातुरः
क्षणाच्च चेतनां प्राप्य सर्वास्ता नृपयोषितः राजपत्न्यश्च राजा च विलेपुरतिदुःखिताः मदालसापि तच्छ्रु
त्वा तदीयं च भूषणं तं पिधायास्वः प्रियान् प्राणान्त्यजद्दै श्रुत्वा निपातितम् ततः पुरे महाक्रन्दः पौराणां
भवनेषुभूत् यथैव तस्य नृपतेस्स्वगेहे समभवत्तत राजा च तां मृतां दृष्ट्वा विना भर्त्रा मदालसां प्रत्युवाच

मा°क° जनं सर्वं विमृष्य स्वस्थमानसः। न शोचितव्य म्याप्यामि भवतामात्मनस्तथा सर्वेषामेव सञ्चिन्त्य संभवं ह्य
६१ नामनित्यतां किन्नु शोचामि तनयं किन्नु शोचाम्यहं स्नुषां विमृष्य कृतकृत्यत्वान्मन्ये शोच्यावुभाव
61 पि मच्छुश्रूषुर्मद्वचनाद्द्विजरक्षणात्परः प्राप्तो मे यः सुतो मृत्युं कथं शोच्यः स धीमतां अवश्यं याति
यद्देहं तद्द्विजानां कृते यदि मम पुत्रेण संत्यक्तं ननु अभ्युदयकारि तत् इयं च सत्कुलोत्पन्ना भर्तर्येवं
व मनुव्रता कथं न शोच्या नारीणां भर्त्तुरन्यन्नु दैवतं अस्माकं बान्धवानाञ्च तथान्येषां दयावतां शो
च्या मे या भवेदेवं यदि भर्त्रा वियोगिनी या तु भर्त्तुर्वधं श्रुत्वा तत्क्षणादेव भामिनी भर्त्तारमनुयाति
यं ना शोच्या तो पि पश्चितां ताः शोच्या या वियोगिन्यः सत्कुल भर्त्ता कुले याताः भर्त्तावियोगस्तनयानानु पु°
भूत कृतज्ञया दातारं सर्वसौख्यानामिह चामुत्र चोभयोः लोकयोः का हि भर्त्तारं नारी मन्येत मा ६१
नुषं न स शोच्यो न चैवेयं न चाहं जननी न तु त्यजता ब्राह्मणान्त्राय प्राणान्सर्वे स्मतारिताः वि
प्राणा मम भय र्मस्य गतः सत्तु महामतिः दृष्ट्वा मद्भक्तस्य त्यागाद्देहस्य मे सुतः माता: सतीव

मदंशे वै मन्ये शोच्यो मात्मनः संग्रामे सन्त्यजन्प्राणान्यज्ञद्विजकारणे पुत्राद्वृत्तः ततः कुवल
याश्वस्य माता भर्त्तुरनन्तरं श्रुत्वा पुत्रवधं तादृक् प्राह कष्टा सुतं प्रति न मे मात्रा न मे स्वस्रा प्राप्ता
प्रीतिर्नृपेदृशी श्रुत्वा मुनिपरित्राणे हतं पुत्रं यथा मया शोचतां बान्धवानां ये निश्वसन्तोऽतिदुःखि
ताः म्रियन्ते व्याधिना क्लिष्टास्तेषां माता वृथा प्रजाः संग्रामे युध्यमाना ये भीता गोद्विजरक्षणे क्षुण्णाः
शस्त्रैर्विपद्यन्ते तएव भुवि मानवाः अर्थिनां मित्रवर्गस्य विद्विषाञ्च पराङ्मुखः येन याति नरः पुत्री
तेन माता च वीरसूः गर्भक्लेशः स्त्रियामन्ये साफल्यं भजते तदा यदारिविजयी वा स्यात्संग्रामे
वा हतः सुतः पुत्रवधूचरितः ततः स राजा संस्कारं पुत्रपत्नीमलम्भयत् निर्गत्य स बहिः स्नातो ददौ
पुत्राय चोदकम् तालकेतुश्च निर्गम्य तथैव यमुनाजलात् राजपुत्रमुवाचेदं प्रणयान्मधु
रम्वचः गच्छ भूपालपुत्र त्वं कृतार्थोऽहं त्वया कृतः कार्य्यञ्चिराभिलषितं त्वय्यत्राविचलस्थि
ते वारुणीयज्ञकार्य्यस्य जालशस्य महात्मनः तन्मया साधितं सर्व्वं यन्ममासीदभीप्सितं प्र

मां क० णिपत्य स तं स्माद्राजपुत्रः पुरं पितुः समारुह्य तमेवाश्वं सुपर्णानिलविक्रमं ॥ ० ॥ इति मार्कं
६२ ण्डेयपुराणे कुवलयाश्वीये ॥ ० ॥ पुत्र उवाच ॥ स राजपुत्रः संप्राप्य वेगेनात्मपुरं ततः पित्रो
62 र्विवन्दिषुः पादौ दिदृक्षुश्च मदालसां ददर्श जनमुद्विग्नमप्रहृष्टमुखं ततः ॥ पुनश्च विस्मिताका
रं प्रहृष्टवदनं पुनः अन्यदुत्फुल्लनयनं दिष्ट्या दिष्ट्येति वादिनम् परिष्वजन्तमन्योऽन्यमतिको
तूहलान्वितम् चिरंजीवोरुकल्याण हतास्ते परिपन्थिनः पित्रोः प्रह्लादय मनस्तथास्माकमकण्ट
कं इत्येवं वादिभिः पौरैः पुरः पृष्ठे च सर्वतः ततस्त्वरा प्रभवानन्दः प्रविवेश पितुर्गृहम् पितावं
परित्यज्य मातान्ये चैव बान्धवाः चिरंजीवेति कल्याणं ददुस्तस्मै तदाशिषं प्रणिपत्य ततः सोऽथ किं पुं
मेतद्दिति विस्मितः पप्रच्छ पितरं ततः सोऽस्मै सर्वमुदक्तवान् स भार्यां तां मृतां श्रुत्वा हृदयेष्टां ६२
मदालसां पितरौ च पुरो दृष्ट्वा लज्जाशोकविमध्यगः चिन्तयामास सा बाला मां श्रुत्वा निधनं ग
तं तत्याज जीवितं साध्वी धिङ्मां निष्ठुरमानसं नृशंसोऽहमनार्योऽहं विना तां मृगलोचनां मन्यो

निधनं प्राप्तां तज्जीवाभ्यागतेनिर्द्देशाः पुनः सञ्चिन्तयामास परिसंस्तभ्य मानसं मोहोद्रेकममपाद
यनिःश्वस्योच्छ्वस्यमानसः मृतिसामन्निमित्तं त्यजीमि यदि जीवितम् किम्मयापहृतान्तस्याः श्ला
घ्यमेतत्त्वयोषितां यदि शोकादिमिवार्त्तीनं दाधिपोमि वदन्मृतः तथाप्यश्लाघ्यमेतन्नो वयं हि पुरु
षाः किल अथ शोकजडो हीनो मृजाहीनो मलाश्रितः विपक्षस्य भविष्यामि ततः परिभवास्पदम् म
याहि सततं कार्य्यं राज्ञः शुश्रूषणं पितुः जीवितं तस्य वा यत्तु सन्त्याज्यं तत्कथम्मया किन्त्वत्र मन्ये
कर्त्तव्यं त्यागो भोगस्य योषितः सचापि नापकाराय तन्वंग्याः किन्नु सर्वथा मयानृशंसं कर्त्तव्यं
नापकार्य्युपकारिणा यामहंदत्थे त्यजत्प्राणां स्त्रदथेऽल्पमिदं मम पुत्रावृचत्तुः इति कृत्वा मतिं सो
ऽथ निष्पात्योदकं दानिका क्रिया स्नानन्तरं कृत्वा प्रत्युवाच ऋतध्वजः ऋतध्वज उवाच यदि सा मम
तन्वंगी नस्याद्भार्या मदालसा अस्मिन् जन्मनि नान्या मे भवित्री सहचारिणी तामृते मृगशा वा
क्षीं गन्धर्वतनयामहं न भोक्ष्ये योषितं काञ्चिदिति सत्यं मयोदितं सधर्म्मचारिणी मन्या नासु

मा॰क॰ क्षागजगामिनीः काङ्क्षिणातन्वी करिष्यामीत्येतत्सत्यं मयोदितम् एवञ्च मृपरित्यज्य स्त्रीभोगांस्ता
६३ नसर्वदा प्रीतन्वास्ते समन्तन्येव वयस्ये शीलसंपदा एतत्तस्य परं तात कार्यन्तत्केन कस्यते कर्त्तुम
63 त्यथ दुस्त्रापमीश्वरैः किंपुनर्नरैः इति वाक्यं तयोः श्रुत्वा विमर्षमगमत्पिता विमृष्य चाहतौ
पुत्रौ नागराट् प्रहसन्निव यद्यशक्यमिति ज्ञात्वा न करिष्यन्ति मानवाः कर्मण्युद्यममुद्योगहान्या
हानिस्ततः परं आरभेत नरः कर्म स्वपौरुषमहापयन् निष्पत्तिः कर्मणो दैवे पौरुषे च व्यवस्थि
ता तस्मादहन्तथा यत्नं करिष्ये पुत्रकाः स्थिरः तपश्चर्यां समास्थाय तथैतस्य यत्नेचिरात् उवाच पु॰
एवमुक्त्वा स नागेन्द्रः प्लक्षावतरणं गिरेः तीर्थं हिमवतो गत्वा तपस्तेपे सुदुश्चरं तुष्टाव गीर्भिस्तत्र ६३
ततो देवीं सरस्वतीं तन्मना नियताहारो भूत्वा त्रिषवणाप्लुतः अश्वतर उवाच जगद्धात्रीमहन्दे
वीमारिराधयिषुः शुभां स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीम् सदसद्देवि यत्किञ्चिन्मोक्ष
वच्चार्थवत्पदम् तत्सर्वं त्वय्यसंयोगं योगवद्देवि संस्थितं त्वमक्षरं परं देवि यत्र सर्वं प्रतिष्ठितम्

अक्षरं परमं देवि संस्थितं परमार्थवत्‌ अक्षरं परमं ब्रह्म विश्वं चैतत्क्षरात्मकम्‌ दारुण्यवस्थितो
वह्निर्भौमाश्च परमाणवः तथा त्वयि स्थितं ब्रह्म जगच्चेदमशेषतः ॐकाराक्षरसंस्थानं यत्तद्देवि स्थि
रास्थिरं तत्र मात्रात्रयं सर्वमस्ति यद्देवि नास्ति च त्रयो लोकास्त्रयो वेदास्त्रैविद्यं पावकत्रयम्‌ त्रीणि ज्यो
तींषि वर्णाश्च त्रयो धर्मादयस्तथा त्रयो गुणास्त्रयः शब्दास्त्रयो देवास्तथाश्रमाः त्रयः कालास्तथाव
स्थाः पितरोऽहर्निशादयः एतन्मात्रात्रयं देवि तव रूपं सरस्वति विभिन्नदर्शनामाद्यैर्ब्रह्मणो हि सनातने
सोमसंस्था हविः संस्था पाकसंस्था च सनातनी तास्त्वदुच्चारणाद्देवि क्रियन्ते ब्रह्मवादिभिः अनिर्देश्यं त
था चान्यदर्द्धमात्राश्रितं परम्‌ अविकार्याक्षयं दिव्यं परिणामविवर्जितम्‌ तवैतत्परं रूपं यन्न शक्यं
मयोदितम्‌ न चास्येन च तज्जिह्वाताल्वोष्ठादिभिरुच्यते इन्द्रोऽपि वसवो ब्रह्मा चन्द्रार्कौ ज्योतिरेव च
विश्वावासं विश्वरूपं विश्वेशं परमेश्वरम्‌ सांख्यवेदान्तवादोक्तं बहुशाखास्थिरीकृतम्‌ अनादि
निधनमध्यं सदसच्च सदेव तु एकं त्वनेकं नाप्येकं भवभेदसमाश्रितम्‌ अनाख्यं षड्गुणाख्यं च वर्गाख्यं

मा॰क॰ त्रिगुणाश्रयं नानाशक्तिमतामेकं शक्तिवैभाविकं परं सुखात् सुखं महासौख्यं रूपं तत्वयि भाष्यते एवं
६४ देवि त्वया व्याप्तं सकलं निष्कलञ्च यत् अद्वैतावस्थितं ब्रह्म यच्च द्वैते व्यवस्थितम् ये थानित्या ये वि
64 नश्यन्ति चान्ये ये स्थूला ये च सूक्ष्मातिसूक्ष्मा ये वा भूमौ ये न्तरीक्षे न्यतो वा तेषां तेषां त्वमेवोपल
ब्धि यच्चामूर्तं यच्च मूर्तं समस्तं यत्वा भूतेषु वमेकञ्च किञ्चित् यद्दृश्यसि क्षितितले खे न्यतो वा तत्सर्वे
त्वं नतस्सुरेश्वर्यज्ञानेश्च जडउवाच एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती प्रत्युवाच महात्मानं नागमश्व
तरं ततः सरस्वत्युवाच वरं ते कम्बलभ्रातः प्रयच्छाम्युरगाधिपः तदुच्यतां प्रदास्यामि यत्ते मनसि वर्तते
अश्वतरउवाच सहायं देवि देहि त्वं पूर्वं कम्बलमेव मे समस्तस्वरसम्बन्धमुभयोः संप्रयच्छ च सरस्वत्यु पु॰
वाच सप्तस्वरा ग्रामरागाः सप्त पन्नगसत्तम गीतकानि च सप्तैव तावतीश्चापि मूर्छना तानाश्चैको ६४
नापञ्चाशत्तथा ग्रामत्रयञ्च यत् एतत्सर्वं भवान् गाता कम्बलश्चैव तेऽनघ ज्ञास्यते मत्प्रसादेन मधु
नी. स्त्रापरं तथा चतुर्विधपदं तालं त्रिप्रकारं लयत्रयं यतित्रयं तथा तोद्यं मया दत्तं चतुर्विधं एता

कृवान्मत्प्रसादात्पन्नगेन्द्रा परस्वयत् अस्यान्गतमायतं स्त्व वच्च अनयोरिह तद्दर्शयं मयादत्तं
भवतः कम्बलस्य च यथा नान्यस्य भूर्लोके पाताले वापि पन्नगाः प्रणेतारौ भवन्तौ च सर्वेस्यास्य भवि
ष्यतः पाताले देवलोके च भूर्लोके चैव पन्नगौ जड उवाच इत्युक्त्वा सा तदा देवी सर्वेजिह्वा सरस्वती
जगामादर्शनं सद्यो नागस्य कमलेक्षणा तयोश्च तद्यथा वृत्तं भ्रात्रोः सर्वमजायत विज्ञानमुभयोरग्र्यं
पदतालस्वरादिकं ततः कैलासशैलेन्द्रशिखरस्थितमीश्वरम् गीतस्वैसप्तभिर्नागौ तन्त्रीलयसमन्वि
तौ आरिराधयिषू देवमनंगांगहरं हरम् प्रचक्रतुः परं यत्नमुभौ संहतवाक्कलौ प्रातर्निशायां मध्या
ह्ने सन्ध्ययोश्चापि तत्परा ततः कालेन महता स्तूयमानो वृषध्वजः तुतोष गीतकेनासौ प्राह तौ गृह्यतां
वरः ततः प्रणम्याश्वतरः कम्बलेन समं तदा व्यज्ञापयन्महादेवं शितिकण्ठमुमापतिम् यदि नौ भ
गवान्प्रीतो देवदेवस्त्रिलोचनः ततो यथाभिलषितं वरमेतं प्रयच्छ नौ मृतः कुवलयाश्वस्य पत्नी दे
व मदालसा तेनैव वयसा सद्यो दुहितृत्वमुपैतु मे जातिस्मरा यथा पूर्वं तद्वत्कान्तिसमन्विता योगिनी

मा॰क॰ योगमाता च भद्रं दे जायतां सर्व देवदेव उवाच यथोक्तं पञ्चगव्ये षु तथा न भविष्यति मत्प्रसादाद संदिग्धं
६५ शृणु चेदं वचो मम आद्धे तु समनुप्राप्ते मध्यमे पिंड नाम्नना भक्षयेथाः फणिश्रेष्ठ सुचिः प्रयत मानसः
भक्षिते तु त्वया तस्मिन् सर्वतो मध्य मात्फणात् समुत्पत्स्यति कल्याणी तथा रूपा यथा मृता कामस्त्वे म
65 मभिध्याय कुरुत्वं पितृ पूजनं ततस्त्वग्रांदेवसास्त्व क्रः भुक्त सोमध्यमात्फलात् सचापि कृत्यधामा
सकस्यचित्सुभुजंगमः अन्तगृहीता सुदती स्त्रीभिर्गुप्ता मधावपुत् गोचानुद्दिनमागम्य पुत्रो नाग
पतेः सुखं अन्तर्धुजेन सहितो चिक्रीडाते मवाशिव एकदा तु युतौ प्राह सनागोस्तु तरे सुदा यनमूया
पूर्वमुक्तमनुत्क्रियते किंत्वं तथा सराजपुत्रो युवयो रूपकारी सभास्ति कम् केन नानीयते वत्सा पु॰
नुपकाराय मानदः एवमुक्तो ततस्तेन पित्रा स्नेहवता तु सो गत्वा तस्य पुरं मध्ये रसाति तेन धीमता ६५
ततः कुवलयाश्वे सौ कृत्वा किञ्चित्कथान्तरं याचेतां प्रणायोपेतं युगे इ गमनं प्रति नागराहतृप
पुत्रो सौ नन्विदं भवतो गृहं वल वाहन वस्त्रादि यन्मदीयं तदेव तो यस्यापि वाञ्छि यदातुधनं रत्न

ह्यापिता त्वद्दीयतां नृपसुतो यदि च प्रसादो मयि एतावता हि देवेन वञ्चितो ऽस्मि दुरात्मना। यद्भव
द्भ्यां मम त्वं मो मद्दीये क्रियते गृहे यदि वा मत्प्रियं कार्य्यमनुग्राह्योस्मि वा यदि तद्दनेन मम गेहे च मम
त्वमनुकल्प्यतां उभयोर्यन्मदीयं तत् मामकं च युवयोः स्वकम्। एतत्सत्यं विजानीतं युवां प्राणावदि
श्वराः पुनर्न्नैवं विभिन्नार्थं वक्तुमर्हसि द्विजोत्तम। मत्प्रसादात्मपरौ प्रीत्या शापितो हृदयेन मे ततः
स्नेहार्द्रनयनौ तावुभौ नागनन्दनौ उचतुस्तं नृपतेः पुत्रं किंचित्प्रणयकोपितम्। पुत्रावूचतुः ऋतध्वज न
सन्देहो यथैवाहि भवानिदम्। तथैव चास्मन्मनसि नात्र चिन्त्यमतोऽन्यथा किन्त्वाराध्यः स्वयं पित्रा
प्रोक्तमेतन्महात्मना द्रष्टुं कुवलयाश्वं तमिच्छामि च पुनः पुनः। जड उवाच ततः कुवलयाश्वोथ समु
त्थाय वरासनात् यथाह तातेति वदन्पला मम करोद्भुवि कुवलयाश्व उवाच धन्योहमतिपुण्यो
हं कोन्योस्ति सदृशो मया यत्तातो मामतिद्रष्टुं करोति प्रवणम्मनः। तदुत्तिष्ठ गच्छामस्तातज्ञा ह्यरा
मप्यहम्। नातिक्रान्तुमिहेच्छामि पद्भ्यां भस्य शपाम्यहम्। जड उवाच एवमुक्त्वाय यौ सोथ सहता

मा०क० भ्यां नृपात्मजः प्राप्तश्च गोमतीपुरंयां निर्जग्मुर्नगराद्बहिः तन्मध्ये नययुस्तौ वै नृपनागेन्द्रनन्दना।
६६ मेने च राजपुत्रोसौ परं पारं नयो गृहम् ततश्चाक्रम्य पातालं ताभ्यां नीतो नृपात्मजः पाताले ददृशे तौ
66 भोगपन्नगकुमारको फणामणिकृतोद्योतौ व्यक्तस्वस्तिकलक्षणौ। विलोक्य तौ स्वरूपं गोविस्म
यात्फुल्ललोचनः विहस्य चाब्रवीत्प्रेम्णा साधु भो द्विजसत्तमौ कथयामासतुस्तौ च पितरं पन्नगेश्वर
म् सात्त्वमश्वतरं नाम माननीयं दिवौकसां रमणीयं ततोऽपश्यत्पातालं स नृपात्मजः कुमारैस्तरु
णैर्वृद्धैस्तरुणै रूपशोभितम् तथैव नागकन्याभिः क्रीडन्तीभिरितस्ततः चारुकुण्डलहाराभिस्ताराभि
भिर्गगनं यथा गीतशब्दैस्तथान्यत्र वेणुवीणास्वनानुगैः मृदंगपणवातोद्यहारि वै भवनाकुलं पु०
वीक्ष्यमाणः स पातालं ययौ शक्रजितः सुतः सहताभ्यां महीपाभ्यां पन्नगाभ्यामरिन्दम ततः प्रवि ६६
श्य ते सर्वे नागराजनिवेशनं ददृशुस्ते महात्मानमसुरनागाधिपं स्थितं दिव्यमाल्याम्बरधरं मणिकु
ण्डलभूषितं स्वच्छमुक्ताफलालंकारहारोरःशोभितं केयूरिणं महाभागमासने सर्वकाञ्चने

मणिविक्रमं वै दृष्ट्वा जलान्तरितरूपं के मत्ता भ्यां दर्शितं स्वस्य तातो नास्माकं महाशिति वीरः कुवलयाश्वो
ध पित्रे चासौ न वेदितः ततो न नाम वरं शो नागेन्द्रस्य ऋतुध्वजं तमुत्थाय वलागीटं स नागः परिष्वज्ये
मूर्द्ध्नि चैनमुपाघ्राय चिरंजीवेत्युवाच स; निहतामित्रवर्ग शुचित्रो म शुश्रूषणं कुरु वत्स धन्यस्य कस्य
ते परोक्षस्यापि ते गुणाः भवतो मम पुत्राभ्यां मया माख्यानि वेदिताः; नंदंतानेव वद्धैःथा मनोवाक्कायचे
ष्टितैः जीवितं गुणिनः श्लाघ्यं जीवन्नेव मृतो गुणाः; गुणवान्मनिर्वृतिः पुत्रोः शत्रुणां हृदयज्वरं करोत्यात्म
हितं कुर्वन्ति; श्लाघ्यमश्व महाराजने देवताः पितृ रोवि प्राः मित्रार्थिविकलादयः वान्धवाश्चतथ हतिनिजीवि
तं गुणिनो नाश्वि रम परिवादनिवृत्तानां त्वागतेषु दयावतां गुणिनां सफलं जन्म संश्रितानां विपद्गतो ज
उवाच एवमुक्त्वा स तं वीरं पुत्रौ रिदमथाब्रवीत् पूज्यं कुवलयाश्वस्य कर्तुकामो भुजंगमः स्नाना
दिकं कर्म कृत्वा सर्वमेव यथाक्रमं मधुपानादि सम्भोगमाहारश्च यथेप्सितं ततः कुवलयाश्वेन हृद
योत्सवभूतया कथयास्वल्पकं कालं स्थास्यामो हृष्टचेतसः; अथ मेने च तं मौनी स च वाक्जितः सुतः

मा०क० कथाश्च कारश्च पतिः पन्नगानामुदारधीः समेत्यैते रात्मजभूपनन्दनै र्महोरगानामधिपः सस्यवाक मु
६७ दायुतो ज्ञानि मधुनि चात्मवान यथोपयोगं बुभुजे स भोगभुक ॥ ० ॥ इति मार्कंडेयपुराणे ॥ ० ॥ जड
उवाच कृताहारं महात्मानमधिपं पवनाशिनाम उपासाञ्चक्रिरे पुत्रभूपालतनयास्तनः कथाभिर
नुरूपाभिः स महात्मा भुजंगमः प्रीतिं सञ्जनयामास पुत्रसख्युरुवाच च तव भत्रस्सुखबुद्धिर्गृहमभ्या
गतस्य यत कर्त्तव्यमुरगजनु शंकापितरीव सुतो मयि हिरण्यं वा सुवर्णं वा वस्त्रं वाहनमासनं यद्वा
भिमतमत्यर्थं दुर्लभं तद्वृणीष्व मां कुवलयाश्व उवाच तव प्रसादात्स्वसान्दिषु प्रभूतं गृहे मम पि पु०
तरस्ति समात्यापि न किंचित्कार्यमीदृशे: ततो वपुःसहस्रायु शासती मां वसुन्धरां तथैव त्वयि पा
तालं कुतो याज्ञा सुखं मम: ते सभाग्याः सपुण्याश्च येषां पितरि जीवति ... कोटिसमं वित्तं तारुण्या ६७
दुष्कोटिषु मित्राणि तुल्यशिष्टानि तत्र हि दैवमनात्मधं जनिता भिप्रयोगिर्न दीप्यते ... नास्ति मे
...यथ्य नृणां याज्ञा प्रवर्त्तायाध्य मम: ...यशेषे कथं याज्ञा म नजिह्वा ...ष्यति येन्वेवित्यश

न किञ्चित्किंम मे हास्ति नष्टं वा पितृवाक्यान् सह्यायां संश्रिता सुखिनो हि ते ये तु बाल्यात्प्रभृत्येव वि
पित्रा कुटुम्बिनः ते सुखास्वादनभ्रष्टा मन्ये धात्रैव वञ्चिता तत्प्रयत्नप्रसादेन धनरत्नादिसञ्चयान्
पितृसक्तान प्रयच्छामः कामतो नित्यमर्च्चितान् न नाथ सत्वेनापन्नो मे पद्द्वितयुगलमीर यच्चूडामणि
ना घृष्टं यत्त्वं गात्रस्पर्शमाप्तवान् उडुग उवाच इत्येवं प्रश्रितं वाक्ययुक्तः पन्नगसत्तमः प्राह राजसुतं प्रीत्या
पुत्रं यो रूपकारिणाम् नाग उवाच यदि रत्नसुवर्णादि मत्तोऽवाप्तुं मतं मनः यदन्यन्मनः प्रीत्येतद्ब्रू
हि त्वं ददाम्यहं कुवलयाश्व उवाच भगवंस्त्वत्प्रसादेन पितुरस्य गृहे मम सर्वमस्ति विशेषेण संप्रा
प्ते त्वद्दर्शनात् कृतकृत्योस्मि चैतेन सफलं जीवितञ्च मे यदङ्गसंश्लेषमितः त्वद्देवस्य मानुषः म
न्तो मम मूर्ध्नि गे त्वत्पादरजसा धृष्टिदास्पदं कृतं नो नैव न प्राप्तं किं मया पन्नगेश्वर यदि त्वदवश्यं दातव्यो वरो
मम यथेप्सितं तत्पुण्यकर्मसंस्कारो हृदयान्मापयातु मे सुवर्णमणिरत्नानि वाहनं गृहमासनं स्त्रि
यो रूपपानपात्रं च चारु माल्यानुलेपनम् गेयं च विविधाः कामा गीतवाद्यादिकञ्च यत् सर्वमेतन्म

मा०क० ममैतत्फलं पुण्यवनस्पतेः तस्मान्निर्वेशात्तन्मूलसेके यत्नकृतात्मना कर्त्तव्यः पुण्यः सत्वानां न किंचिद्दु
६८ र्लभम् अलर्क उवाच एवं भविष्यति प्राज्ञ तव बम्भोऽर्थिता मतिः सत्यस्त्वेतत्फलं सर्वत्र मे स्या
68 कं तथा त्वया तथाप्यवश्यं मद्देहमागतेन त्वयाधुना प्राप्यं यन्मानुषे लोके दुःप्रापं [illegible]गो भवे जड
उवाच तस्येतद्वचनं श्रुत्वा समदा नृपनन्दनः सुखावलोकनश्रेक्षे पन्नगेश्वरपुत्रयोः ततस्तौ प्रणि
पत्योचौ राजपुत्रस्य यन्मतम् तत्पित्रे सकलं वीरौ कथयामासतः स्फुटम् पुत्रावूचतुः तातास्य पत्नी द
यिता श्रुत्वेमं विनिपातितं अत्यजद्दयितान्प्राणान्विप्रलब्धा त्ववात्मना केनापि कृतवैरेण दानवेन कु
बुद्धिना गन्धर्वराजस्य सुता नाम्ना ख्याता मदालसा कृतज्ञोऽयं ततस्तात प्रतिज्ञां कृतवानिमां नान्या भा पु०
र्या भवित्री मे वर्जयित्वा मदालसां दृष्टुमस्या चारुसर्वांगीमथ वीरस्तवात्मजः तात वाञ्छति यद्येनां क्रि
यतां तत्कृता भवेत् अश्वतर उवाच भूतेर्वियोगिनो योगस्तादृशे रवतादृशः कथमेतद्धिनास्वपंभा ६८
र्यां वा शम्बरादिनां ॥ जड उवाच प्रणिपत्य भुजंगेशं पुनः शत्रुजितस्सुतः प्रत्युवाच महामानं प्रेमलज्जा

समन्वितः मायामयीमप्यद्भुतां मम तातो मदालसां यदि दर्शयते मह्यं परं कृतमनुग्रहं अश्वतरउवा
च तस्मात्पश्येह वत्स त्वं मायां चेद्द्रष्टुमिच्छसि अनुग्राह्यो भवान्नोऽद्य बालोऽप्यभ्यागतो गुरुः जडउवा
च आनयामास नागेन्द्रो गृहे गुप्तां मदालसां तेषां सम्मोहनार्थाय संजल्प्य च ततः स्फुटम् दर्शयामा
स वनदा राजपुत्राय तां शुभां सेयं न वेत्ति ते भार्या राजपुत्र मदालसा जडउवाच सदृष्ट्वा तां तदा
तथ्वी ततश्च शात्द्विगतत्रपः प्रियेति तामभिमुखं ययौ वाचामुदीरयन् निवारयामास च तं नागः सो
ऽश्वतर त्वरन् अश्वतरउवाच मायेयं पुत्र मा स्प्राक्षीः प्रागेव कथितं तव अन्तर्धानमुपेत्याशु माया
संस्पर्शमादिभिः ततः पपात सन्दिग्धां सह मूर्च्छा परिप्लुतः इति प्रियेति वदन्नाचाचिन्तयामास भावि
नी अहो स्नेहोऽस्य नृपतेर्मम सोऽपूर्व्यचलन्मनः येनार्थं पातनोरीशां विनाशस्त्वं निपातितः जडउवाच
मायेति दर्शिता तेन मिथ्या मायेति यत्स्फुटम् वाय्वग्नितेजसां भूमेराकाशस्य च चेष्टया ततः कुव
लयाश्वं तं समाश्वास्य भुजंगमः कथमायामास तत्सर्वं मृतसंजीवनादिकम् ततः प्रहृष्टः परि

मां०क०
६९
69

लब्ध्वा कांतां प्रणम्य गर्गं निजगाम सोथ भोबुध्यमानः स्वपुरं तमश्वमारुह्य सान्वितमभ्युपैति ॥
इति मार्कंडेयपुराणे ॥ ० ॥ जड उवाच आगम्य स्वपुरं सोथ पित्रे सर्वमशेषतः कथयामास तन्वं
गी यथा प्राप्ता पुनर्मृता ननाम सा च चरणौ श्वश्रूश्वशुरयोः शुभा स्वजनश्च यथा पूर्वं वंदनाशेषना
ष्टिभिः पूजयामासतन्वंगी यथान्यायं यथावयः ततो महात्मा स्वे जज्ञे पौराणां तत्रैव पुरे ऋतध्वजश्च
सुचिरं तया रेमे सुमध्यमा निर्झरेषु च शैलानां निम्नगापुलिनेषु च काननेषु च रम्येषु तथैवोपवने
षु च पुण्यक्षयं वांछमाना सा च कामोपभोगतः सह तेनातिरम्येषु रेमे रम्यास्थलभूमिषु ततः का
लेन महता शत्रुजित्स नराधिपः सम्यक्कृत्वा शास्य वसुधां कालधर्ममुपेयिवान् ततः पौरा महात्मानं पु० पु०
त्रं तस्य ऋतध्वजं अभ्यषिंचन्त राजानमुदाराचारचेष्टितम् ॥ ० ॥ इति मार्कंडेयपुराणे ॥ ० ॥ ६९
जड उवाच सम्यक्पालयतस्तस्य प्रजाः पुत्रानिवौरसान् मदालसायां संजज्ञे पुत्रः प्रथमजस्ततः
तस्य चक्रे पिता नाम विक्रान्त इति धीमतः ततस्तुष्टास्ते वै भृत्या जहास च मदालसा सा वै मदालसाप

ऽबालयुवानमसाधियमां सुखापनच्छलेनाहरूढभानमविस्वरां शुद्धोऽसिरे नामनतेऽस्तिनामक्वा
ऽस्ति कल्पनया धूमेव पञ्चात्मकं देहमिदं ततैव तमे वासि वैरोऽक्षिपिकस्यदेतो: नवानवात्मोऽस्ति
वैस्वजन्मा शब्दो यमासाद्य भङ्गीसमूहं विकल्पमाना विविधा गुणाश्च गुणाश्च तेजा: सकलेन्द्रि
येषु भूतानि भूतै: परिवर्धितानि वृद्धिं समायान्ति तथैव पुंस: अन्नाम्बुपानादिभिरेककस्मात्तथैव ऽस्ति
वृद्धिं न च तेऽस्ति हानि: त्वं कञ्चुके शीर्यमाणो निजेऽस्मिन् त्वक्षिप्य देहमुत्तमाक्रजेथा: शुभाशुभै: क
र्मभिर्देहमेतन्मदादिमूढै: कञ्चुकस्तेऽपिनद्ध: नातोऽसि किञ्चिन्न न येति किञ्चिद्दन्येति किञ्चिद्दयितोऽसि
कश्चित् ममेति किञ्चिन्न ममेति किञ्चित् त्वं भो ममसंहं वृथा मालपेथा: दु:खानि दु:खोपशमाय भोगा
न्सुखाय जानाति विमूढचेता: तान्येव दु:खानि जना: सुखानि जानात्यविद्वान्सुविमूढचेता: हा
सास्ति संदर्शन सञ्जि युग्मम त्युज्ज्वलं तज्जलमं बुसा पा: कुचादि पीनं पिशितं घनं तत्स्थानं रते: किं
नु रकोन याति यातं स्थितो यानगतश्च देहं देहोऽपि चान्य: पुरुषो निविष्ट: ममत्व मुर्व्यां न तथा

मा०क० यथा स्वैर्दैहेति मात्रं मनुभूटतेषा जडउवाच वर्द्धमानं सुतं साथ राजपत्नी दिने दिने तमुल्लापनादि
७० नारोधममनयन्निर्ममात्मकम् यथायथा वलं लेभे तथा लेभे मतिं पितः तथा तथात्मबोधस्स मात्रा
70 प्रमादसुभाषितैः इत्थं तया स तनयो जन्मप्रभृति बोधितः चकार न मतिं प्राज्ञो गार्हस्थ्यं प्रति निर्ममः द्विती
योस्याः सुतो जज्ञे तस्य नामाकरोत्पिता सुवाहुरयमित्युक्ते साजहास मदालसा तमप्येवं यथापूर्वं बा
लमुल्लापनादिनी प्राह बाल्यात्स च प्राह तथा बोधं महामतिः तृतीयं तनयं जातं स राजा शत्रुमर्दनः
नदाहृतेन सा सुभ्रूर्जहासातिचिरं पुनः तथैव सोपि तन्व्या बालत्वादेव बोधितः क्रियाश्च कालेनि
ष्कामो न किंचिदुपकारकं चतुर्थस्य सुतस्याथ चिकीर्षुर्नाम भूमिपः ददर्श तां शुभाचारामीषद्धा पु०
सां मदालसां इत्याह राजा हसतीं किंचित्कौतूहलान्वितः क्रियमाणे मया नाम्नि कृथ्य हा ७०
स्यलक्षणं विक्रान्तश्च सुबाहुश्च तथान्यः शत्रुमर्दनः शोभनानीति नामानि तानि मन्ये कृतानि
वै योग्यानि क्षत्रबन्धूनां शौर्याटोपयुतानि च अथ चेन्नैतानि भद्रे यदि ते मनसि स्थितं तद

सङ्क्रियतां नाम चतुर्थस्य सुतस्य मे । मदालसोवाच । मयाज्ञा भवतः कार्या महाराज यथार्थमां तथा
नाम करिष्यामि चतुर्थस्य सुतस्य ते । अलर्क इति धर्मज्ञः ख्यातिं लोकेषु यास्यति । कनीयानेष ते पु-
त्रो मतिमांश्च भविष्यति । जड उवाच । तच्छ्रुत्वा नाम पुत्रस्य कृतं मात्रा महीपतिः । अलर्क इत्यसंबद्धं प्र-
हस्येदमथाब्रवीत् । राजोवाच । भवत्या यदिदं नाम मत्पुत्रस्य कृतं शुभं । किमीदृशमसम्बद्धमर्थः को-
स्य मदालसे । मदालसोवाच । कल्पनेयं महाराज कृता सा व्यवहारिकी । त्वत्कृतानां तथा नाम्नां शृणु भू-
प निरर्थतां । वदन्ति पुरुषाः प्राज्ञा व्यापिनं पुरुषं यतः । क्रान्तिश्च गतिरुद्दिष्टा देशाद्देशान्तरं तु या । सर्व-
गो न प्रयातीह व्यापी देहेश्वरो यतः । अतो विक्रान्तसंज्ञेयं मता मम निरर्थिका । सुबाहुरिति यान्-
या कृता यस्य सुतस्य ते निरर्था साप्यमूर्तत्वात्पुरुषस्य महीपते । पुत्रस्य यत्कृतं नाम तृतीयस्यारि-
मर्द्दनः । मन्ये तदप्यसंबद्धं शृणु चाप्यत्र कारणं । एक एव शरीरेषु सर्वेषु पुरुषो यदा तदास्य रा-
जन्कः शत्रुः को वा मित्रमिहेष्यते । भूतैर्भूतानि मृद्यन्ते अमूर्तो मृद्यते कथं । क्रोधादीनां पृथग्भा-

मा॰क॰ वात्कल्याणे नैवं निरर्थिका यदि संख्यं महाराज समन्वाम प्रकल्प्यते नाम्नि कस्मादलर्काख्यं नैवत्वं भव
७१ तो मतम् ॥ जडउवाच ॥ एवमुक्तस्तया साध्वी महिष्या स महीपतिः ॥ तथेत्याह महाबुद्धिर्दयितां तथा
७१ वादिनी ॥ तं सापि च सुतं सुभ्रूर्यथा पूर्वसुतांस्तथा ॥ प्राहा रबोधजननं तामुवाच स पार्थिवः ॥ करो
षि किमिदं मूढे मम आभावाय सन्ततेः ॥ दुष्टेव बोधदानेन यथा पूर्वसुतान् मे ॥ यदि ते मत्प्रियं कार्यं य
दि ग्राह्यं वचो मम ॥ तदेनं तनयं मार्गे प्रवृत्तेः सन्नियोजय ॥ कर्ममार्गः समुच्छेदं नैवं देवि गमिष्यति ॥
पितृपिंडनिवृत्तिश्च नैव साध्वि भविष्यति ॥ पितरो देवलोकस्थास्तथा तिर्यक्त्वमागताः ॥ तद्वन्मनुष्यतां पु॰
याता भूतवर्गे च संस्थिताः ॥ सपुण्यानपुण्यांश्च क्षुत्क्षामां तृट्परिप्लुतान् ॥ पिंडोदकप्रदानेन ७१
नरः कर्मण्यवस्थितः ॥ संदेवाप्याययेत् सुभ्रू तद्वदेवातिथीनपि ॥ देवैर्मनुष्यैः पितृभिः प्रेतैर्भूतैः
सगुह्यकैः ॥ वयोभिः कृमिकीटैश्च नर एवोपजीव्यते ॥ तस्मात्तन्वंगि पुत्रं मे यत्कार्यं इव योनि
भिः ॥ ऐहिकामुष्मिकायालं तत्सम्यक्प्रतिपालय ॥ तेनैवमुक्ता सा भर्त्रा वरनारी मदालसा

अलर्कन्नाम तनयम्मुवाचोन्नापरादिनी पुत्र वर्द्धस्व मद्भर्तुर्म्मनो नन्दय कर्म्मभिः ऐहिकामुष्मिको
पालनस्सम्यक्प्रतिपादय मित्राणामुपकाराय दुर्हृदान्नाशनाय च धन्योसि रे यो वसुधामश
त्रुरेकश्चिरं पालयितासि पुत्र तत्पालनादस्तु सुखोपभोगधर्म्मात्सुखं प्राप्स्यसि चामरत्वं यजेर
नेकैर्विविधानजस्त्रमन्नैर्द्दिजान्संस्थितो पार्थिवानां स्त्रियश्च कामैर्विकुले विरायथ युद्धे स्वारी
न्शोषयितासि वीर बाल्ये मनोनन्दय बान्धवानां गुरोस्तथाज्ञाकरणैश्च कुमारः स्त्रीणां युवा
सत्कुलभूषणानां वृद्धो वने वत्स वनेचराणां राज्यं कुर्वन्सुहृदानन्दयेथाः साधून्रक्षेथा
स्तात यज्ञैर्यजेथाः दुष्टान्निघ्नन्वैरिणश्चाजिमध्ये गोविप्रार्थे वत्स मृत्युं व्रजेथाः ॥ ० ॥ इति
मार्कण्डेयपुराणे ॥ ० ॥ जडउवाच एवमुल्लाप्यमानस्तु सततं मात्रा दिने दिने ववृधे वयसा
बालो बुद्ध्या चालर्कसंज्ञकः सकौमारकमासाद्य आतध्रुजसुतस्तदा कृतोपनयनः प्राज्ञः प्र
णिपत्याह मातरं मम यायदमन्य कर्त्तव्यमैहिकामुष्मिकाय वै सुखाय वदतान्ते वै प्रश्रया

भां॰क॰ वनतस्यमे महीपालसोथवाच वत्सराज्यमिषेकेन प्रजारञ्जनमादितः कर्त्तव्यमविरोधेन स्वधर्म्मस्य
७२ महीभृता व्यसनानि परित्यज्य सप्त मूलहराणि वै आत्मा विपक्षः संरक्ष्यो बहिर्म्मन्त्रविनिर्ग
मात् अष्टधा नाशमाप्नोति स्वरक्षस्यन्दना यथा तथा राजाप्यसन्दिग्धं बहिर्म्मन्त्रविनिर्गमा
त् दुष्टाद्दुष्टो प्रजानीयादमात्यान् अरिदोषतः चरैश्चरास्तथाशत्रो रन्वेष्टव्याः प्रयत्नतः विश्वासो
पि न कर्त्तव्यो राज्ञामित्राप्तबन्धुषु कार्ययोगादमित्रेपि विश्वसीत नराधिपः स्थानवृद्धिक्षयज्ञे
न षाड्गुण्यविदितात्मना भवितव्यं नरेन्द्रेण न कामवशवर्त्तिना प्राज्ञात्मा मंत्रिणाश्चैव मता भृत्या
महीभृतः जेयाश्चानन्तरं पौरा विरुध्यतत्तमोशिभिः यश्चैतानविदित्वैव वैरिणो विजिगीषते पु॰
सोजितात्माजितामात्य शत्रुवर्गेन बाध्यते तस्मात्कामादयः पूर्वं जयाः पुत्र महीभृता तज्जयेहि ७२
जयो राज्ञो राजानश्यति तेर्जितः कामः क्रोधश्चलोभश्च मदोमानस्तथैवच हर्षश्च शत्रवोह्ये
ते विनाशाय महीभुजां कामप्रशक्तमात्मानं स्मृत्वा पांडुं निपातितं निवर्त्तयेत्तथा क्रोधादनुह्रादं

तथात्मजम् हृतः शैलन्तथा लोभान्मदाद्दुःशङ्किजैर्ईशं मानादनायुषापुत्रं बलं दर्पीत्सुरस्त्रयं एभिर्जि
तेर्जितं सर्वं भरुश्नेन महात्मना स्मृत्वा विवर्जयेदेतान्दोषानन्यान्महीपतिः काककोकिलभृंगाणां
मृगव्याडशिखंडिनां हंसकुक्कुटलोहानां शिक्षेत चरितं नृप कीटकस्य क्रियां कुर्याद्विपक्षे मनुजेश्वरः
चेष्टां पिपीलिकानां च काले भूतः प्रदर्शयेत् ज्ञेयाग्निविस्फुलिंगानां वीजचेष्टा च शाल्मलेः चन्द्रसूर्यस्व
रूपस्थं नीत्यर्थे पृथिवीपतिः वन्धकीपद्मशरभः शूलिन्या गर्भिनी स्तनात् प्रज्ञा नृपेणादेया तथा गो
पालयोषितः शक्रयमसोमानां तद्वद्यो महीपतिः रूपाणि पञ्च कुर्वीत महीपालनकर्मणि यथे
न्द्रश्चतुरो मासान्स्तोयोत्सर्गेण भूगतं आप्लावयेत्तथालोकं परिहारैर्महीपतिः मासानष्टौ यथा
सूर्यस्तोयं हरति रश्मिभिः सूक्ष्मेणा चाभ्युपायेन तथा शुल्कान्नृपो हरेत् यथा यमः प्रियद्वेष्यौ प्रा
प्तकाले नियच्छति तथा प्रियाप्रिये राजा दुष्टादुष्टे समो भवेत् पूर्णेन्दुमालोक्य यथा प्रीतिमा
ञ्जायते नरः एवं यत्र प्रजा सर्वा निर्वृत्तास्तच्छशिव्रतं मारुतः सर्वभूतेषु निगूढश्चरते यथा एव

मां·क·० श्वैरेवं नृपश्चौरैः पौराभाद्यादिवन्धुषु न लोभार्थेन्न कामार्थैर्नान्यार्थैर्वध्यमानकं पदान्वैः कृष्यते वध्य
७३ स राजा धर्म्मम्रच्छति उपथग्राहिणो भूटान् स्वधर्म्माद्विनतो नर यः करोति निजे धर्म्मे स राजा स्व
73 र्गमृच्छति वर्णाधर्म्मा न सीदन्ति यस्य राष्ट्रे तथाश्रमाः राजस्तस्य सुखं तात परत्रेह च शाश्वतम् ए
तद्राज्ञा परं कृत्यं तथैतत् सिद्धिकारणं स्वधर्म्मस्थापनं नृणां चाल्यन्ते यत्न कुद्धिभिः पालनेनैव भू
तानां कृतकृत्यो महीपतिः सम्यक् पालयिता भागं धर्म्मस्याप्नोति वै यतः ॥ ० ॥ इति मार्कंडेयपु
राणे ॥ ० ॥ जडउवाच तन्मातुर्वचनं श्रुत्वा साहलर्को मातरं पुनः पप्रच्छ वर्णाधर्म्मो यश्च धर्म्मो
ये चाश्रमेषु च अलर्क उवाच कथितोयं महाभाग राज्यतन्त्राश्रितस्त्वया वर्णाधर्म्मं इहेच्छामि श्रो पु०
तुं वर्णाश्रमात्मकं मदालसोवाच दानमध्ययनं यज्ञो ब्राह्मणस्य त्रिधोदितः धर्म्मो नान्यश्चतु ७३
र्थोस्ति धर्म्मस्तस्यापदं विना याजनाध्यापने शुद्धे तथा पूतप्रतिग्रहः एषा सम्य[illegible]ख्याता
त्रिविधा यास्य जीविका दानमध्ययनं यज्ञः क्षत्रियस्याप्ययं त्रिधा धर्म्मः प्रोक्तः क्षितेरक्षा शस्त्रा

ीरस्वजीविका दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव सः वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्यजीवि
का दानं यज्ञोथशुश्रूषा द्विजातीनां त्रिधामता व्याख्यातः शूद्रधर्मोपि जीविका कारुकर्मच शु
द्रद्विजातिशुश्रूषापोषणं क्रयविक्रयो वर्णधर्मास्त्विमे प्रोक्ताः श्रूयतामाश्रमाश्रयाः स्वस्व
धर्मात्संसिद्धिं नरः प्राप्नोति मच्युतः प्रयाति नरकं प्रेत्य प्रतिषिद्धनिषेवनात् यावत्तु नोपनयनं क्रि
यते वै द्विजन्मनः कामचेष्टोक्तिभक्षश्च तावद्भवति पुत्रक कृतोपनयनः सम्यक ब्रह्मचारी गुरोर्गृहे
वसतः तत्र धर्मोस्य कथ्यते तन्निबोध मे स्वाध्यायोथाग्निशुश्रूषा स्नानं भिक्षाचनं तथा गुरोर्निवेद्य
तच्चाद्यमथस्नातेन सर्वदा गुरोः कर्मणि सोद्योगः सम्यक्प्रीत्युपपादकः तेनाहूतः पठेच्चैव तत्परो
नान्यमानसः एकं द्वौ सकलान्वापि वेदान् प्राप्य गुरोर्मुखात् अनुज्ञातो वरं दत्वा दक्षिणां गुरवे ततः
गार्हस्थ्याश्रमकामस्तु गृहस्थाश्रममावसेत् वानप्रस्थाश्रमं वापि चतुर्थं स्वेच्छयात्मनः तथैव वा
गुरोर्गेहे द्विजो निष्ठामवाप्नवान् गुरोरभावे तत्पुत्रे तच्छिष्ये तत्सुतं विना शुश्रूषुर्निरभिमानो

मा०क० ब्रह्मचर्याश्रमं वसेत् उपाकृत्य ततस्तस्माद्गृहस्थाश्रमकाम्यया ततोऽसमानर्षिकुलां तुल्यामव्याधि-
७४ मरोगिणीम् उद्वहेन्न्यायतो धर्म्यां गृहस्थाश्रमकारणात् स्वकर्मणा धनं लब्ध्वा पितृदेवातिथी-
नपि सम्यक्संप्रीणयेद्भक्त्या पोषयेच्चाश्रितांस्तथा भृत्यात्मजान्यामयोथदीनान्धपतितानपि
यथाशक्त्यान्नदानेन वयांसि पशवस्तथा एवं धर्मो गृहस्थस्य ऋतावभिगमस्तथा पञ्चयज्ञविधा-
नं च यथाशक्त्या न हापयेत् पितृदेवातिथिज्ञातिभुक्तशेषं स्वयं नरः भुञ्जीत च स्वयं भृत्यैः पृथ्वा
विभवमानतः एष त्वद्देशतः प्रोक्तः गृहस्थस्याश्रमो मया वानप्रस्थस्य धर्म्मं ते कथयाम्यवधार्य्य-
तां अपत्यसन्ततिं दृष्ट्वा प्राज्ञो देहस्य चानतिम् वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणात् त- पु०
त्रारण्योपभोगैश्च तपोभिश्चात्मकर्षणम् भूमौ शय्या ब्रह्मचर्यं पितृदेवातिथिक्रिया होमस्त्रिष- ७४
वणस्नानं जटावल्कलधारणम् मौनादिकरणाश्चैव वन्यस्नेहनिषेवणम् दुर्योधोपभुञ्जा-
थ आत्मनश्चोपकारकः वाणप्रस्थाश्रमस्तस्माद्द्विज्ञास्तच्चरमाश्रमः वत्स वक्ष्य महत्तत्त्वं क्षय

ताश्रमस्य मे यः स्वधर्म्मो स्वधर्म्मज्ञैः प्रोक्तश्चात महात्मभिः सर्वसंगपरित्यागो ब्रह्मचर्यमकोपि
ता यतेन्द्रियत्वमावासे नैकस्मिन् वसतिश्चिरं अनारम्भस्तथाहारो भैक्षान्नेनैककालिकी आत्मज्ञाना
वबोधेच्छा तथा चात्मावलोकनं चतुर्थे चाश्रमे धर्म्मो मया ते ऽयं निवेदितः सामान्यमन्य वर्णानामाश्र
माणाश्च मे शृणु सत्यः शौचमहिंसा च अनसूया तथा क्षमा आनृशंस्यमकार्पण्यं सन्तोषश्चाष्टमो गु
णाः एते संक्षेपतः प्रोक्ता धर्म्मा वर्णाश्रमेषु ते एतेषु च स्वधर्म्मेषु तिष्ठेत्समनन्तरः यस्तूल्लंघ्य स्व
कं धर्मं स्ववर्णाश्रमसंज्ञितम् नरोन्यथा प्रवर्त्तेत स दण्ड्यो भूभृता भवेत् ये स्वधर्म्म परित्यागात्पापं कु
र्वन्ति मानवाः उपेक्षतस्तान्नृपतेरिष्टापूर्त्तं प्रयाति वै तस्माद्राज्ञा प्रयत्नेन सर्ववर्णाः पृथक्ततः प्र
वर्त्तन्ते न्यथा दण्ड्याः स्थाप्याश्च वसु कर्म्मसु ॥ ० ॥ इति मार्कंडेयपुराणे ॥ ० ॥ अलर्क उवाच ॥
यत्कार्यं पुरुषेणाथ गार्हस्थ्यमनुवर्त्तता बन्धश्चाप्यामकरणो क्रियया यस्य ते स्थितः उपकाराय
तन्नृणां यच्च मत्यं मतामदा यथावत्क्रियते तन्मे यथावत्पृच्छतो वद मदालसोवाच वत्स गार्हस्थ्यमा

मा॰क॰ न्माद्य नरः सर्वमिदं जगत् पुष्णाति तेन लोकांश्च सञ्जयत्यपि वाञ्छितान् पितरो मुनयो देवा भूतानि मा
७५ नुजास्तथा क्रिमिकीटपतंगाश्च वयांसि पशवोऽसुराः गृहस्थमुपजीवन्ति ततस्तृप्तिं प्रयान्ति च मुखं
75 चास्य निरीक्षन्ते अपि नो दास्यतीति वै सर्वस्याधारभूतेयं वत्स धेनुस्त्रयीमयी यस्यां प्रतिष्ठितं विश्वं वि
श्वहेतुश्च या मता ऋक्पृष्ठासौ यजुर्मध्या सामवक्त्रशिरोधरा इष्टापूर्तविषाणा च साधुसूक्ततनू
रुहा शान्तिपुष्टिशकृन्मूत्रा वर्णपादप्रतिष्ठिता उपजीव्यमाना जगतां साक्षया नापचीयते स्वाहा
कारः स्वधाकारो वषट्कारश्च पुत्रक हन्तकारस्तथैवान्यस्तस्याः स्तनचतुष्टयं स्वाहाकारं स्तनं देवाः पि
तरश्च स्वधामयं मुनयश्च वषट्कारं देवभूतसुरेतराः हन्तकारं मनुष्याश्च पिबन्ति सततं स्तनं एवमाप्या पु॰
ययत्येषा देवादीनखिलास्त्रयी तेषामुच्छेदकर्ता यः पुरुषोऽत्यन्तपापकृत् स पतत्यन्धतामिस्रे तामि ७५
स्रे च निमज्जति यस्त्वेतां मानवो धेनुं स्वैर्वत्सैरमरादिभिः पाययत्युचिते काले स स्वर्गायोपपद्यते
तस्मात्पुत्र मनुष्येण देवर्षिपितृमानवाः भूतानि चानुदिवसं पोष्याणि स्वतनुर्यथा तस्मात्स्नातः शु

चिर्भूलादेवर्षिपितृतर्प्पणं प्रजापतेस्तथैवाद्भिः कालं कुर्यात्समाहितः सुमनोगन्धधूपैश्च देवानभ्यर्च्य
मानवः ततोऽग्नितर्प्पणं कुर्याद्दयाश्ववलयस्तथा ब्रह्मणे गृहमध्ये तु विश्वेदेवेभ्य एव च धन्वन्तरिं स
मुद्दिश्य प्रागुदीच्यां बलिं क्षिपेत् प्राच्यां शक्राय याम्यायां यमाय बलिमाहरेत् प्रतीच्यां वरुणायाथ
सोमायोत्तरतो बलिं दद्याद्धात्रे विधात्रे च बलिं द्वारे गृहस्य च ऊर्ध्वमेक्षिवहिर्दद्याद्वस्यास्तमन
तः नक्तंचरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत् पितृणां निर्वपेच्चैव दक्षिणाभिमुखस्थितः गृहस्थ
तत्परो भूत्वा सुसमाहितमानसः ततस्तोयमुपादाय तेष्वेवाचमनाय वै स्थानेषु विक्षिपेत्प्राज्ञस्ता
स्ताऽउद्दिश्य देवताः एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः आप्यायनाय भूतानां कुर्यादुत्सर्गमाद
रात् श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि वैश्वदेवं हि नामैतत्सायं प्रातर्विधीयते आचम्य च ततः
कुर्यात्प्राज्ञो द्वारावलोकनं मुहूर्तस्याष्टमं भागमुदीक्षेद्यतिथिर्भवेत् अतिथिं तत्र संप्राप्तं भक्त्या
र्घेनोदकेन वा संपूजयेद्यथाशक्ति गन्धपुष्पादिभिस्तथा न मित्रमतिथिं कुर्यान्नैकग्रामनिवासिनं

मा॰कं॰ अज्ञातकुलनामानमन्यकालसमुपस्थितः बुभुक्षुमागतं श्रान्तं याचमानमकिंचनं ब्राह्मणं प्राहुर
७६ तिथिं स पूज्यः शक्तितो बुधैः न पृच्छेद्गोत्रचरणौ स्वाध्यायं नापि पण्डितः शोभनाशोभनाकारं तम्म
76 न्येत प्रजापतिं अतिथ्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते तस्मिन्तृप्ते नृयज्ञोत्थान्मुच्यते स्मात
गृहाश्रमी तस्मादत्वा तु यो भुंक्ते स्वयं किल्विषभुङ् नृवः स पापं केवलं भुंक्ते पुरीषं चान्यजन्मनि अ
तिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते स दत्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति अप्यम्बु शाकदा
नेन यश्चाप्यतिसत्वं पूजयीत नरः शक्त्या तेनैवातिथिमादरात् कुर्यादहरहः श्राद्धमन्ना
द्येनोदकेन वा पितॄनुद्दिश्य विप्रांश्च भोजयेद्विप्रमेव वा अन्नस्याग्रं तत उद्धृत्य ब्राह्मणायोपपाद पु॰
येत् भिक्षा च याचतो दद्यात्परिव्राड्ब्रह्मचारिणां ग्रासप्रमाणा भिक्षा स्यादग्रं ग्रासचतुष्टयं ७६
अग्रं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा अदत्वा तु
नैव भोक्तव्यं यथाविभवमात्मनः पूजयित्वातिथीनिष्टान् ज्ञातीन्बन्धून् सथार्थिनः विकलान्बाल

रच्छाश्च भोजयेच्चातुरांस्तथा वाञ्छितः कल्पयेत्तानामा यथान्योऽप्यभक्तिश्चनं कुर्युर्विनाभोजनीयः स
मृद्धे विभवे सति श्रीमन्नं ज्ञातिमासाद्य यो ज्ञातिरवसीदति सीदता यत्कृतं तेन तत्पापं स समश्नुते सा
यश्चैव विधिः कार्य्यो सूर्य्योढश्चात्र चातिथिः पूजयीत यथाशक्ति शयनासनभोजनैः एवं मुहूर्त्तमा
न गार्हस्थ्यं भावमाहितम् स्कन्धे विधाता देवाश्च पितरश्च महर्षिभिः श्रेयोभिवर्षिणः सर्वे तथैवाति
थिबान्धवाः पशुपक्षिगणा लप्साहे गान्ये सूक्ष्मकीटकाः यथाचात्र महाभाग स्वयमत्रिरगायत गाः शृ
णुष्व महाभाग गृहस्थाश्रमसंस्थिताः देवान्पितॄंश्चातिथींश्च मडत्सं पूज्य बान्धवान् यामयश्च मु
रुंचैव गृहस्थो विभवे सति श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि विश्वेदेवादिनामैतत् कुर्यात्सायं
तथा दिने मांसं मन्नं तथा शाकं गृहे शोपसाधितम् न च तत्स्वयमश्नीयात् विधिवद्यन्निर्वपेत् मदाल
सावाच नित्यं नैमित्तिकं चैव नित्यनैमित्तिकं तथा गृहस्थस्य त्रिधा कर्म तन्निशामय पुत्रक पश्च
यज्ञाश्रितं नित्यं यदेतत्कथितं तव नैमित्तिकं तथैवान्यत्पुत्रजन्मक्रियादिकं नित्यनैमित्तिकं त्रेयं प

मां क० वै श्राद्धादि पंडितैः तत्र नैमित्तिकं वक्ष्ये श्राद्धमभ्युदयं तव पुत्रजन्मनि यत्कार्यं जातकर्मसमन्वि
७८ तैः विवाहादौ च कर्तव्यं सर्वं सम्यक्क्रमोदितं पितरश्चात्र संपूज्याः ख्याता नान्दीमुखास्तु ये पिं
९९ डश्च दधिसंमिश्रान् दद्याद्बदरमिश्रितान् उदङ्मुखः प्राङ्मुखो वा यजमानः समाहितः वैश्वदेववि
हीनं तत् केचिदिच्छन्ति मानवाः युग्मा श्चात्र द्विजाः कार्या स्तेच पूज्याः प्रदक्षिणम् एतन्निमित्तकं
वृद्धौ तथान्यच्चौर्द्ध्वदेहिकम् मृताहनि च कर्तव्यं मेकोद्दिष्टं शृणुष्व तत् देवहीनं तथैकार्घ्यं तथै
वैकपवित्रकम् आवाहनं च कर्तव्यमग्नौकरणवर्जितम् प्रेतस्य पिंडमेकं तु दद्यादुच्छिष्टस
न्निधौ तिलोदकं चोपतिष्ठेत नामस्मरणान्वितम् अक्षय्यममुकस्येति विप्रस्यानुविसर्जने पु०
अभिरम्यतामिति ब्रूयात् ब्रूयुस्तेऽभिरताः स्मह प्रतिमासं भवेदेतत्कार्यं मा वत्सरान्नृप अथस ७८
म्वत्सरे पूर्णे यदा वा क्रियते नृप सपिंडीकरणं कार्यं तस्यापि विधिरुच्यते तत्रापि दैवरहित
मेकार्घ्यैकपवित्रकम् नैवाग्नौकरणं तत्र चावाहनवर्जितम् अपसव्यं च तत्रापि भोजयेदयु

जोद्दिजाम् विशेषस्तत्र चान्योस्ति प्रतिमासक्रियादिका: तं कथ्यमानमेकाग्रो वदन्त्या मेनिशा
मय तिलगन्धोदकैर्युक्तं तत्र पात्रचतुष्टयम् कुर्यात्पितॄणांत्रितयमेकंप्रेतस्य पुत्रकः पात्रत्रये
प्रेतपात्रमर्घ्यान्वेर प्रसेचयेत् येसमानाइतिजपन् पूर्ववच्छेषमाचरेत् स्त्रीणामप्येवमेवैत
देकोद्दिष्टमदाहृतं सपिंडीकरणान्तासां पुत्राभावेनविद्यते प्रतिसम्वत्सरं कार्यमेकोद्दिष्टं न
रेस्त्रिया मृताहनि यथान्यायंनृणां यद्वदितोद्दिष्टं पुत्राभावे सपिंडास्तु तदभावे सहोदका: मातुः
सपिंडायेवाप्युर्येच मातुःसहोदका: कुर्युरेते विधिं सम्यगपुत्रस्य सुतासुता: कुर्युर्मातामहाश्चै
वपुत्रिकासुतयास्तथा द्व्यामुष्यायनसंज्ञांस्तु मातामहपितामहान् पूजयेयुर्यथान्यायं श्राद्धै
र्नैमित्तिकैरपि सर्वाभावे स्त्रिय: कुर्युः स्वभर्तॄणाममंत्रकम् तदभावेच नृपति: कारयेत्स्वकु
टुम्बिनाम् तज्जातीयैर्नरै: सम्यक्दाहाद्या: सकला: क्रिया सर्वेषामेव वर्णानां बान्धवो नृप
तिर्यत: एतास्ते कथिता वत्स नित्यनैमित्तिकास्तथा क्रियां श्राद्धाश्रयामन्यां नित्यनैमित्तिकीं शृ

मां०क० णु दर्शस्तत्र निमित्तं वै कालश्चन्द्रक्षयात्मकः नियुक्तो नियतः कालस्तस्यास्तं सूत यद्यथा मदालसो
७८ वाच सपिंडीकरणादूर्द्धं पितुर्यः प्रपितामहः सतु लेपभुजो याति प्रलुप्तः पितृपिंडतः तेषां यश्च
78 चतुर्थोऽन्यः पुत्रलेपभुजात्मकम् सोपि सम्बन्धतो हीनमुपयोगं प्रपद्यते पितापितामहश्चैव तथै
व प्रपितामहः पिंडसम्बन्धिनो ह्येते विज्ञेयाः पुरुषास्त्रयः लेपसम्बन्धिनश्चान्ये पितामहपितामहात्
प्रभृत्युक्तास्त्रयस्तेषां यजमानाश्च सप्तमः इत्येष मुनिभिः प्रोक्तः सम्बन्धः साप्तपौरुषः यजमा
नात्प्रभृत्यूर्द्धं मनुलेपभुजस्तथा ततोऽन्ये पूर्वजाः सर्वे ये चान्ये नरकौकसः ये च तिर्य्यक्त्वमा
पन्ना ये च भूतादिसंस्थिताः तान्सर्वान्यजमानो वै श्राद्धं कुर्वन्यथाविधि समाप्याययते वत्स ये पु०
न येन शृणुष्व तत् अन्नप्रकिरणं यत्तु मनुष्यैः क्रियते भुवि तेन तृप्तिमुपायान्ति ये पिशाचत्व ७८
मागताः यदम्बु स्नानवस्त्रोत्थं भूमौ पतति पुत्रक तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते याश्च
गन्धाम्बुकणिकाः पतन्ति धरणीतले ताभिराप्यायनं तेषां ये देवत्वं कुले गताः उद्धृतेष्वथ पि

उद्दिश्य श्रानुकनिकाशुचि नाभिराप्यायनं तेषां येतिर्यक्कृतं कुले गताः ये चादन्ताः कुले बालाः क्रिया
योग्या न संस्कृताः विपन्नास्ते न विकिरन्नस्म्याजे नजलासिनः भुक्त्वा चाचमतां यच्च यज्जलं श्राङ्घ्रिः भु
वने ब्राह्मणानानर्थे वान्यैतेन तृप्तिं प्रयान्ति वै एवं यो यजमानस्य यच्च तेषां द्विजन्मनां कश्चिज्जला
नुविक्षेपः शुचिरुच्छिष्ट एव च तेनान्नेन कुले तत्र तत्तद्योन्यन्तरं गताः प्रायान्त्याप्यायनं वत्स सम्यक्कु
श्रुत्वावर्तां नृणां अन्यायोपार्जितैरन्नैर्यच्छ्राद्धं क्रियते नरैः तृप्यन्ते तेन चांडालपुक्कशाद्यासु योनि
षु एवमाप्यायनं वत्स बहूनामेव वान्धवैः श्राद्धं कुर्वद्भिरन्नाम्बुर्वैपेशापि प्रजायते तस्माच्छ्राद्धं नरो भ
क्त्या शाकेनापि यथाविधि कुर्वीत कुर्वतः श्राद्धं कुले कश्चिन्न सीदति तस्य कालानहं वक्ष्ये नित्यनैमित्ति
कात्मकान् विधिनायेन च नरैः क्रियतेतन्निबोधमे कार्यं श्राद्धममावास्यामासि मस्युडुपक्षये तथा
ष्टकास्वप्यवश्यमिच्छाकालान्निबोधमे विशिष्टब्राह्मणप्राप्तौ सूर्येन्दुग्रहणेऽयणे विषुवे र
वि संक्रान्तौ व्यतीपाते च पुत्रक श्राद्धार्हद्रव्यसंप्राप्तौ तथा दुःस्वप्नदर्शने जन्मर्क्षे ग्रहपीडासु

मां०क० श्राद्धं कुर्वीत चेछया विशिष्टश्रोत्रियो योगी वेदवित् श्रेष्टसामगाः त्रणाचिकेतत्रिमधुत्रिसुपर्णः
७९ षडंगवित् दौहित्रऋत्विग्जामातृस्वस्रीयः श्वशुरस्तथा पञ्चाग्निकर्मनिष्ठश्च तपोनिष्ठोथ मातु
79 लः मातापितृपरश्चैव शिष्यसम्बन्धिबान्धवाः एते द्विजोत्तमाः श्राद्धे समस्ताः केतनक्षमाः अवकी
र्णी तथा रोगी न्यूनांगो रिक्तस्तथाधिकः पौनर्भवस्तथा कालः कुंडो गोलोथ पुत्रक मित्रध्रुक्कुनखी
क्लीवश्यावदन्तो निराकृतिः अभिशस्तस्तथा स्तेलः पिशुनः सोमविक्रयी कन्यादूषयिता वैद्यो गुरु
पित्रोस्तथोज्झकः भृतकाध्यापितोऽमित्रपरपूर्वापतिस्तथा वेदोज्झोऽथाग्निसंन्यासी वृषलीपति पु०
दूषितः तथान्ये च विवर्मस्थाव र्ज्याः पित्र्येषु वै द्विजाः निमंत्रयीत पूर्वेद्युः पूर्वोक्तानु द्विजसत्तमा
न् दैवनियोगे पैत्रे च तांस्तथैवोपकल्पयेत् तैश्च संयमिभिर्भाव्यं यश्च श्राद्धं करिष्यति श्राद्धं दत्वा ७९
भुक्त्वा च यस्यामामंत्रणां निशि श्राद्धं दत्वा च भुक्त्वा च मैथुनं योधिगच्छति पितरस्तस्य तन्मा
सं तस्मिन्रेतसि शेरते गत्वा वै योषितं श्राद्धे यो भुंक्ते यश्च गच्छति रेतोमूत्रकृताहारस्तं मासं पित

र्त्तयोः तस्मात्तत्प्रथमं कार्यं प्राज्ञेनोपनिमंत्रणं अप्राप्ते तद्दिने चापि वर्ज्यो योषित्प्रसंगिनः
भिक्षार्थमागतोश्चापि काले संयमिनो यतीन् भोजयेत्प्रणिपत्याद्यैः प्रसाद्य यतमानसः यथैव
शुक्लपक्षाद्धि पितॄणामसितः प्रियः तथापराह्णः पूर्वाह्णात्पितॄणामतिरिच्यते संपूज्य स्वागतेनै-
तानभ्युपेतान् गृहे द्विजान् पवित्रपाणीनाचान्तानासनेषूपवेशयेत् पितॄणामयुजः कामं
युग्मान्देवे द्विजोत्तमान् एकैकं वा पितॄणाञ्च देवानाञ्च स्वशक्तितः तथा मातामहानान्तु तुल्यं वा वै-
श्वदेविकम् पृथक्तयोस्तथा चान्ये केचिदिच्छन्ति मानवाः प्राङ्मुखान्देवसंकल्पान् मैत्रान्कुर्या-
दुदङ्मुखान् तथैव भजाविधिरुक्तो मनीषिभिः विष्टरान्वैद्दशान्दत्वा पूज्य श्चार्घादिना बुधैः पवि-
त्रशद्दिने तदा तेघाऽनुद्दश कुर्यादावाहनं प्राज्ञो देवानाम्मन्त्रतो द्विजः यवाम्भोभिस्ततश्चार्घं द-
त्वा वैश्वदेविकं गन्धमाल्याम्बुधूपञ्च दत्वा सम्यक्प्रदीपकं अपसव्यं पितॄणाञ्च सर्वमेवोप-
कल्पयेत् दर्भांश्च द्विगुणान्दत्वा तेभ्योऽनुज्ञामवाप्य च मंत्रपूर्वं पितॄणाञ्च कुर्यादावाहनं बुधः

मार्कं॰ अपसव्यन्तथैवार्घ्यं विकिरंश्च तथा तिलैः । निष्पादयेन्महाभाग पितॄणां प्रीणये नरः ॥ अग्निकार्यं मनु-
८० ज्ञातः कुरुष्वेति ततो द्विजैः । जुहुयाद्व्यञ्जनक्षारं वर्ज्जमन्नं यथाविधि ॥ अग्नये कव्यवाहाय स्वाहेति प्र-
थमाहुतिः । सोमाय वै पितृमते स्वाहेत्यन्या तथा भवेत् ॥ यमाय प्रेताधिपतये स्वाहेति तृतीयाहुतिः ॥
हुतावशिष्टं दत्वा च भाजनेषु द्विजन्मनां । भोजनालम्भनं कृत्वा दत्वा चान्नं यथाविधि ॥ यथासुखं जुषध्वं
भो इति वाच्यमनिष्ठुरं । भुञ्जीरंश्च ततस्तेपि तच्चित्ता मौनिनः सुखं ॥ यद्यदिष्टतमं तेषां तत्तदन्नमसत्व-
रः । अक्रुध्यश्च नरो दद्यात्सम्भ्रमेण प्रलोभयेत् ॥ रक्षोघ्नांश्च जपेन्मन्त्रांस्तिलैश्च विकिरन्महीम् ॥ सिद्धा-
र्थकैश्च रक्षार्थं श्राद्धं हि प्रचुरच्छलं । पृष्टैस्तृप्तैश्च तृप्ताः स्थ तृप्ताः स्म इति वादिभिः ॥ अनुज्ञातो नर- पु॰
स्त्वन्नं प्रकिरेद्भुवि सर्वतः । तद्वदाचमनार्थाय दद्यादापः सकृत्सकृत् ॥ अनुमान्य ततः प्राप्य पूत- ८०
वाक्कायमानसः । सतिलेन ततोऽन्नेन पिण्डं सर्वेण पुत्रक ॥ पितॄनुद्दिश्य दर्भेषु दद्यादुच्छिष्टसन्निधौ ॥
पितृतीर्थेन वै तोयं दद्यात्तेभ्यः समाहितः । पितॄन्सम्प्रीणयन्भक्त्या यजमानो नृपात्मज ॥ ततस्तन्मा

नामहाभागस्वदत्वापिंडान्यथाविधिः गंधमाल्यादिसंयुक्तान्दद्यादाचमनं ततः दत्वाचदक्षिणां
शक्त्यास्वस्वधास्त्वितितान्वदेत् तेचतुष्टैस्तथेत्युक्तेवाचयेद्वैश्वदेविकान् प्रीयन्तामितितद्ब्रूया
विश्वेदेवाइतीरयेत् तथेतिचोक्तेवैविप्रैप्रार्थनीयास्तथाशिषः विसर्जयेत्प्रियाण्युक्त्वाप्रणिपत्य
चभक्तितः आद्वारमनुगच्छेच्चआगच्छेच्चानुमोदितः ततोनित्यक्रियाकार्याभोजयेच्चतथातिथि
नित्यक्रियांपितृणांचकेचिदिच्छन्तिसत्तमाः नपितृणांतथैवान्येशेषंपूर्ववदाचरेत् पृथक्पाके
ननेत्यन्येकेचित्पूर्वंचपूर्ववत् ततस्तदन्नंभुंजीतसहभृत्यादिभिर्नरः एवंकुर्वीतधर्मज्ञःश्राद्धंपि
त्र्यंसमाहितः यथाचविप्रमुख्यानांपरितोषोभिजायते त्रीणिश्राद्धेपवित्राणिदौहित्रंकुतपस्तिलाः
वर्ज्यानिचाहविप्रेन्द्राः कोपध्वगमनंत्वरा राजतंचतथापात्रंशस्तंश्राद्धेषुपुत्रक रजतस्यकथा
कार्यादर्शनंदानमेवच राजतेहिस्वधादुग्धापितृभिःश्रूयतेमही तस्मात्पितृणांरजतमभीष्टं
प्रीतिवर्द्धनम् ॥ ० ॥ इतिमार्कंडेयपुराणेमदालसोपाख्यानेश्राद्धकल्पः ॥ ० ॥ मदालसा

मां॰ कं॰ वाच अतः परं शृणु त्विदं पुत्र भक्त्या उदाहृतं पितॄणां प्रीतये यद्वा वर्ज्यं वा प्रीतिकारिणां मासं तृप्तिः पि
५९ तृणान्तु हविष्यान्नेन जायते मासद्वयं मत्स्यमांसैस्तृप्तिं यान्ति पितामहाः त्रीन्मासान्हारिणं मा
मं विज्ञेयं पितृतृप्तये पुष्णाति चतुरो मासान् शशस्य पिशितं पितॄन् शाकुलं पञ्च वै मासान्षण्मा
81 सान्सूकरामिषम् छागलं सप्त वै मासानैणेयञ्चाष्टमासिकीं करोति तृप्तिं नव वै रुरोर्म्मांसं न
संशयः गवयस्यामिषं तृप्तिं करोति दशमासिकीम् तथैकादश मासांस्तु औरभ्रं पितृतृप्तिदं संवत्स
रं तथा गव्यं पयः पायसमेव वा वार्ध्रीणसामिषं लोहं कालशाकं तथा मधु दौहित्रामिषमप्यत्र यद पु॰
न्नान्यान्वकुलोद्भवैः आनन्त्याय प्रदत्तानि तृप्तिं गौरीसुतस्तथा पितॄणां यत्र सन्देहो गयाश्राद्ध
श्च पुत्रक राजस्यामाकश्यामाकौ तद्वत्प्रसाधिका नीवाराः पौष्कलाश्चैव धान्यानां पितृतृप्तये ५९
यवव्रीहिसगोधूमतिलमुद्गाः ससर्षपाः प्रियंगवः कोविदारा निष्पावाश्चातिशोभनाः वर्ज्याः
मर्कटकाः श्राद्धे राजमासास्तथाणवः विप्रुषिकामसूराश्च श्राद्धकर्मणि गर्हिताः लसुनं गृञ्जनं

काञ्ची पलांडुं पिडमूलकं करस्थं यानि चान्यानि हीनानि रसवर्णतः गान्धारिकामलाबूनि लवणान्यौ
षराणि च आरक्ताश्चैव निर्यासाः प्रत्यक्षलवणानि च वर्ज्यान्येतानि वै श्राद्धे यच्च वाचा न शस्यते यच्चो
त्कोचादिना प्राप्तं पतिताद्यदुपार्जितं अन्यायकन्याशुल्कोत्थं द्रव्यं चात्र विगर्हितम् दुर्गन्धि फेनिलं
चाम्बु तथैव प्रदरोदकम् न लभेद्यत्र गौस्तृप्तिं नक्तं यच्चाप्युपाहृतम् यन्न सर्वाय चोत्सृष्टं यच्चाभोज्य
निपानजं तद्वर्ज्यं शलिलं तात सदैव पितृकर्म्मणि मार्गमाविकमौष्ट्रञ्च सर्वमेकशफञ्च यत् माहिष
ञ्चामरञ्चैव धेनोर्गोश्चाप्यनिर्दशं पित्रर्थं मे प्रयच्छस्वेत्युक्त्वा यच्चाप्युपार्जितं वर्जनीयं सदा सद्भि
स्तत्पयः श्राद्धकर्म्मणि वर्ज्या जन्तुमती रूक्षा क्षितिः प्लुष्टा तथाग्निना अनिष्टदुष्टशब्दोग्रा दुर्गन्धा श्रा
द्धकर्म्मणि कुलावमानकाः श्राद्धे याधसुष्टिकलम्पकाम् नग्नाः पातकिनश्चैव घ्नन्ति दृष्ट्या पितृक्रियां
अपुमानापविद्धश्च कुक्कुटो ग्रामशूकरः श्वा चैव हन्ति श्राद्धानि यातुधानाश्च दर्शनात् तस्मा
त्स्वसंवृतो दद्यात् तिलैश्चाविकिरन्महीं एवं रक्षा भवेच्छ्राद्धे कृता तात तयोरपि शावसूतकसंस्पृ

मांक० ष्टं दीर्घरोगिभिरेव च पतितैर्म्लेच्छैर्नग्नैश्च पुत्राति नापितानां महात्मन् वर्जनीयं तथा श्राद्धे तथोदक्याश्च
८२ दर्शनं षंडालपौंडसन्नाशो यजमानेन चादरात् केशकीटावपन्नं च तथा श्वभिरवेक्षितं पूतिपर्यु
82 षितं चैव वार्ताकाभिषवास्तथा वर्जनीयानि वै श्राद्धे यच्च वस्त्रानिलाहतं श्रद्धया परया दत्तं पि
तॄणां नाम गोत्रतः यदाहारास्तु ते जातास्तदाहारत्वमेति ज्ञा तस्माद्धुत्वा च तत्पात्रे यच्छ सं पितृ
कर्माणि यथा चैव वदांतर्यं पितॄणां तृप्तिमिच्छता योगिनश्च तथा श्राद्धे भोजनीया विपश्चिता यो
गाधाराद्धि पितरः तस्मान्नान् पूजयेत्सदा ब्राह्मणानां सहस्रेभ्यो योगीत्वग्रासनो यदि यजमानश्च
भोक्तृश्च नौरिवाद्युभितारयेत् पितृगाथास्तथैवात्र गीयंते ब्रह्मवादिभिः या गीताः पितृभिः पू पु०
र्वमैलस्यासन्महीपतेः कदा नः संततावग्र्यः कस्यचिद्भविता सुतः योयोगिभुक्तशेषान्नो भुवि ८२
पिंडं प्रदास्यति गयायामथवा पिंडं खड्गमांसं महाहविः कालशाकं तिलास्सम्यक् कृशरं मास
तृप्तये वैश्वदेवं च सौम्यं च खड्गमांसं महाहविः विषाणावर्ज्यं खड्गाप्या आशफादाशयामहे

दद्याछ्राद्धं त्रयोदश्यां मघासु च यथाविधि: मधुसर्प्पि:समायुक्तं पायसं दक्षिणायणे तस्मात्तं पूज
येद्भक्त्या मपि तृन्न पुत्र मानव: कामानभीप्सान्न सकलान्न पापाद्वात्मविमोचनं वसून्रुद्रांस्तथादि
त्यान्न ग्रहनक्षत्रतारका: प्रीणायन्ति मनुष्याणां पितर: श्राद्धतर्प्पिता: आयु: प्रजां धनं विद्यां स्वर्ग
मोक्षं सुखानि च प्रयच्छन्ति तथा राज्यं पितर: श्राद्धतर्प्पिता एतत्ते कथितं पुत्र श्राद्धकर्म्म यथोदित
म् काम्यानां श्रूयतां वत्स श्राद्धानां तिथिकीर्त्तनम् ॥ ० ॥ इति मार्कण्डेयपुराणे ॥ ० ॥ मदा
लसोवाच प्रतिपद्धनलाभाय द्वितीयाद्विपदाप्रदा वरार्थिनी तृतीया तु चतुर्थी शत्रुनाशनी श्रियं
प्राप्नोति पञ्चम्यां षष्ठ्यां पूज्यो भवेन्नर: गाणाधिपत्यं सप्तम्यामष्टम्यां बुद्धिमुत्तमाम् स्त्रियो
नवम्यां प्राप्नोति दशम्यां पूर्ण्णकामतां वेदांस्तथाप्नुयात्सर्वानेकादश्यां क्रियापर: द्वाद
श्यां जयलाभञ्च प्राप्नोति पितृपूजक: प्रजां मेधां पशुं वृद्धिं स्वातन्त्र्यं पुष्टिमुत्तमां दीर्घमायु
रथैश्वर्य्यं कुर्वानस्तु त्रयोदशी अवाप्नोति न सन्देह: श्राद्धं श्रद्धापरो नर: यथा सन्नविता

मा॰क॰ न्येन श्राद्धं संपन्नमन्विताः युवानः पितरो यस्य मृताः शस्त्रेण वाहताः तेन कार्यं चतुर्दश्यां तेषां पि
८३ तृप्तिमीप्सता श्राद्धं कुर्वन्नमावास्यां यत्नतः पुरुषः शुचिः सर्वकामानवाप्नोति स्वर्गञ्चानन्त्य
83 मश्नुते कृत्तिकासु पितॄन्न कुर्वन् स्वर्गमाप्नोति मानवः अपत्यकामो रोहिण्यां सौम्ये तेज
स्वितां लभेत् शौर्यमार्द्रासु चाप्नोति पुत्रादिं च पुनर्वसौ पुष्टिं पुष्ये सदाभ्यर्च्य आश्लेषासु वरान्
सुतान् मघासु स्वजनश्रेष्ठं सौभाग्यं फाल्गुनीषु च प्रदानशीलो भवति सापत्यश्चोत्तरासु च प्रया
ति श्रेष्ठतां स्वसु हस्ते श्राद्धपरो नरः रूपवन्ति च चित्रासु तथापत्यान्यवाप्नुयात् वाणिज्यलाभदा
स्वाति विशाखा पुत्रकामदा कुर्वतां चानुराधासु दत्युश्चक्रवर्त्तितां आधिपत्यञ्च ज्येष्ठासु मू पु॰
ले स्वारोग्यमुत्तमाम् आषाढासु यशः प्राप्तिरुत्तरासु विशोकता श्रवणेन शुभान्लोका ८३
न्धनिष्ठासु धनं महत् वेदविद्वानभिजिति भिषक्सिद्धिं जये च वारुणे अजाविकं प्रोष्ठपदे
विन्देत्यावस्तथान्तरे रेवतीषु तथा कुप्यमश्विनीषु तुरंगमान् एवं कुर्वन्तथाप्नोति भवणा

प्रायुरुत्तमां तस्मात्काम्यानि कुर्वीत नद्वेष्वेतेषु तत्त्ववित् ॥ ० ॥ इ मार्कंडेयपुराणे ॥ ० ॥
मदालसोवाच एवं पुत्र गृहस्थेन देवताः पितरस्तथा संपूज्या हव्यकव्याभ्यामन्नेनातिथिबांध-
वाः भूतानि भृत्या विकलाः पशुपक्षिपिपीलिकाः भिक्षवो याचमानाश्च ये चान्ये वसता गृहे स-
दाचाररतानात साधुना गृहमेधिना पापं भुंक्ते समुल्लंघ्य नित्यनैमित्तिकी क्रिया अलर्क उवाच
कथितं भेत्वया मातर्न्नित्यं नैमित्तिकं च यत् नित्यनैमित्तिकं चैव त्रिविधं कर्म पौरुषं सदाचारम-
हं श्रोतुमिच्छामि कुलनन्दिनि यत्कुर्वन्सुखमाप्नोति परत्रेह च मानवः मदालसोवाच गृहस्थेन सदा
कार्यमाचारपरिपालनम् नह्याचारविहीनस्य भद्रमत्र परत्र वा यज्ञदानतपांसीह पुरुषस्य न भू-
तये भवन्ति यः सदाचारं समुल्लंघ्य प्रवर्त्तते दुराचारो हि पुरुषो नेहायुर्विन्दते महत् कार्यो ध-
र्मः सदाचारे आचारो हन्त्यलक्षणां तस्य स्वरूपं वक्ष्यामि सदाचारस्य पुत्रक आत्मनैकमनाः श्रु-
त्वा तं तथैव परिपालय त्रिवर्गसाधने यत्नः कर्त्तव्यो गृहमेधिना तत्संसिद्धौ गृहस्थस्य सिद्धिरत्र

मा॰क॰ परत्र च पादेनार्थेन पारत्र्यं कुर्य्यात्संचयमात्मवान् अर्द्धेन चात्मभरणं नित्यं नैमित्तिकान्वितम् पाद
८४ श्चात्मार्थमायस्य मूलभूतं विवर्द्धयेत् एवमाचरतः पुत्र मन्त्रः साफल्यमर्च्छति तद्वत्पापनिषेधार्थं
84 धर्म्मकार्य्यो विपश्चिता परत्रार्थस्तथैवान्यः काम्यो त्रैव फलप्रदः प्रत्यवायन्दयात्काम्यस्तथान्य
श्चविशेषवान् त्रिधा कामोऽपि गदितस्त्रिवर्गो नवगाहतः परस्परानुविद्धांश्च सर्वानेतान्विचिन्त
येत् विपरीतानुबद्धांश्च धर्म्मादीस्तान्शृणुष्व मे धर्म्मो धर्म्मानुविद्धार्थो धर्म्मोर्थानर्थसाधकः
उभाभ्यांश्च तथा कामस्तेन तौ च द्विधा पुनः ब्राह्मे मुहूर्ते बुध्येत धर्म्मार्थौ चापि चिन्तयेत् समुत्था
य तथाचम्य प्राङ्मुखो नियतः शुचिः पूर्वां सन्ध्यां सनक्षत्रां पश्चिमां सदिवाकरां उपासीत तथान्या पु॰
र्वं नैवापद्यापदि असत्प्रलापमनृतं वाक्पारुष्यं च वर्जयेत् असच्छास्त्रमसत्वादम
सत्सेवाञ्च पुत्रक सायंप्रातस्तथा होमं कुर्वीत नियतात्मवान् नोदयास्तमने विद्वन्निरीक्षेद ८४
विवस्वतः केशप्रसाधनादर्शमञ्जनं धर्म्मसाधनं पूर्वाह्न एव कार्याणि देवतानाञ्च तर्पणम्

ग्रामावसथतीर्थानां क्षेत्राणां चैव वर्त्मनि न मूत्रमनुतिष्ठेत न कृष्टे न च गोव्रजे नैवेक्षेत परस्त्रियं नग्नां
न पश्येदात्मनः शकृत् उदक्यादर्शनस्पर्शौ वर्ज्यौ सम्भाषणं तथा नाप्सु मूत्रं पुरीषं वा मैथुनं वा समा
चरेत् नाधितिष्ठेच्छकृन्मूत्रकेशभस्मकपालिकाः तुषाङ्गारास्थिशीर्णानि रज्जुवस्त्रादिकानि च ना
धितिष्ठेत्तथा प्राज्ञः पथि पात्राणि वा भुवि पितृदेवमनुष्याणां भूतानाञ्च तथार्चनम् कृत्वा वि
भवतः पश्चाद्गृहस्थो भोक्तुमर्हति प्राङ्मुखोदङ्मुखो वापि स्वाचान्तो वाग्यतः शुचि भुञ्जीत चान्नं त
च्चित्तोऽन्तर्जानुः सदा नरः उपघातमृते याषान्नानुष्णो दूरयेद्बुधः प्रत्यक्षलवणं वर्ज्यमन्नमत्यु
ष्णमेव च न च गच्छन्न तिष्ठन्वै विण्मूत्रोत्सर्गमात्मवान् कुर्वीत नैव चाचामन् किञ्चिदपि भक्षयेत्
उच्छिष्टो नालपेत्किञ्चित्स्वाध्यायञ्च विवर्जयेत् पशिविज्यह्निवास्यानं खानि मूर्द्धानमेव च सम्य
गालभ्य तोयेन क्रियां कुर्वीत वै शुचिः कृत्वा निषीय वा सम्यक् परिधायाचमेद्बुधः कुर्यादाचम
नं स्पर्शं गोपृष्ठस्यार्कदर्शनम् कुर्वीतालाभनञ्चापि दक्षिणाश्रवणस्य वै यथाविभवतो ह्येत

मा०कु० तत्पूर्वोभावे ततः परम् नविद्यमाने पूर्वोक्ते उत्तर प्राप्तिरिष्यते नकुर्याद्दन्तसंघर्षं नात्मनो देहताडनं
८५ स्वप्नाध्ययनभोज्यानि सन्ध्यायाश्च विवर्जयेत् सन्ध्यायां मैथुनं चैव तथा प्रस्थापनमेव च पूर्वोक्ता
85 न्देवानां मनुष्याणां च मध्यमे तथापराह्ने कुर्वीत श्राद्धं याचितपूजनम् शिरः स्नातश्च कुर्वीत दैवं
पित्र्यमथापि च प्राङ्मुखोदङ्मुखो वापि श्मश्रुकर्म च कारयेत् व्यंगिनीं वर्जयेत्कन्यामकुलां च
तिरोगिणीम् विकृतां पिंगलां चैव वाचाटां सर्वदूषिताम् अव्यंगाङ्गीं सौम्यनाम्नीं च सर्वलक्षणलक्षि
तां तादृशीमुद्वहेत्कन्यां श्रेयस्कामो नरः सदा उद्वहेत्पितृमात्रोश्च सप्तमीं पञ्चमीं तथा रक्षेद्दारां पु०
स्त्यजेदीर्ष्यां तथाह्नि स्वप्नमैथुने परोपतापकं कर्म जन्तुपीडां च सर्वदा उदक्याः सर्ववर्णानां व ८५
र्ज्या रात्रिचतुष्टयं स्त्रीजन्मपरिहारार्थं पञ्चमीमपि वर्जयेत् ततः षष्ठ्यां व्रजेद्रात्र्यां ज्येष्ठा युग्मासु
रात्रिषु युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु विधर्मिणोऽह्नि पूर्वाह्ने सन्ध्याकाले च षण्ढ
काः क्षुरकर्मणि चान्ते च स्त्रीसम्भोगे च पुत्रकः स्नायीत चैलवान्प्राज्ञः कटभूमिमुपेत्य च देवं

वह्निजाह्नीनां साधुमंत्रिमहात्मनां गुरोः पतिव्रतानांश्च तथाय द्विजपश्विनां परिवादं न कुर्वीत परि
हासेपि पुत्रक नवश्चकीभिर्नैव्य नैवन्धुकी पतिभिस्तथा स्पाद्गोन वलिभिकोग्धोनचन्यूनैर्नैनिंदि
तैः नसर्वशङ्किभिर्न्विस्वैर्न्नृचदैवपरैर्न्वरैः धवलाम्बरसम्वीतः सितपुष्पविभूषितः सदा मंगल्यवे
शःस्यात न चामंगल्यवाग्भवेत् मोहृत्नोन्मत्तमूढैश्च नाविनीतैश्च पंडितः गच्छेन्मैत्री नचाशीलैर्चवे
श्यादिदूषितैः नचातिव्ययशीलैश्च नलुब्धैर्नापि वैरिभिः कुर्वीत साधुभिर्मैत्रीं सदाचारावलम्बिभिः
प्राज्ञैरपिशुनैः शक्तैः कर्मण्युद्योगभागिभिः सुहृद्दीक्षितभूपालस्नातकश्वशुरैः सह ऋत्विग्
द्दिगाचार्याद्यान्नर्चयेच्च गृहागतान् यथाविभवतः पुत्र प्रतिसम्वत्सरोषितान् अर्चयेन्मधुपर्केन तथ
था कालमतंत्रितः तिष्ठतश्च श्रामनेते ध्येष्ठकांमाद्विजोत्तम समगृहार्चनं कृत्वा यथास्थानम
नुक्रमात् संपूजयेत्ततो वह्निं दद्याच्चैवाहुतिं क्रमात् प्रथमां ब्रह्मणो दद्यात्प्रजानां पतये ततः तृ
तीयांचैव गृह्येभ्यः कश्यपाय तथापरां ततोऽन्वमतये दत्वा गृहे वलिं ततः पूर्वाख्यातो मयाय

मा॰कं॰ स्मिन्नित्यकर्म्मक्रियाविधौ वैश्वदेवन्ततः कुर्याद्बलयस्तत्र मे शृणु यथास्थानविभागन्तु देवानुद्दिश्य वै
९६ पृथक् पर्ज्जन्यापोधरित्रीणां दद्याद्वै मणिके त्रयं ततद्वारे विधात्रे च दद्याद्द्वाविति वै बुधः वायवे च प्र
तिदिशं दिग्भ्यः प्राच्यादितः क्रमात् ब्रह्मणे चान्तरीक्षाय सूर्याय च यथाक्रमात् विश्वेभ्यश्चैव दे
भ्यो विश्वभूतेभ्य एव च उषसे भूतपतये दद्याच्चोत्तरतस्ततः स्वधा च नम इत्युक्त्वा पितृभ्यश्चापि दक्षि
णे कृत्वापसव्यं वायव्यां यक्ष्मैतन्ने स्कचादरात् अन्नावशेषमिश्रं वै तोयं दद्याद्यथाविधिः ततो न्नाग्रं स
मुद्धृत्य हन्तकारोपकल्पितम् यथाविधि यथान्यायं ब्राह्मणायोपपादयेत् कुर्यात्कर्माणि तीर्थे
न स्वेन स्वेन यथाविधिः देवानाञ्च तथा कुर्याद्ब्राह्मणानां नमस्क्रियां अंगुष्ठोत्तरतो रेखा पाणौ याद पु॰
क्षिणास्य च एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै तर्ज्जन्यंगुष्ठयोरन्तः पैत्रं तीर्थमुदाहृतं पितृ ९६
णां तेन तोयानि दद्यान्नान्दीमुखादृते अंगुल्यग्रे तथा दैवं तेन दिव्यः क्रियाविधिः तीर्थं कनिष्ठका
मूले कायन्तेन प्रजापतेः एवमेभिः सदा तीर्थैः देवानां पितृभिः सह सदा कार्याणि कुर्वीत नान्य

तीर्थेन कर्हिचित् ब्राह्मणाचमनं शस्तं पैत्रं पौत्रेण सर्वदा दैवतीर्थेन देवानां प्राजापत्यं निजेन च
नान्दीमुखानां कुर्वीत प्राशं पिंडोदकक्रियां प्राजापत्येन तीर्थेन यच्च किञ्चित्प्रजापतेः युगपज्जल
मग्निश्च बिभृयान्न विचक्षणाः गुरुदेवान् प्रति तथा न च पादौ प्रसारयेत् नाचक्षीत धमन्तीं गां जलं ना
ञ्जलिना पिबेत् शौचकालेषु सर्वेषु गुरुष्वल्पेषु वा बुधः न विलम्बेत शौचार्थं न मुखेनानलं धमेत्
तत्र पुत्र न वस्तव्यं यत्र नास्ति चतुष्टयं ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला नदी जितभृत्यो नृपो यत्र ब
लवान्धर्मतत्परः तत्र नित्यं वसेत्प्राज्ञः कुतः सनृपतौ सुखं पौराः सुसंहता यत्र सततं न्यायवर्तिनः
यत्र मत्सरिणो लोकास्तत्र वासः सुखावहः यस्मिन् कृषीवला राष्ट्रे प्रायशो नातिभोगिनः यत्रौष
धान्यशेषाणि वसेत्तत्र विचक्षणाः तत्र पुत्र न वस्तव्यं यत्रैते त्रितयं सदा जिगीषुपूर्ववैरिश्च जनश्च
सततोत्सवः वसेन्नित्यं सुशीलेषु सहवासिषु पंडितः यत्राप्रधृष्यो नृपति यत्र सस्यप्रदा मही इत्ये
तत्कथितं वत्स मया ते हितकाम्यया अतः परं शृणुष्वेदं वर्ज्यावर्ज्यं प्रतिक्रियाम् भोज्यमन्नं पर्युषितं

मा०क० स्नेहाक्तं चिरसंभृतं सस्नेहाश्चापि गोधूमयवगोरसविक्रियाः नपश्येच्चरविं नेन्दुं नक्षत्राणि च कामतः

९७ भिन्नाशनं तथाशय्यां भाजनं च विवर्जयेत् गुरुणा समनं देवमभ्युत्थानादि सत्कृतम् अनुकूलं तथा

लापमभिवादनपूर्वकम् तथानुगमनं कुर्यात् प्रतिकूलं विवर्जयेत् नैकवस्त्रश्च भुंजीत नकुर्याद्दे

97 वतार्चनम् नचार्चयेद्द्विजानग्नौ होमं कुर्वीत बुद्धिमान् स्नायीत न नरो नग्नो नशयीत कदाचन नपा

णिभ्यामुभाभ्यां च कण्डूयेत शिरस्तथा नचाभीक्ष्णं शिरःस्नानं कार्यं निष्कारणं नरैः शिरःस्नातस्तै

लेन नांगं किंचिदपि स्पृशेत् अनध्यायेषु सर्वेषु स्वाध्यायं च विवर्जयेत् ब्राह्मणानिलगोसूर्यान् न मेहे

तकदाचन उदङ्मुखो दिवा रात्रावुत्सर्गं दक्षिणामुखः आबाधास्य यथाकामं कुर्यान्मूत्रपुरीषयोः पुं०

दुष्कृतं न गुरोर्ब्रूयात् क्रुद्धं चैव प्रसादयेत् परिवादं न शृणुयादन्येषामपि कुर्वताम् पन्थादेयो ब्रा ९७

ह्मणानां राज्ञोढः खातुरस्य च विद्याधिकस्य गर्भिण्या भारार्तस्य महीयसः मूढान्धबधिराणां च

मत्तस्योन्मत्तकस्य च पुंश्चल्याः कृतवैरस्य बालस्य पतितस्य च देवालयं चैत्यतरुं तथैव च चतुष्पथं वि

द्याधिकं गुरुञ्चैव बुधः कुर्य्यात्प्रदक्षिणं उपानद्वस्त्रमाल्यादि धृतमन्यैर्न धारयेत् उपवीतमलंका
रं करकं चैव वर्ज्जयेत् चतुर्द्दश्यां तथाष्टम्यां पञ्चदश्यां च पर्वसु तैलाभ्यंगं तथा भोगं योषितश्च वि
वर्ज्जयेत् नक्षिप्तवाहुजंघश्च प्राज्ञस्तिष्ठेत् कथञ्चन न चापि विक्षिपेत्पादौ पादं पादेन नाक्रमेत्
मर्म्माभिघातमाक्रोशं पैशुन्यञ्च विवर्ज्जयेत् दम्भाभिमानतैक्ष्णानि न कुर्वीत विचक्षणः मूर्खोन्म
त्तव्यसनि नाविरूपान्मायिनस्तथा न्यूनांगांश्चाधिकांश्चैव नोपहासेन भूषयेत् परस्य दंडं नोद्यच्छे
च्छिक्षार्थं पुत्रशिष्ययोः तद्वन्नोपविशेत्प्राज्ञः पादेनाकृष्य चासनं संयावं कृशरं मांसं नात्मार्थमु
पधारयेत् सायं प्रातश्च भोक्तव्यं कृत्वा चातिथिपूजनं प्राङ्मुखोदङ्मुखो वापि वाग्यतो दनधा
वनं कुर्वीत सततं वत्स वर्ज्जयेद्वर्ज्यवीरुधः नोदक्शिराः स्वपेज्जातु न च प्रत्यक्शिरा नरः शिर
स्यगस्त्यमाधाय स्वापीताथ पुरन्दरम् न तु गन्धवतीस्वप्सु स्नायीत न तथा निशि उपरागे परं स्ना
नमृते दिनमुदाहृतम् अपमृज्यान्न च स्नातो गात्राण्यम्बरवाशिभिः न चावधूनयेत्केशान्

मा॰ का॰ वाससी नच निर्णेजयेत् नानुलेपनमादध्यादस्नातः कर्हिचिद्बुधः नचापि रक्तवासाः स्याच्चित्रासितधरोपि
४४ वा नच कुर्याद्विपर्य्यासं वाससो नापि भूषणे वर्जयेद्विदशं वस्त्रमत्यन्तापहतञ्च यत् कीटकेशाव
पन्नञ्च क्रुसं स्वभिरवेक्षितं अवलीनावलीढञ्च सारोद्धरणाद्दूषितं पृष्ठमांसं वर्ज्यमांसं वृथामांसञ्च
पुत्रका नभक्षयीश्चन्तं प्रत्यक्षलवणानि च वर्ज्यानि चिरोषितं पुत्रशुष्कं पर्युषितञ्च यत् पिष्टशाकेक्षु
पयसां विकारास्तु पनस्यन तथा मांसविकाराश्च नैव वर्ज्याश्चिरोषिता उदयास्तमये भानोः शयन
ञ्च विवर्जयेत् नास्नातो नैव संविष्टो नचैवान्यमना नरः नचैव शयने नोर्व्यामुपविष्टो नशब्दवत्
नचैकवासा नवदन् प्रेक्षतामप्रदाय च भुञ्जीत पुरुषः स्नातः सायं प्रातर्यथाविधिः परदारा नगन्त
व्याः पुरुषेन विपश्चिता इष्टापूर्त्तायुषां हन्त्री परदारगतिर्नृणाम् नहीदृशमनायुष्यं लोके कि पु॰
ञ्चिन्नविद्यते यादृशं पुरुषस्येह परदाराभिमर्षणं देवाग्नि पितृकार्याणि तथा गुर्वभिवादनं ४४
कुर्वीत सम्यगाचम्य तद्वदन्नभुजिक्रियाम् आफलाभिरगन्धाभिरच्छिद्राभिरद्भिराचमे

त्पुत्रपुरायामि प्राङ्मुखो वाप्युदङ्मुखः अन्तर्जलादावसथाद्वल्मीकान्मूषिकास्थलात् कृतशौचावशिष्टा
वर्ज्या येत्पञ्च वै मृदः प्रक्षालयेत्स्थौ पादौ च समभ्युक्ष्य समाहितः अन्तर्जानुः सदा नोद्धे चतुर्थापि विदृपः
परिमृज्याद्भिरास्पृश्य खानि मूर्द्धानमेव च सम्पगाचम्पतोयेन क्रियाकुर्वीत वै शुचिः क्षुतेऽवलीढे वा
ने च तथा निष्ठीवनादिषु कुर्यादाचमनं स्पर्शे गोपृष्ठस्यार्कदर्शने कुर्यान्निष्ठीव्य वासश्च परिधायाच
मेद्बुधः कुर्वीतालभनं वापि दक्षिणश्रवणस्य वै यथाविभवतो ह्येतत्पूर्वाभावे ततः परम् नविद्यमाने पू
र्वोक्ते उत्तरप्राप्तिरिष्यते नकुर्याद्दन्तसंहर्षं नात्मनो देहताडनं स्वप्नाध्ययनभोज्यानि सन्ध्यायाश्च विवृ
र्जयेत् शशकः कूर्मो गोधा श्वाविन्मत्स्योथ शल्यकः भक्ष्याश्चैते तथा वर्ज्यो ग्रामसूकरकुक्कुटौ पितृदे
वादिशेषश्च श्राद्धे ब्राह्मणकाम्यया प्रोक्षितं चौषधार्थं च खादन्मांसं न दुष्यति शंखाश्मस्वर्णरूप्याणां
रज्जूनामथ वाससां शाकमूलफलानां च तथा विदलचर्मणां मणिवज्रप्रवालानां तथा मुक्ताफल
स्य च पात्राणां च मनुष्याणां अम्बुना शौचमिष्यते तृणकाष्ठौषधीनां च प्रोक्षणाच्छुद्धिरिष्यते आ

मा.क.० ८९

विकानां सभस्मानां केशानाञ्चापि मेध्यतां सिद्धार्थकानां कल्केन तिलकल्केन वा पुनः साम्बुना तान भवति
उपघातरतां सदा तथा कप्पोसिकानाञ्च विशुद्धिर्जलभस्मना दारुदन्तास्थिशृंगाणां भक्षणाच्छुद्धिरिष्य
ते पुनः पाकेन भांडानां पार्थिवानाञ्च मेध्यतां शुचिर्भैक्ष्यं कारुहस्थ पण्यं योषिन्मुखं तथा रथ्यागतमवि
ज्ञातं दासवर्गेण यत्कृतं वाकप्रशस्तं चिरातीतमनेकान्तरितं लघु अतिप्रभूतं बालस्य वृद्धातुरविचेष्टि
तं कर्म्मान्तागारशालाश्च सूतनन्धयस्तुताः स्त्रियः शुचिना श्वतर्थे वासं श्रवन्त्यो गन्धबुद्बुदाः भूमिर्विशुध्यते
कालदाह मार्ज्जनगोमधैः लेपादुल्लेखनात्सेकाद्वेश्म सन्मार्ज्जनाञ्जनात केशकीटावपन्ने च गोघ्राते मक्षि पु० ८९
कान्विते मृदम्बु भस्म वा तात प्रक्षेप्तव्यं विशुद्धये ॐदुम्बराणामम्लेन वारिणा त्रपुसीसयोः भस्माम्बुभि
श्च कांश्यानां शुद्धिः प्लावो द्रवस्य च अमेध्याक्तस्य मृत्तोयैर्गन्धापहरणेन च अन्येषाञ्चैव वर्णद्रव्येषमा
[illegible]न्धापहारतः शुचिर्गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं तथा मांसन्तु चांडालक्रव्यादैर्विनिपातितम्
रथ्यागतञ्च तैलादि तात वातात शुचि स्मृतां रजोग्निरश्वो गाच्छाया रश्मयः पवनो मही विप्रुषो मक्षि

काद्याश्वदुष्टयोगाद्दोषिताः प्रजाम्बुसुखेतेमध्ये नगौर्वत्सस्य चाननं मातुः प्रस्रवने मेध्यं शकुनिः
फलपातने श्वासनं शयनं यानं नावः पन्थास्तृणानि च सोमसूर्याग्निपवनैः शुध्यन्ते तानि पण्यवत्
रथ्यावसर्पणास्नानकृत्यानामनकर्मसु स्वाचामेत यथान्यायं वासोपि परिधाय च स्पृष्टानामसं
स्पर्शे विरथ्याकर्दमाम्भसां पंकेष्टकाचितानाञ्च मेध्यता वायुसंगमात् प्रभूतोमहतीदनादम्यस्वहृत्य
संत्यजेत् मेषस्य प्रोक्षशांकुध्योदाचाम्याभिस्तथा मृदा उपवासस्त्रिरात्रं तु दुष्टभक्ताशिनो भवेत् अन्याने
ज्ञानपूर्वेतु तद्दोषोपशमेन तु उदक्याश्वशृगालादिसूतिकान्त्यावसायिनः स्पृष्ट्वा स्नायीत शौचार्थं तथै
व मृतहारिणः नारं स्पृष्ट्वास्थिसंस्नेहं स्नातः शुध्यति मानवः आचम्यैव तु निःस्नेहं गामलभ्यार्कमेव च न
लंघयेत्तथैवासृक्ष्ठीवनोद्वर्तनानि च गृहादुच्छिष्टविण्मूत्रपादाम्भांसि क्षिपेद्बहिः पञ्चपिंडाननुद्धृ
त्य न स्नायात्परवारिणि स्नायीत देवखातेषु गंगाह्रदसरित्सु च नाद्यान्नाद्यो विकालेषु पाद्यस्तिष्ठ
न्कदाचन नालपेज्जलविट्छिष्टांवीरहीनानथास्त्रियं देवतापितृसच्छास्त्रयज्ञसन्न्यासिनिन्दकैः कृ

मा॰क॰ ९० त्यास्पर्शन मानापात्मधुध्यंते श्वावलोकनात् अवलोक्य कान्तयोदक्याम् अन्त्यजं पतितं शवम् विधर्म्मिसूति
काषण्डविवस्त्रान्त्यावसायिनः मृतनिर्यातकांश्चैव परदाररतांश्च ये एतान्देवहिकर्त्तव्यं प्राज्ञैः शोधन
मात्मनः अभोज्यसूतिकाषण्डमार्जाराखुश्वकुक्कुटान् पतितापविद्धचांडालमृतहाराश्च धर्म्मवि
त् संस्पृश्य शुद्ध्यते स्नानात् उदक्याग्रामसूकरौ तद्वच्च सूतिकाशौचदूषितौ पुरुषावपि यस्य चा
नुदिनं हानिर्गृहे नित्यस्य कर्म्मणः षड्ब्राह्मणाः सम्यक् ते किल्विषाशी न वाधमः नित्यस्य कर्म्मणो हानिं
न कुर्वीत कदाचन तस्य तु कर्म्मणो बन्धः केवलं मृतजन्मसु दशाहं ब्राह्मणाः शिष्टा दानदामविवर्जिताः
क्षत्रियाद्द्वादशाहञ्च वैश्या मासार्द्धमेव च शूद्रश्च मासमासीत निजकर्म्मविवर्जितः ततः परं निजं पु॰
कर्म्म कुर्युः सर्वे यथोदितं प्रेताय सलिलं देयं वहिर्दग्ध्वा तु गोत्रिकैः प्रथमेऽह्नि तृतीये च सप्तमे
नवमे तथा तस्यास्थिचयनं कार्यं चतुर्थेऽहनि गोत्रिकैः ऊर्ध्वं सञ्चयनात्तेषामङ्गस्पर्शो विधीय ९०
ते सोदकैस्तु क्रियाः सर्वाः कार्याः सञ्चयनात्परं स्पर्श एव सपिण्डानां मृतानां तु तथा भवेः अन्वक्षमि
च्छया शस्त्रतोयाद्बन्धनवह्निषु विषप्रपातादिमृते प्रायानाशकयोरपि वाले देशान्तरस्थे च तथा

प्रव्रजिते मृते सद्यः शौचं मनुष्ये त्वन्यस्य क्रमशौचकम् सपिंडानां सपिंडस्तु मृते न्यस्मिन्मृतो य
दि पूर्वशौचं समाप्तैस्तु कार्या तत्र दिने क्रिया एष एव विधिर्दृष्टो जन्मन्यपि हि सूतके सपिंडानां
सपिंडेषु यथावत्सोदकेषु च जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते तत्रापि यदि नान्यस्मिन्जा
ते जायेत चापरः तत्रापि शुद्धिरुद्दिष्टा पूर्वजन्मवता दिने दशद्वादशमासार्द्धमाससंख्यैर्दिनैस्त
तः स्वाः स्वाः कर्मक्रियाः कुर्युः सर्वे वर्णा यथाविधि प्रेतमुद्दिश्य कर्त्तव्यमेकोद्दिष्टमतः परम् दा
नानि चैव देयानि ब्राह्मणेभ्यो मनीषिभिः यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे तत्तद्गुणवते देयं त
देवाक्षयमिच्छता पूर्णैस्तु दिवसैः स्पृष्ट्वा सलिलं वाहनायुधं प्रतोदं दंडो च तथा सर्वे वर्णाः कृतक्रि
याः स्ववर्णधर्मनिर्दिष्टमुपादानं तथा क्रियाः कुर्युः समस्ताः शुचयः परत्रेह च भूतये त्रय्यां तथ्या
त्रयी नित्यं भवेत्तथ्या विपश्चिता धर्मार्थकामसंप्राप्त्यै परत्रेह च शोभनं ॥ ० ॥ इति मार्कंडेयपु
राणे आचाराध्यायः ॥ ० ॥ जड उवाच एवं मनुसंश्रिष्टो मात्रा संप्राप्य यौवनं ऋतध्वजसु

मा॰क॰ तस्याक्रे सम्यग्दारपरिग्रहम्‌ पुत्रानुत्पादयामास यज्ञांश्चाप्ययजत्प्रभुः पितर्युपरते कालेषु चकार राज्यानु
६१ पालनं ततः कालेन महता संप्राप्य चरमं वयः चक्रेभिषेकं पुत्रस्य तनयस्य राज्ये ऋतध्वजः भार्यायास
91 ह धर्मात्मा यियासुस्तपसे वनं अवतीर्णो महीरक्षं महाभागं महीपतिं मदालसा च तनयं प्राहे
दं पश्चिमम्वचः कामोपभोगसंसर्गप्रहाणकरं हितं मदालसोवाच यदा दुःखमसह्यं ते प्रि
यबन्धुवियोगजं शत्रुबाधोद्भवं वापि वित्तनाशात्मसंभवम्‌ संभवेत्कुर्वतो राज्यं गृहधर्मावलम्बि
नः दुःखायतनभूतो हि ममत्वालम्बनो गृही तस्मात्पुत्र विनिष्कृष्य मद्दत्तादङ्गुलीयकात्‌ वाच्यं ते
शासनं पट्टे सूक्ष्माक्षरनिवेशितम्‌ जड उवाच इत्युक्त्वा प्रददौ तस्मै सौवर्णं साङ्गुलीयकं आशि
षश्चापि या योग्याः पुरुषस्य गृहे सतः ततः कुवलयाश्वोसौ सा च देवी मदालसा पुत्राय दत्त्वा तद्रा पु॰
ज्यं तपसे काननं गतौ सोप्यलर्को यथान्यायं पुत्रवत्सुखिताः प्रजाः धर्मतः पालयामास स्वे स्वे क ६१
र्मण्यवस्थिताः दुष्टेषु दंडं शिष्टेषु सम्यक्च परिपालनम्‌ कुर्वन्परां मुदं लेभे इयाज च महाम

ते: प्रजाधृत्तस्वतातश्चास्य महाबलपराक्रमाः धर्मात्मानो महात्मानो विमार्गपरिपन्थिनः चक्रार
द्योऽर्थं धर्मेणाधर्मं मथुन वात्मवान् तयोश्च वृषिशेषेन तुर्मज्जविषयानपि एवं वक्रभिर्वर्शासित
स्य पालयतो मही धर्मार्थकामसक्तस्य जग्मुरेकमहो यथा वैराग्यं नाप्यसंजज्ञे भुञ्जतो विषयान्
प्रियान् नचाप्यलेभ भूतृत्वस्य भूभृतो धान्युपार्जने तं तथा भोगसंसर्गे प्रमत्तमजितेन्द्रियम् सुबा
होस्सुश्राव भ्राता तातस्य वनेचर तं विरोधयितु माथविरं ध्यात्वा महामतिः तद्वैरि संश्रयं तस्य श्रेयोम
न्यत भूपतेः ततः स काशिभूपालमुदीर्णबलवाहनं स्वराज्यं प्राप्तुमागच्छद्दूरशः शरणां कृती सोऽपि
च के वलोद्योगमलर्कम्प्रति पार्थिवं दूतञ्च प्रेषयामास राज्यमस्मै प्रदीयतां सोपि नेच्छत्तदादातुमा
ज्ञापूर्वं स्वकर्मणि स्थितः प्रत्युवाच च तं दूतमलर्कः काशिभूभृतः मामेवागत्य हार्द्देन याचतां राज्यमग्रजः
नाक्रान्त्यासं प्रदास्यामि भयेनाल्यामपि क्षितिम् सुबाहुरपि नो याञ्चां चकार मतिमानन्तदा नधर्मः
क्षत्रियस्यैति याच्ञा वीर्यधनोहिसः ततः समस्तसैन्येन काशिराट् परिवारितः आक्रान्तुमभ्यगाद्रा

मा.क.० छ्रमलर्कस्य महीपतेः अनन्तवेगं संक्षिप्य अभ्येत्य तदनन्तरं तेषामन्यतरैः कृत्यैः समाक्रम्यानयद्वशं आ
९२ पीडयंश्च स मामन्तान्स राष्ट्रोपरोधनैः तथा दुर्गान्तपालांश्च वृत्तैश्चाटविकान्वशे काँश्चिच्चोपप्रदानेन
९२ काँश्चिद्भेदेन पार्थिवान् सामेनान्यान्वशे निन्ये विभूताश्च स्वयं भवन् ततः सोल्पबलो राजा परचक्रावपी
डितः कोशक्षयमवाप्योच्चैः पुरश्चारुध्यतारिणा इत्थं सम्पीड्यमानस्तु क्षीणकोषो दिने दिने विषाद
मागात्परमं व्याकुलश्चाभवत्ततः अर्त्तिं स परमां प्राप्य तत्स्मार स अंगुलीयकम् यमुद्दिश्य पुरा प्राह मा
ता सास्य मदालसा ततः स्नातः शुचिर्भूत्वा वाचयित्वा द्विजोत्तमान् निष्क्रम्य शासनं तस्माद्ददर्श स स्फुट
टाक्षरम् तत्रैव लिखितं मात्रा वाचयामास पार्थिवः प्रकाशपुलकांगोसौ प्रहर्षोत्फुल्ललोचनः संग पु०
सर्वात्मना त्याज्यः स चेत्युक्तमशक्यते सद्भिः सह कर्तव्यः सतां संगो हि भेषजं कामः सर्वात्मना
हेयो हातुं चेच्छक्यते न सः मुमुक्षां प्रति तत्कार्यं सैव तस्यापि भेषजं वाचयित्वा तु बहुशो नृणां श्रेयः ९२
कथं त्विति मुमुक्षयेति निश्चित्य सा च सत्संगतो यतः ततः स साधुसंपर्कं कृच्छ्रेण यतः पृथिवीपतिः दत्ता
त्रेयं महात्मानमगच्छत्परमात्मवान् तं समेत्य महात्मानमकल्मषमनस्मितम् प्रणिपत्याभिसंपू

ज्यं यथान्यायमभाषत ब्रह्मन्कुरु प्रसादं मे श्ररशघ: शरणागतोसि मां दुःखापहारं कुरु मे दुःखान्नेस्या
प्रिकामि न: दत्ता त्रेधत्ववाच दुःखापहारमद्येव करोमि तव पार्थिव सर्वं ब्रुहि किमर्थ ते दुःखं नात्र
स्थि वीपते जडवाच इत्युक्तःचिन्तयामास स राजा तेन धीमता त्रिविधस्यापि दुःखस्य स्थानमात्मा
न मे वच सवि मृष्य चिरं राजा पुनः पुनरुदारधीः आत्मानमात्मना धीरः पृष्ट्वा स्पष्टमथाब्रवीत् मात्
स्थ्वा न सलिलं न ज्योतिरनिलो न च नाकाशं किन्तु शारीरं मने दुःसुखमिष्यते तु मातृ रिक्तं नायानि प
श्वे केस्मिन्न सुखासुखं यदि स्यान्न मर्कि तु स्यादन्यस्तोपि द्वितन्मयि निर्घ्रप्रभूतसङ्कारे न्युनाभि क्वापि
तो युते तथाच मम तात्यके विशेषो नोपलभ्यते तन्मात्रावस्थिते सूक्ष्मे दृतीयांशे च पश्यतः तथैवभूतस
द्भावं शारीरं किं सुखासुखं मनस्यवस्थितं दुःखं सुखं वा मानसञ्च यत् यतस्ततो न मे दुःखं सुखं वा न
ह्यहं मनः नाहं कायेन च मनो बुद्धिर्नाहं यतस्ततः अतः करणजं दुःखं परकं मम तत्कथं नाहं श
रीरं न मनो यतोहं पृथक्शरीरान्मनसस्तथाहं ततस्तु चेतस्यथवापि देहे सुखानि दुःखानि च कि

मां॰क॰ ९३ ममात्र राजस्य वाञ्छां कुरुते ऽप्रजा ऽस्य देहस्य चेतः पश्च भयः स राशिः गुणाश्च वृत्या मम किन्तु तत्र तथैः
सचाष्ट्व शरीरतो ऽन्यः न यस्य हस्त्यादिकमप्यशेषं मासन्न वास्तीनि शिरा विभागः कस्तस्य नागाश्वरथा
93 गकोषैः सुह्योपि सम्बन्ध दुःखानि पुंसः तस्मात्तु नैरिन्दचै भोसिद्धः स्वं न मेस्तु खं नापि पुरं न कोषः न चाश्व
नागादि बलं न तस्य नान्यस्य वा कस्यचिन्नाभयानि यथाद्य टीकुम्भकमण्डलस्थमाकाशमेकं बहुधा हि दृ
ष्टं तथा सुवाहुः स च काशिपोऽहमन्ये च देहेषु शरीरभेदैः ॥ ० ॥ इति मार्कण्डेयपुराणे ॥ ० ॥ जड उ
वाच दत्तात्रेयस्ततो विप्रं प्रणिपत्य स पार्थिवः प्रत्युवाच महात्मानं प्रश्रयावनतो नृपः सम्यक् प्रपश्य
तो ब्रह्मन्न मद्दुःखं न किंचन असम्यग्दर्शिनो मग्नाः सर्वे दैवासुखार्णवे यस्मिन्यस्मिन्ममत्वाद्धि संविबं
मः प्रजायते ततस्ततः समादाय दुःखान्येव प्रयच्छति मार्जारभक्षिते दुःखं यादृशं गृहकुक्कुटे न ता पु॰
दृङ्मता शून्ये कलविंकेऽथ मूषिके सोहं दुःखी न सुखी यतोऽहं प्रकृतेः परः यो भूतानि भवो भूते ९३
सुखदुःखात्मकोहि सः दत्तात्रेय उवाच एवमेतन्नरव्याघ्र यथैव तद्व्याहृतं त्वया ममेति मूलं दुःखस्य

ममेतिचनिर्वृतिः मत्प्रश्नादेवं ते ज्ञानमुत्पन्नमिदमुत्तमम् ममेति प्रत्ययो येन नाशितः शाल्मलितूलव
त् अहमित्यंकुरो यस्मो ममेति स्कन्धवान्महान् गृहक्षेत्रोच्चशाखश्च पुत्रदारादिपल्लवः धनधान्यमहा
पत्रो नेककालप्रवर्द्धितः पुण्यापुण्याग्रपुष्पश्च सुखदुःखमहाफलः तत्र मुक्तिपथव्यापी मूढसंपर्क
सेवच विधितसो भृंगमालाढ्यो ह्यज्ञानमहातरुः संसाराध्वपरिश्रान्ता येन छायां समाश्रिताः भ्रान्ति
ज्ञानात्सुखं धीरास्तेषामात्यन्तिकं कुतः येस्तु सत्संगपाषाणशितेनसद्धसातकः छिन्नो विद्याकुठारेण ते
गतास्तेन वर्त्मना प्राप्य ब्रह्मवनं शीतं नीरजस्कमकण्टकं प्राप्नुवन्ति परां प्राज्ञा निर्वृतिं वृत्तिवर्ज्जिताम् भू
तेन्द्रियमयं मूलं न त्वं राजन्न वाप्यहं तत्तन्मात्रमयावारां नैवारांकारणात्मकैः कं वा पश्यसि राजेन्द्र प्रधा
नमयभावयोः यतः परो हि क्षेत्रज्ञः संघातोयं गुणात्मकः मशकोडुम्बरेषीकायुञ्जमत्स्याम्भसा यथा
एकत्वेपि पृथग्भावस्तथा क्षेत्रात्मनो नृपम् अलकृतवान् भगवन्त्वत्प्रसादेन ममाविर्भूतमुत्तमम्
ज्ञानप्रधानं चिच्छक्तिविवेककरमीदृशम् किन्त्वत्र विषयाक्रान्ते स्थैर्यमेव बध्नन्न चेतसि नचापि वेश्मसु

मा॰ कु॰ च्चेयं कथं प्रकृतिबन्धनात् कथं न भूयो भूयश्च कथं निर्गुणतामियां कथञ्च ब्रह्मणैकत्वं व्रजेयं श्वाश्वतेनवै
९४ तन्मे योगन्तथा ब्रह्मन् प्रणतायाभियाचते सम्यग्बुद्धिमलर्काय प्राज्ञसत्संगोद्युपकृन्नृणां मार्कंडेपुराणे ॥
॥ ० ॥ दत्तात्रेय उवाच ज्ञानपूर्वो वियोगो योज्ञानेन सह योगिनः सा मुक्तिर्ब्रह्मणा चैक्यमनैक्यं प्राकृ
तैर्गुणैः मुक्तिर्योगात्तथा योगः सम्यक्ज्ञानान्महीपते ज्ञानं दुःखोद्भवं दुःखं ममत्वासक्तचेतसं तस्मात्सं
गं प्रयत्नेन मुमुक्षुः सन्त्यजेन्नरः संगाभावान्ममेत्यस्याः ख्यातेर्हानिः प्रजायते निर्म्ममत्वं सुखायैव वैराग्या
द्दोषदर्शनम् ज्ञानादेव च वैराग्यं ज्ञानं वैराग्यपूर्वकम् तद्गृहं यत्र वसतिस्तद्भोज्यं येन जीवति यन्मुक्त
येतदेवोक्तं ज्ञानमज्ञानमन्यथा उपभोगेन पुण्यानामपुण्यानाञ्च पार्थिव कर्त्तव्यानाञ्च नित्यानाम
कारणात्तथा असञ्चयादपूर्वस्य क्षयात्पूर्वार्जितस्य च कर्म्मणो बन्धमाप्नोति शरीरं न पुनः पुनः ९ ९४
तन्ते कथितं राजन्योगश्चैनं निबोध मे यं प्राप्य ब्रह्मणो योगी शाश्वतान्नान्यतां व्रजेत् प्रागेवात्मात्म
नाजेयो योगिनां स हि दुर्जयः कुर्वीत तज्जये यत्नं तस्योपायं शृणुष्व मे प्राणायामैर्द्दहेद्दोषान्धारणा

तिश्च किल्बिषं प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान्॥ यथा पर्वतधातूनां दोषा दह्यन्ति धम्य
तां तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात्॥ प्रथमं साधनं कुर्यात् प्राणायामस्य योगवित्॥ प्राणा
पाननिरोधस्तु प्राणायाम उदाहृतः लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः तस्य प्रमाणं वक्ष्या
मि तदलं क श्रृणु शुभे लघु द्वादशमात्रस्तु त्रिगुणः सन्तउत्तमः त्रिगुणाभिस्तु मात्राभिरुत्तमः समुदा
हृतः निमिषोन्मेषणे मात्रा तालो लघुक्षरस्तथा प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः प्रथमे
जनयेत्स्वेदं मध्यमेन तु वेपथुम्॥ विषादं हि तृतीयेन जयेद्दोषाननुक्रमात्॥ मृदुत्वं सेव्यमानास्तु सिंहशा
र्दूलकुञ्जराः यथा यान्ति तथा प्राणो वश्यो भवति योगिनः वश्यं समं यथेच्छातो वा शनैर्याति पार्थिवः त
थैव योगी स्वच्छन्दं प्राणं नयति साधितम्॥ यथा हि साधितः सिंहो मृगान्हन्ति न मानवान्॥ तस्माद्युक्तः
सदा योगी प्राणायामपरो भवेत्॥ अयं तु मुक्तिफलदं तस्यावस्था चतुष्टयं धतिः प्राप्तिस्तथा
संवित्प्रसादस्तु महीपते स्वरूपं श्रृणु चैतेषां कथ्यमानमनुक्रमात्॥ कमेशामिच्छदछानाजा

मा॰ क॰ यते फलसंक्षयः चेतसोऽपि कषायत्वं यत्र साधक्तिरुच्यते ऐहिकामुष्मिकान्कामान्लोभमोहात्म
६५ काश्रयान्‌ विरुध्यात्मेसदा योगी प्राप्तिः सा सार्वकामिकी अतीतानागतानर्थान्विप्रकृष्टतिरोहितान्‌
95 विजानातीन्दुसूर्य्यर्क्षग्रहाणां ज्ञानसम्पदा तुल्यप्रभावस्तु यदा योगी प्राप्नोति सम्विदम्‌ तथा सम्वि
द्दिकं स्यात्तत्प्राणायामस्य सा स्थितिः यान्ति प्रसादं येनास्य मनः पञ्च च वायवः इन्द्रियाणां क्रियायाश्च
स प्रसादस्तु निस्मृतः शृणुष्व च महीपाल प्राणायामस्य लक्षणं युञ्जतश्च सदा योगं यादृग्विहितमासनम्‌
पद्ममर्द्धासनं चापि तथा स्वस्तिकमासनं आस्थाय योगी युञ्जीत कृत्वा च प्रणवं हृदि समः समासनो
भूत्वा संहृत्य चरणावुभौ संवृतास्यस्तथैवोरू सम्यग्विष्टभ्य चाग्रतः पार्ष्णिभ्यां लिंगवृषणावस्पृ पु॰
शन्‌ प्रयतः स्थितः किञ्चिदुन्नामितशिरा दन्तैर्दन्तान संस्पृशन्‌ संपश्यन्नासिकाग्रं स्वं दिशश्चानव ६५
लोकयन्‌ रजसा तमसो वृत्तिं सत्वेन रजसस्तथा संछाद्य विमले तत्वे स्थितो युञ्जीत योगवित्‌ इन्द्रि
याणीन्द्रियार्थेभ्यः प्राणादीन्मन एव च निगृह्य समवायेन प्रत्याहारमुपक्रमेत्‌ यस्तु प्रत्याह

रोकाभासं सर्वांगानीव कूर्मस्तथा: सत्वात्मरतिवेकस्थ: पश्यत्यात्मानमात्मनि: सबाह्याभ्यंतरं शौचं नि
ष्पाद्याकंठनाभित: पूरयित्वा बुधो देहं प्रत्याहारमुपक्रमेत् प्राणायामा दश द्वौ च धारणाभि
धीयते द्वे धारणे स्मृते योगो योगिभिस्तत्वदर्शिभि: तथा वै योगयुक्तस्य योगिनो नियतात्मन: सर्वे
दोषा: प्रणश्यन्ति स्वस्थश्चैवोपजायते वीक्षते च परं ब्रह्म प्राकृतांश्च गुणान्पृथक् व्योमादि परमा
णश्च तथात्मानमकल्मषं इत्थं योगी यताहार: प्राणायामपरायण: जितां जितां शनैर्भूमिमारु
हेत यथा गृहं मृदोषान्व्याधींस्तथा मोहमाक्रान्ताभूरनिर्जिता विवर्द्धयति तान्दोषांस्तस्माद्भूमिम
निर्जितां प्राणानामुपसंरोधः प्राणायाम इति स्मृत: धारणेत्युच्यते चेयं यन्मनो धार्यते तया शब्दा
दिभ्य: प्रवृत्तानि यदक्षाणि यतात्मभि: प्रत्याक्रियन्ते योगेन प्रत्याहारस्तत: स्मृत: उपायश्चात्र कथि
तो योगिभि: परमर्षिभि: येन व्याध्यादयो दोषा न जायन्ते हि योगिन: यथा तोयार्थिनस्तोयं यंत्रनाला
दिभि: शनै: आपिबेच्च यथा वायुं पिबेद्योगी जितश्रम: प्राङ्नाभ्यां हृदये चात्र तृतीये च तथोरसि

मां॰ कं॰ कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु किञ्चित्तस्मात्परस्मिंश्च धारणाः परमाः स्मृताः दशैता धारणाः
९६ प्राप्य प्राप्नोत्यक्षरसाम्यतां नाध्मातः क्षुधितः श्रान्तो न च व्याकुलचेतसः युञ्जीत योगं राजेन्द्र योगी सि
96 द्ध्यर्थमात्मनः नातिशीते न चोष्णे वै द्वन्द्वे नात्यनिलात्मके कालेनतेषु युञ्जीत न योगं ध्यानतत्परः स
शब्दाग्निजलाभ्यासे जीर्णगोष्ठे चतुष्पथे शुष्कपर्णचये नद्यां श्मशाने ससरीसृपे सभये कूपतीरे वा
चैत्यवल्मीकसञ्चये देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर्जयेत् सत्त्वस्यानुपपत्तौ च देशकालं विव
र्जयेत् नासतो दर्शनं योगे तस्मात्तत्परिवर्जयेत् देशानेतान नादृत्य मूढत्वाद्यो युनक्ति वै विघ्नाय त
स्य ये दोषा जायन्ते तान्निबोध मे बाधिर्यं जलता लोपः स्मृतेर्मूकत्वमन्धता ज्वरश्च जायते सद्यस्त पु॰
दज्ञानयोगिनः प्रमादाद्योगिनो दोषा यद्येते स्युः चिकित्सितम् तेषां नाशाय कर्त्तव्यं योगि ९६
नां तन्निबोध मे स्निग्धां यवागूमत्युष्णां भुक्त्वा तत्रैव धारयेत् वातगुल्मप्रशान्त्यर्थं मुदावर्त्ते त
थोदरे यवागूं वापि पवनं वायुग्रन्थिं प्रतिक्षिपेत् तद्वत्कम्पे महाशैलं स्थिरं मनसि धारयेत्

विघाते वचसो वाचि वाधिर्य्ये श्रवणेन्द्रिये तथैवाम्रफलं ध्याये तृष्णार्त्तो रसनेन्द्रिये यस्मिन्यस्मि
न्रुजादेशे तस्मिंस्तदुपकारिणाम् धारयेद्धारणामुष्णे शीतां शीते विदाहिनीम् कीलं शिरसि संस्था
प्य काष्ठं काष्ठेन ताडयेत् लुप्तः स्मृतेः स्मृतिः सद्यो योगिनस्तेन जायते द्यावापृथिव्यौ वाय्वग्नी व्यापि
नावभिधारयेत् अमनुष्यात्सत्वजाताद्वाधास्वेतासु चिकित्सितं अमानुषं सत्वमजा योगिनं प्रवि
शेद्यदि वाय्वग्निधारणाद्देनं देहसंस्थं विनिर्द्दहेत् एवं सर्वात्मना कार्य्या रक्षा योगविदा नृप धर्म्मार्थ
काममोक्षाणां शरीरं साधनं यतः प्रवृत्तिलक्षणाख्यानाद्योगिनो विस्मयात्तथा विज्ञानं विनयं याति
तस्माद्गोप्याः प्रवृत्तयः आलोल्यमारोग्यमनिष्ठुरत्वं गन्धः शुभो मूत्रपुरीषमल्पं कान्तिः प्रसादः स्वर
सौम्यता च योगप्रवृत्तेः प्रथमं हि चिह्नं अनुरागं जनो याति परोक्षे गुणकीर्त्तनम् न बिभ्यति च सत्
त्वानि सिद्धेर्लक्षणमुत्तमं शीतोष्णादिभिरत्युग्रैर्यस्य बाधा न विद्यते न भीतिमेति चान्येभ्यस्तस्य
सिद्धिरुपस्थिता ॥ ० ॥ इति मार्कण्डेयपुराणे ॥ ० ॥ दत्तात्रेय उवाच उपसर्गाः प्रवर्त्त
न्ते दृष्टे ह्यात्मनि योगिनः ये तांस्ते संप्रवक्ष्यामि समासेन निबोध मे काम्याः क्रियास्तथा काममानु

मां०क० षानभिवाञ्छति स्त्रियो दानफलं विद्यान्मायाविद्याधनादिकम् देवत्वममरेशत्वं रसायनचयक्रियाः मरु
९० प्रपातनं यज्ञं जलाग्न्यावेशनं तथा श्राद्धानां सर्वदानानां फलानि नियमस्तथा तथोपवासात् पूर्त्ताच्च
९७ देवताभ्यर्चनादपि तेभ्यस्तेभ्यः स्वकर्मभ्य उपसृष्टोभिवाञ्छति चित्तमित्थं प्रवर्त्तन्तं यत्नाद्योगी निवर्त्त
येत् ब्रह्मसंगि मनः कुर्वन्नुपसर्गात् प्रवर्त्तते उपसर्गैर्जितैरेभिरुपसर्गास्ततः पुनः योगिनः संप्रव
र्त्तन्ते सात्त्वराजसतामसाः प्रातिभः श्रावणो दैवो भ्रमावर्त्तौ तथापरौ पञ्चैते योगिनां योगविघ्नाय कटुको
दयाः वेदार्थाः काव्यशास्त्रार्था विद्याशिल्पान्यशेषतः प्रतिभान्ति यदस्येति प्रातिभः स तु योगिनः शब्दा
र्थानखिलान् वेत्ति शब्दं गृह्णाति चैव यत् योजनानां सहस्रेभ्यः श्रावणः सोभिधीयते समन्तादीक्षते चा
ष्टौ स यदा देवयोनयः उपसर्गन्तमप्याहुर्दैवमुन्मत्तवद्बुधाः भ्राम्यते यन्निरालम्बं मनोदोषेण यो पु०
गिनः समस्ताचारविभ्रंशाद्भ्रमः स परिकीर्त्तितः आवर्त्त इव तोयस्य ज्ञानावर्त्तो यदाकुलः चित्तं नाश ९०
यते वर्त्त उपसर्गः स उच्यते एते नाशितयोगास्तु सकला देवयोनयः उपसर्गैर्महाघोरैरावर्त्तन्ते
पुनः पुनः प्रावृत्य कम्बलं शुक्लं योगी तस्मान्मनोमयं चिन्तयेत्परमं ब्रह्म कृत्वा तत्प्रवणं मनः यो

गयुक्तः सदा योगी लघ्वाहारो जितेन्द्रियः सूक्ष्मास्तु धारणा सप्त भूराद्या मूर्द्धि धारयेत् धरित्रीं धारयेद्योगी
तत्सौख्यं प्रतिपद्यते आत्मानं मन्यते चोर्वीं तद्गन्धञ्च जहाति सः तथैवाप्सु रसं सूक्ष्मं तद्वद्रूपञ्च तेजसि स्पर्शं
वायौ तथा तद्वद्बिभ्रतस्तस्य धारणां व्योम्नः सूक्ष्मां प्रवृत्तिञ्च शब्दं तद्वज्जहाति च मनसा सर्वभूतानां मन आवि
शते यदा मानसीं धारणां बिभ्रन्मनः सौक्ष्म्यञ्च जायते तद्वद्बुद्धिमशेषाणां सत्वानां नित्य योगवित् परित्य
जति संप्राप्य बुद्धिसौख्यमनुत्तमं परित्यजति सूक्ष्माणि सप्तैतानि योगवित् सम्यक्ज्ञानाति योऽलर्क
तस्य वृत्तिर्न विद्यते एतासां धारणानां सप्तानां सौक्ष्ममात्मवान्दृष्ट्वा दृष्ट्वा ततः सिद्धिं त्यक्त्वा त्यक्त्वा परं
व्रजेत् यस्मिन यस्मिंश्च कुरुते भूते रागं महीपते तस्मिंस्तस्मिंस्तदाशक्तिं संप्राप्य सविनश्यति तस्माद्वि
त्वा सूक्ष्माणि संसक्तानि परस्परम् परित्यजति यो देही सपरं प्राप्नुयात्पदम् एतान्येव तु संधाय सप्त सूक्ष्मा
णि पार्थिव भूतादीनां विरागोत्र सप्तसूक्ष्मस्य मुक्तये गन्धादिषु समासक्तमित्येतदखिलं जगत् पुनरावर्त्त
ते भूप सब्रह्मामरमानुषं सप्तैता धारणा योगी समतीत्य यदिच्छति तस्मिंस्तस्मिंल्लयं सूक्ष्मे याति भूते नरेश्वर
देवानामसुराणां वा गन्धर्वोरगराक्षसां देहेषु लयमाप्नोति सङ्गं नाप्नोति च क्वचित् अणिमा लघिमा चै

व महिमा प्राप्तिरेव च प्राकाम्यं च तथेशित्वं वशित्वं च तथा परम्। यत्र कामावशायित्वं गुणानेतांस्तथेश्वरान्। प्रा
प्नोत्यष्टौ नरव्याघ्र परं निर्वाणसूचकान्। सूक्ष्मात्सूक्ष्मतरोऽणिमा शीघ्रत्वाल्लघिमा गुणः। महिमाशेष
पूज्यत्वात्प्राप्तिर्नाप्राप्यमस्य यत्। प्राकाम्यमस्य व्यापित्वादीशत्वं चेश्वरो यतः। वशित्वाद्वशिता नाम योगि
नः सप्तमो गुणः। यत्रेच्छास्थानमप्युक्तं यत्र कामावसायिता ऐश्वर्यकारणैरेभिर्योगिनः प्रोक्तमष्टधा
मुक्तिसंसूचकं भूप परं निर्वाणमात्मनः। ततो न जायते नैव वर्द्धते न विनश्यति नातिक्षयमवाप्नोति परि
णामं च गच्छति छेदं क्लेदं तथा दाहं शोषं भूरादितो न च भूतवर्गादवाप्नोति शब्दाद्यैः क्रियते न च न चास्य
सन्ति शब्दाद्यास्तद्भोक्ता तैर्न युज्यते यथा हि कनकं खंडमपद्रव्यवदग्निना दग्धदोषं द्वितीयेन खंडेनैक्यं
व्रजेन्नृप न विशेषमवाप्नोति तद्वद्योगाग्निना यतिः। निर्दग्धदोषस्तेनैक्यं प्रयाति ब्रह्मणा सह यथा
ग्निरग्नौ संक्षिप्तः समानत्वमनुव्रजेत् तदाख्यस्तन्मयो भूत्वा भावं न गृह्येत विशेषतः। परेण ब्रह्मणा त
द्वत्प्राप्यैक्यं दग्धकिल्बिषः। योगी याति पृथग्भावं न कदाचिन्महीपते यथा जलं जले नैक्यं निक्षिप्तमुपग

ष्यति तथात्मात्मानमभ्येति योगिनः परमात्मनि॥ ० ॥ इति मार्कंडेयपुराणे॥ अलर्क उवाच
भगवन् योगिनश्चर्यां श्रोतुमिच्छामि तत्वतः ब्रह्मवर्त्मन्यनुसरन्येन योगी न सीदति दत्तात्रेय उवाच
मानापमानो यावेतो प्रीत्युद्वेगकरो नृणां॥ तावेव विपरीतार्थौ योगिनः सिद्धिकारको मानापमानो
यावेतो तावेवाहुर्विषामृते अपमानो मृतं तत्र मानस्तु विषमं विषं चक्षूपूतं न्यसेत्पादं वस्त्रपूतं पिवेज्ज
लं सत्यपूतां वदेद्वाणीं बुद्धिपूतं च चिंतयेत् आतिथ्यश्राद्धयज्ञेषु देवयात्रोत्सवेषु च महाजनेषु सिद्ध्य
र्थं न गच्छेद्योगवित्क्वचित् व्यस्ते विधूमे व्यंगारे सर्वस्मिन्भुक्तवज्जने अटेत योगविद्भैक्षं न तु त्रिष्वेव नित्य
शः यथैवमवमन्यंते जनाः परिभवंति च तथा युक्तश्चरेद्योगी सतां वर्त्म न दूषयेत् भैक्षं चरेद्गृहस्थेषु
यायावरगृहेषु च श्रेष्ठा तु प्रथमा चेति वृत्तिरस्योपदिश्यते अथ नित्यं गृहस्थेषु शालीनेषु चरेद्यतिः
श्रद्दधानेषु दांतेषु श्रोत्रियेषु महात्मसु अत ऊर्ध्वं पुनश्चापि अदुष्टपतितेषु च भैक्ष्यचर्या विवर्णे
षु जघन्या वृत्तिरिष्यते भैक्ष्यं यवागूं भक्तं वा पयो यावकमेव वा फलं मूलं विपक्वं वा कणपिण्याक
शक्तवः इत्येते वै शुभाहारा योगिनः सिद्धिकारकाः तत्प्रयुंज्यान्मुनिर्भुक्त्या परमेन समाधिना अपः पू

मां.क.० ९९ वैसकृद्योग्यं तद्धी भूत्वा समाहितः। प्राणायेति ततस्तस्य प्रथमाद्याहुतिः स्मृता। अपानाय द्वितीया
तु समानायेति चापरा उदानाय चतुर्थी स्याद्व्यानायेति च पञ्चमी प्राणायामैः पृथक्कृत्वा शेषं भुञ्जीत
कामतः। अपः सकृत्पुनः प्राश्य आचम्य हृदयं स्पृशेत्। अस्तेयं ब्रह्मचर्यं च त्यागो लोभस्तथैव च व्र
तानि पञ्च भिक्षूणामहिंसापरमाणि वै। अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवं। नित्यस्वाध्याय
इत्येते नियमाः पञ्च कीर्तिताः। सारभूतमुपासीत ज्ञानं यत्कार्यसाधकं ज्ञानानां बहुता येयं योगविघ्नक
री हि सा इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत्। अपि कल्पसहस्रेषु नैव ज्ञेयमवाप्नुयात्। त्यक्तसं
गो जितक्रोधो लघ्वाहारो जितेन्द्रियः। पिधाय बुद्ध्या द्वाराणि मनो ध्याने निवेशयेत्। शून्येष्वेवावकाशे
षु गुहासु च वनेषु च नित्ययुक्तः सदा योगी ध्यानं सम्यगुपक्रमेत्। वाग्दण्डः कर्मदण्डश्च मानसदण्ड पु० ९९
श्चैते त्रयः। यस्यैते नियता दण्डाः स त्रिदण्डी महायतिः। ज्ञानं परं शाश्वतमव्ययं च परं हि गत्वा न पुनः।
प्रजायते वेदाः। श्रेष्ठाः। सर्वयज्ञक्रियासु यज्ञाज्जप्यं ज्ञानमार्गश्च जप्यात्। ज्ञानाद्ध्यानं संगरागव्यपेतं

तस्मिन्प्राप्ते शाश्वतस्योपलब्धिः समाहितो ब्रह्मपरोप्रमादी शुचिः तथैकान्तरतिर्जितेन्द्रियः समा
प्नुयाद्योगमिमंमहात्माविमुक्तिमाप्नोतिततःस्वयोगतः ॥ ० ॥इतिमार्कंडेयपुराणे ॥ ० ॥दत्तात्रे
यउवाच एवंयोवर्त्ततेयोगीसम्यग्योगव्यवस्थितः नसव्यावर्त्तयितुंशक्योजन्मान्तरशतैरपि दृष्ट्वाच
परमात्मानंप्रत्यक्षंविश्वरूपिणम् विश्वपादशिरोग्रीवंविश्वेशंविश्वभावनं तत्प्राप्तयेमहत्पुण्यमोमित्ये
काक्षरंजपेत् तदेवाध्ययनंतस्यस्वरूपंशृणुतःपरम् अकारश्चतथोकारोमकारश्चाक्षरत्रयं एताएव
त्रयोमात्राःसत्वराजसतामसाः निर्गुणायोगिगम्याचार्द्धमात्रात्रसंस्थिता गान्धारीतिचविज्ञेया
गान्धारस्वरसंश्रया पिपीलिकागतिस्पर्शाप्रयुक्तामूर्द्ध्निलक्ष्यते यथाप्रयुक्तॐकारःप्रतिनिर्यातिमू
र्द्धनि तथोंकारमयोयोगीत्वक्षरेत्वक्षरोभवेत् प्राणोधनुःशरश्चात्माब्रह्मवेध्यमुदाहृतं अप्रमत्ते
नवेद्धव्यंशरवत्तन्मयोभवेत् ॐमित्येतत्त्रयोवेदास्त्रयोलोकास्त्रयोग्नयः विष्णुर्ब्रह्माहरश्चैवऋक्
सामानियजूंषिच मात्राश्चार्द्धंचतस्रश्चविज्ञेयापरमार्थतः तत्रयुक्तस्तुयोयोगीसतल्लयमवाप्नुयात्

मा०क० अकारस्त्वथ भूर्ल्लोक उकारश्चोच्यते भुवः सव्यञ्जनो मकारश्च स्वर्ल्लोकः परिकथ्यते व्यक्तातु प्रथमा मा-
१०० त्रा द्वितीयाव्यक्तसंज्ञिता मात्रा तृतीया चिच्छक्तिरर्द्धमात्रा परं पदम् अनेनैव क्रमेणैता विज्ञेया योगभू-
100 मयः ओमित्युच्चारणात्सर्वं गृहीतं सदसद्भवेत् ह्रस्वा तु प्रथमा मात्रा द्वितीया दैर्घ्यसंयुता तृतीया च प्लु-
ताद्धाख्या वचसः शानगोचरे इत्येतदक्षरं ब्रह्म परमोङ्कारसंज्ञितं यस्तु वेद नरः सम्यक्तथा ध्यायति
वा पुनः संसारचक्रमुत्सृज्य त्यक्तत्रिविधबन्धनः प्राप्नोति ब्रह्मनिलयं परमे परमात्मनि अक्षीण
कर्म्मबन्धश्च ज्ञात्वा मृत्युमरिष्टतः उत्क्रान्तिकाले संस्मृत्य पुनर्योगित्वमृच्छति तस्मादसिद्धयोगेनासि-
द्धयोगेन वा पुनः ज्ञेयान्यरिष्टानि सदा येनोत्क्रान्तौ न सीदति ॥ ० ॥ इति मार्कण्डेयपुराणे ॥ पु०
॥ ० ॥ दत्तात्रेय उवाच अरिष्टानि महाराज शृणु वक्ष्यामि तानि ते येषामालोकनान्मृत्युं निजं जा- १००
नाति योगवित् देवमार्गं ध्रुवं शुक्रं सोमच्छायामरुन्धतीं यो न पश्येत्स जीवेत्स नरः संवत्सरात्परम्
अरश्मिबिम्बं सूर्यस्य वह्निं चैवांशुमालिनं दृष्ट्वैकादशमासात्तु नरो नोर्द्ध्वं स जीवति वान्यामू-

त्रपुरीषं यस्तु वसोरजतं तथा प्रत्यक्षमथवा स्वप्ने जीवितं दशमासिकं दृष्ट्वा प्रेतपिशाचादीन् गन्ध
र्वनगराणि च सुवर्णवृक्षान्दृष्ट्वा स नव मासान्स जीवति स्थूलः कृशः कृशः स्थूलो यो ऽकस्माद्विजायते
णाः इत्युक्तेप्रणिपात्यांघ्रे रूपचारैःप्रसादितः समामाहपुनर्विप्रस्ततःक्षणान्मृदुमानसः यन्म पु॰
योक्तमवश्यंतद्भाविगन्धर्वनान्यथा किन्तुत्वंराक्षसोभूत्वापुनःस्वंप्राप्स्यसेवपुः नष्टस्मृतिर्यदा
क्रुद्धःस्वमपत्यंचिखादिषुः निशाचरत्वंगन्तासितदास्त्रानलतापितः पुनःसंज्ञामवाप्यस्वाम १४९
वाप्स्यसिनिजंवपुः तथैवस्वमधिष्ठानंलोकेगन्धर्वसंज्ञिते सोहंत्वयामहाभागमोक्षितोऽस्मात्सु
दारुणात् निशाचरत्वाद्युद्धेरितेनमेपाथनांकुरु इमानेतनयांस्वार्थी प्रयच्छामिप्रतीच्छतां

आयुर्वेदञ्च सकलस्त्वष्टांगो ग्राम्ययात्ततः मुनेः सकाशात्सम्प्राप्तस्तद्वृन्दी शुभमहामते ॥ मार्कण्डेयपु
पुराणे ॥ ० ॥ मार्कण्डेय उवाच इत्युक्त्वा प्रददौ विद्यां सन्नन्दिव्यात्महोज्ज्वलः अश्रुघ्नावर्षं दियं पौ
राणां वपुराश्रितः दत्वा विद्यान्ततः कन्यां सत्रमुपचक्रमे नमार्ष्ट सा सदा कन्या जनितानां स्वरूपिणां
अनुरागो मयाप्यत्र तत्तोत्तीर्य महामुनि दृष्टं न दैव संजातो विशेषेणोपकारिणि किन्तु मे सा सखी
मात्र मत्कृते दुःखपीडिता अतो नाभिलषितो गोग्राऽकुमेतेन वैसमं पुरुषैरपि नाश क्या कर्तुमित्थं
नृशंसता स्वभावकठिने मां हृकथं योषित्करिष्यति साहं यथा तेद्दुःखान्तौ मत्कृते कन्यके पितः
तथास्या स्यामि तेद्दुःखं स्वमहानव तापिता स्वशोचिरुवाच आयुर्वेदप्रसादेन ते करिष्ये पुनर्वरं
सखी तव महाशोकं समुत्सृज स्वमध्यमे मार्कण्डेय उवाच ततः पित्रा स्वयं दत्तां तां कन्यां सुविधान
तः उपयेमे गिरौ तस्मिन्न स्वशोचिश्चारुलोचनां दत्वा ततोनन्दा कन्यामभिश्यान्त्यच भाविनी जगा
म दिव्यया गत्या गन्धर्वैः स्वपुरन्ततः सचापि सहितस्तन्या तद्विज्ञातुं तदा धर्यो कन्यकायुगलं तत्र

मां०क० तच्छापोत्थेगदात्तरं ततस्तांयो:स ततत्वमोरोगघ्नैरोषधीरसैः चकारनीरुजांदेहेस्वरोचिरपराजितः
१५० ततोभिशोभनेकन्येविमुक्तेव्याधिनाशुभे स्वकान्त्यादितितद्भासंचकारातेनमहीधरम् ॥ ० ॥ इ
150 तिमार्कण्डेयपुराणे ॥ ०॥ मार्कण्डेयउवाच एवंविमुक्तरोगातुकन्यकातंमुदान्विता स्वरोचि
षमुवाचेदंशृणुष्ववचनंप्रभो: मन्दारविद्याधरजानाम्नास्यामनाविभावरी उपकारिणस्तुमात्मा
नंप्रयच्छामिप्रतीच्छमा विद्यांत्वंतुभ्यंदास्यामिसर्वभूतरुतानिते यथाभिव्यक्तिमेष्यन्तिप्रसादस्य
वणोभव मार्कण्डेयउवाच एवमस्त्वितितेनोक्ताधर्मज्ञेनस्वरोचिषा द्वितीयासातदाकन्याइदं
वचनमब्रवीत् कुमारब्रह्मचर्यासीत्पारेनामपितामम ब्रह्मर्षिःस्वमहातेजावेदवेदांगपार पु०
गः तस्यपुंस्कोकिलालापरमेणीयेमधौपुरा आजगामाप्सराभ्यासंप्रख्यातापुञ्जिकस्थला का १५०
मवक्रुध्यतान्वीत:सतयामुनिपुंगवः ततःसंयोगेहमुत्पन्नातस्याःमेत्रमहाचले विहायसगतःमा
तामामस्मिन्विजनेवने वालामेकांमहीपृष्ठेव्यालश्वापदसंकुले ततःकलाभिःसोमस्यवर्द्धन्तीमि

रहः स्वपं आप्याज्य मामाह रक्षो वृद्धिं याताऽस्मि सत्तम ततः कलावती येन मम नाम महात्मना गृही
ताया कृतं पित्रा गन्धर्वेण शुभात्मना न दत्ताऽहं तदा पित्रा याचितेन शुभात्मना देवारिणा निशासु
प्तस्ततो मे घातितः पिता ततोऽहं मतिनिर्वेदाद्धात्मव्यापादने धृता निवारिता शम्भुपत्न्या सत्या स
त्यप्रतिव्रत माशुचः शुभ्रु भर्त्ता ते महाभागो भविष्यति सुरोचिर्नाम पुत्रश्च मनुस्तव भविष्यति आ
ज्ञा च निधयः सर्वे करिष्यन्ति तवाऽऽहता यथाभिलषितं वित्तं प्रदास्यन्ति च ते शुभे यस्या वरप्रभावेन
विद्यायास्त्वां गृह्णाण मे पद्मिनी नाम विद्येयं महापद्माभिपूजिता इत्याह मां दक्षसुता सती सत्याऽत
मा तथा सुरोचिस्त्वं ध्रुवं देवा नान्यथा साभविष्यति साऽहं प्राणप्रदायाद्य तां विद्यां त्वं तथा वपुः प्र
यच्छामि प्रतीच्छ त्वं प्रसादसुमुखो भव मार्कण्डेय उवाच एवमस्त्विति तामाह सत्त कन्यां कलाव
तीं विभावर्या सुरभ्याच स्निग्धदृष्ट्यानुमोदितः अग्राहयत्ततः पाणीं सत योरमितं ष्टुतिं नदात्म
देवभूर्येषु नृत्यन्ती स्वप्सरः शुच ॥ ० ॥ इति मार्कण्डेयपुराणे स्वारोचिष मन्वन्तरे ॥ ० ॥ मार्कं

मा.क. ण्डेय उवाच ततः स ताभिः सहितः पत्नीभिरमितद्युतिः रराम तस्मिन् शैलेन्द्रे रम्यकाननिर्झरे सर्वोपभो
१५१ गरत्नानि भूतिः मधुराणि च निधयः समुपाजह्रुः पद्मिन्या वशवर्त्तिनः स्रजो वस्त्राण्यलंकारानग
15-1 न्धाध्यमनुलेपनं आसनान्यतिशुभ्राणि काञ्चनानि यथेच्छया सौवर्णानि महाभाग करकान्ना
जनानि च तथा शय्याश्च विविधैर्दिव्यैर्वास्तरणैर्युताः एवं स ताभिः सहितो दिव्यगन्धाधिवासिते
रराम स्वरुचिर्भाभिर्भासिते वरपर्वते ताश्चापि सहते नेति लेभिरे मुदमुत्तमां रममाणा यथा स्वर्गे
तथा तत्र शिलोच्चये अथ हंसी जगादैका चक्रवाकीं जले सतीं तस्य ताश्च ललिते समन्वेच स्पृहा
वती धन्योऽयमतिपुण्योऽयं योयं यो वनगोचरः दयिताः सहितो भाति भुंक्ते भोगानभीप्सितान् म पु०
नियो वनिनः श्लाघ्यास्तत्पत्न्यो नातिशोभनाः जगत्या मल्लिकापत्न्यः पतयश्चातिशोभनाः अ १५१
भीष्टाः कस्यचित्कान्ता कान्तः कस्याश्चिदीप्सितः परस्परानुरागाढ्यं दाम्पत्यमतिदुर्लभं धन्यो
यं दयिताभीष्टो दयिताश्चातिवल्लभाः परस्परानुरागो हि धन्यानामेव जायते एतन्निशम्य

वचनं कलहंस्यास्समीरितं उवाच चक्रवाकी तान्नातिविस्मितमानसा नायं धन्यो यतो लज्जा नान्यस्त्री
सन्निकर्षितः अन्यां स्त्रियमयं यदा भुंक्ते न सर्वोस्वस्यमानसं चित्तानुराग एकस्मिन्नधिष्ठाने यतः सखि
ततो हि प्रीतिमानेष भार्यासु भविता कथं एतानदयिता पत्युर्नैतासां दयितः पतिः विनोदमात्रमेवै
ता यथा परिजनोऽपरः एतास्माश्च यदीष्टोऽयं तत्किं प्राणान्मुमुक्षति आलिंगत्यपरां कान्ताध्यानाद्वेका
ततोऽन्यया विद्याप्रदानमूल्येन क्रीतो ह्येता स्वभृत्यवत् प्रवर्तितेन हि प्रेमसंबद्धीषु तिष्ठति क
लहंसि पतिर्धन्यो मम धन्योऽहं मे वच यस्यैकस्यां क्षितिरं चित्तं यस्यांश्चैकत्र संस्थिति मार्कंडेय उवाच स
वे सत्वरुतं सोसौ सुरोचिरपराजितः निशम्य लज्जितो दध्यौ सत्यमेव हि नानृतम् ततो वर्षशते जाते र
म भार्यो महागिरौ रममाणः समन्ताभिर्द्ददर्श पुरतो मृगम् सुस्निग्धपीनावयवं मृगीहृदयहारि
र्यां वासिताभिः स्वरूपाभिर्मृगीभिः परिवारितम् आहृष्टप्राणपुटकाजिघ्रन्तीमास्तमो मृगीः उवा
च च मृगो लम्बो लज्जा त्यागेन गम्यतां नाहं सुरोचि सत्शीलो न वै वाहं सुलोचनाः निर्लज्जा वदव

मा॰क॰ सन्निताद्दृशास्तत्र गछ्छतः। एकाह्नेकानुगता यथाह्यासास्पदं जने अनेकाभिस्तथैवैको भोग्यदृष्टि
१५२ निरीक्षितः। अस्य धर्मक्रियाहानिरहन्यहनि जायते दत्तोर्थे भार्य्या याचास्य कामासक्तस्तथा परः य
152 स्मादृशोन्यस्तच्छीलः परलोकपराङ्मुखः तंकामयत भद्रं वो नाहं तुल्यः स्वरोचिषा मार्कंडेय उवाच
एवं निरस्यमानास्ताहरिःशीन मृगांगना कृत्वा स्वरोचिरात्मानं मेने स पतितं तथा त्यागे च कारस
मनस्तासांश्च मुनिसत्तम चक्रवाकी मृगप्रोक्तावि वचारसुजुगुप्सितः स रेमेत्मताभिर्भूयश्च वर्द्धमा
नमनोभव आक्षिप्तनिर्वेदकथो रेमे वर्षशतानि षट् किन्तु धर्माविरोधेन कुर्वन्धर्माश्रिताः क्रियाः
बुभुजे स्वरोचिर्विषयान्सह ताभिरुदारधीः ततः स्वजज्ञिरे तस्य त्रयः पुत्राः स्वरोचिषः विजयो मे पु॰
रुनन्दश्च प्रभासश्च महाबलः मनोरमायां विजयं सुषुवे रेन्दीवरात्मजा विभावरी मेरुनन्दं प्रभास १५२
श्च कलावती पद्मिनी नाम या विद्या सर्वभोगोपदायिका सर्वेषां तत्प्रभावेन पिता चक्रे पुरत्रयम् प्रा
च्यां तु विजयं नाम कामरूपे नगोत्तमे विजयाय सुतायादौ स ददौ पुरमुत्तमम् उदीच्यां मेरुन

न्दस्य पुरीं नन्दवतीमिति ख्याताञ्च कारप्रोत्तुंगवप्रप्राकारमालिनीम् कलावतीसुतस्यापि प्रभा
सस्य निवेशितम् पुरं तालमिति ख्यातं दक्षिणापथसंश्रितं एवं निवेश्य पुत्रान्स पुरेषु पुरुषर्ष
भः रेमे ताभिः समं विप्र मनोज्ञास्वद्रिभूमिषु एकदा तु गतोरण्ये मृगयायां स धनुर्द्धरः चकर्ष धनुरा
लोक्य वराहमति दूरगम् अथाह काचिदभ्येत्य तत्रता हरिणांगना मय्येष पात्यतां वाणः प्रसीदे
ति पुनः पुनः किमनेन हतेनाद्य मामाशु विनिपातय त्वया निपातितो वाणो दुःखान्मां मोक्षयिष्य
ति स्वारोचिरुवाच न ते शरीरं सरुजमस्माभिरुपलक्ष्यते किन्नु तत्कारणं येन प्राणान्हातुमिहे
च्छसि मृग्युवाच अन्यास्वासक्तहृदये यस्मिंश्चेतः कृतास्पदम् ममैतेन विना मृत्युरौषधी किम
तः परम् स्वारोचिरुवाच कस्त्वां नाभिलषेद्भीरु यस्यानुरागासि कुत्र वा यदप्राप्त्या निजान्प्राणा
न्परित्यक्तुं व्यवस्यसि मृग्युवाच त्वमेवेतासिध म्मेन त्वया चापहृतं मनः वृणोम्यहमतो मृत्युं
मयि वाणो निपात्यताम् स्वारोचिरुवाच त्वं मृगी चञ्चलापांगि यतस्क पुरुषावयं कथं त्वया मम

मां॰क॰ संगो मद्विधस्य भविष्यति मृत्युवाच यदि शापकुरं रचितं न्मयि तेषां परिस्वज यदि वा साधुचित्तं मे
१५३ करिष्यसि मयेप्सितं एतावता भवताहं भविष्याम्यति भामिता मार्कंडेय उवाच आलिलिंग ततस्ता
नु स्वारोचिर्हरिणीं गतां तेन चालिंगिता सत्यः साभूद्दिव्यवपुर्दूरा: ततः स विस्मयाविष्टः कादू
153 मित्यभ्यभाषत सचास्मै कथयामास प्रेमालज्जाजडाक्षरं अहं नत्यथितादेवैः काननस्यास्य देव
ता उत्पादनीयो हि मन्नस्त्वया मयि महामते प्रीतिमत्या मयि सुतं भूर्लोकपरिपालकम् त्वमु
त्पादय देवानां त्वाभेदं वचनादृदे मार्कंडेय उवाच ततः स तस्यां तनयं सर्वलक्षणलक्षितं तेज
स्विनमिवात्मानं जनयामास तत्क्षणात् जातमात्रस्य तस्याथ देववाद्यानि सस्वनुः जगुर्गन्धर्व पु॰
पतयो ननृतुश्चाप्सरोगणाः सिषिचुर्भूतलं मेघा नीरजस्कं सुराशिशा पवनः पुष्पवर्षं च मु
मोचाथ सम्मततः तस्य तेजः समालोक्य नाम चक्रे पिता स्वयं द्युतिमानिति येनास्य तेजसा भा १५३
सिता दिशः सबालो द्युतिमान्नाम महाबलपराक्रमः स्वारोचिषः सुतो यस्मात्तस्मात्स्वारोचि

षोभवत् सचापि विचरन्मध्ये कदाचिद्वननिर्झरे स्वरोचिर्ददृशे हंसं निजपत्न्या समन्वितम् उवाच
च तदा हंसी साभिलाषा पुनःपुनः उपभुज्यतामात्मा चिरन्तं क्रीडितम्मया किं सर्वकालं भोगैस्ते
आसन्नश्चरमं वयः परित्यागस्य कालोयम् तव चापि जलेचरि हंस्युवाच अकालः कोस्ति भोगानां
सर्वभोगात्मकं जगत् यज्ञाः क्रियन्ते भोगार्थं ब्राह्मणैः संयतात्मभिः दृष्टादृष्टांस्तथा भोगान्वाञ्छ
मानाविवेकिनः दानानि च प्रयच्छन्ति पूर्तं धर्मश्च कुर्वते सत्वं नेच्छसि किं भोगान् भोगाश्चेष्टाः फ
लं नृणां विवेकिनां तिरश्चाञ्च किं पुनः संयतात्मनां हंस उवाच भोगेष्वासक्तचित्तानां परमात्मा
स्थिता मतिः भविष्यति कदा संगमुपेतानाञ्च बन्धुषु पुत्रमित्रकलत्रेषु सक्ता जीवन्ति सीदन्ति स
रः पंकार्णवे मग्नाजीर्णा वनगजा इव किं न पश्यसि वा भद्रे जातसंगं स्वरोचिषं आबाल्यात्काम
संसक्तं मग्नं स्नेहाम्बुकर्द्दमे यौवनेतीव भार्यासु सांप्रतं पुत्रनप्तृषु स्वरोचिषो मनो मग्नमुद्धा

मा०क०

१५४ रं प्राप्स्यते कुतः नाहं स्वरोचिष स्थास्यः स्त्रीवश्यो राजलेश्वरि विवेकवांश्च भोगानां विनिवृत्तोस्मि
154 सांप्रतं मार्कंडेय उवाच स्वरोचिरेतदाकर्ण्य जातोद्वेगः स्वगेहिनाम् आदाय भार्यास्तपसे ययौ
रन्यत्तपोवनं तत्र तप्त्वा तपो घोरं सहताभिरुदारधीः जगाम लोकानमलान्निर्द्धूताखिलकल्मषः
॥ ० ॥ इति मार्कंडेयपुराणे ॥ ० ॥ मार्कंडेय उवाच ततः स्वारोचिषं नामा द्युतिम
न्तं प्रजापतिं मनुश्चकार भगवांस्तस्य मन्वन्तरं शृणु तत्रान्तरे तु ये पु०
१५४

देवामुनयस्तभृणुध्वमे भूपालाः क्रौष्टुके येतान्गदतस्त्वं निशामय देवाः पारावतास्तत्र तथैव तुषिता
द्विजाः स्वारोचिषेंतरेंद्रश्चेंद्रो विपश्चिदिति विश्रुतः ऊर्जस्तंभस्तथा प्राणो दत्तोलि ऋषभस्तथा निश्च
रश्चार्ववीरांश्च तत्र सप्तर्षयोभवन् किंपुरुषाद्याश्च सुतास्तस्य महामुनः सप्तासीत्सुमहावीर्याः पृ
थिवीपरिपालकाः तस्य मन्वंतरं यावत्तावत्तत्सुतसंभवैः भुक्तेयमवनी सर्वा द्वितीयं चैतदंतरं
स्वारोचिषस्य चरितं जन्म स्वारोचिषस्य च निशम्य मुच्यते पापेभ्यः श्रद्धानोपि मानवः इति मार्कंडे
यपुराणे स्वारोचिषं समाप्तं ॥०॥ क्रौष्टुकिरुवाच भगवन् कथितं सर्वं विस्तरेणा त्वया मम स्वारो
चिषाद्भुतं जन्म तथा श्रावोचिषस्य तु या तु पद्मिनी नाम विद्या भोगोपपादिका तत्संश्रया ये मुनयस्तन्मे
विस्तरतो वद श्रेष्टो ये निधयस्तेषां तन्मे विस्तरतो स्वरूपं द्रव्यसंस्थितिं भवताभिहितं सम्यक् श्रो
तुमिच्छाम्यहं गुरोः मार्कंडेय उवाच पद्मिनी नाम या विद्या लक्ष्मीस्तस्याधिदेवता तदाधाराश्च नि
धयस्तान्मे निगदतः शृणु तत्र पद्मो महापद्मो तथा मकरकच्छपौ मुकुंदनंदौ नीलश्च शङ्खश्चैवा

ष्टमो विधिः सत्यां तत्पां भवं त्येते सिद्धिस्तेषां हि जायते देवतानां प्रसादेन सधुसंसेवनेन च एभिरालो
कितं वित्तं मनुष्यस्य महामते याद्दक्स्वरूपो भवति तन्मे निगदतः शृणु प्राज्ञेश्च मनिधिः पृथ्वीस
यस्य भवति द्विज सुतस्य तत्सुतानां च तत्पुत्राणां च भित्यसः दाक्षिण्यसारः पुरुषस्तेन चाधिष्ठि
तो भवेत् सत्वाधारो महाभागो यतो सौ सात्त्विको निधिः सुवर्णरौप्यताम्रादिधातूनां च परिग्रहं
करोत्यभितरां सोपि तेषां च क्रयविक्रयं करोति च यथायज्ञानू याज्ञिकानां प्रयच्छति सभादेव
निकेतांश्च सकारयति तन्मनां सत्वाधारो निधिश्चान्यो महापद्म इति स्मृतः सत्वप्रधानो भव
ति तेन चाधिष्ठितो नरः करोति पद्मरागादिरत्नानां च परिग्रहं मौक्तिकानां प्रवालानां तेषां च क्र
यविक्रयं ददाति गशीलेभ्यस्तेषामावथांस्तथा सकारयति तच्छीलः स्वयमेव च जायते तत्प्रसू
ताजथाशीलाः पुत्रपौत्रक्रमेण च पूर्वर्द्धिमात्रः सप्रासो पुरुषांश्च न मुंचति तामसो मकरो नाम
निधिस्तेनावलोकितः पुरुषश्च तमःप्रायः सशीलोपि हि जायते बाणखड्गर्ष्टिधनुषां च चर्माणां

चपरिग्रहं दर्शकानां च कुरुते याति मैत्रीश्च राजभिः ददाति शौर्य्यवृत्तीनां भूभुजां ये च तत्प्रियाः
क्रयविक्रये च शस्त्राणां नान्यत्र प्रीतिमेति च एकस्यैव भवत्येव नरस्य न सुतानुगः द्रव्यार्थं दस्युतो ना
शं संग्रामे चापि स व्रजेत् कच्छपश्च निधिर्योन्यो नरस्तेनाभिवीक्षितः तमःप्रधानो भवति यतोसौ ता
मसो निधिः व्यवहारानशेषेषु पुण्यजातैः करोति च कर्म्मणो नखिलांश्चैव न विश्वसिति कस्यचि
त् समस्तानि यथांगानि गृह्यास्ते हि कच्छपः तथावष्टभ्य वित्तानि तिष्ठत्यनुमानसः न ददाति न वै
भुंक्ते तद्विनाशभयाकुलः निधानमुर्व्यां कुरुते निधिःसोप्येकपौरुषं रजोगुणमयश्चान्यो मुकुंदो ना
मयो निधिः नरोवलोकितस्तेन तद्गुणो भवति द्विज वीणावेणुमृदंगादेवातोद्यस्य परिग्रहं करोति
गायतां वित्तं नृत्यतां च प्रयच्छति वंदिनामथ सूतानां विटानां नाट्यपाठिनां ददात्यहर्निशं भो
गान् भुंक्ते तैस्तु समं द्विजः कुलटा युवतिश्चास्य भवत्यन्यैश्च तद्विधैः प्रयाति संगमे कं च स निधि
भजते नरं रजःसत्वमयश्चान्यो नंदो नाम महानिधिः उपैति स्तंभमधिकं नरस्तेनावलोकितः

मार्कं०
१५६
156

समस्तधातुरत्नानांपश्यधान्यादिकस्यच परिग्रहंकरोत्येषतथैवक्रयविक्रयं आधारःसज्जनानां
चस्वागताभ्यागतस्यच सहतेनापमानोक्तं स्वल्पंवापिमहामुने स्तूयमानश्चमहतींप्रीतींवध्ना
तियच्छति यंयमिच्छतिवैकामंमृदुत्वमुपयातिच वस्त्राभार्याभवंत्यस्यसूतिमत्योतिशोभनाः
रत्नैश्चसप्तचनरान्निधिर्नंदोनुवर्तते प्रवर्द्धमानोथनरःषष्टभागेनसत्तमः दीर्घायुत्वंचसर्वेषां
पुरुषाणांप्रयच्छति बंधूनांचैवभरणंयेचदूरादुपागताः तेषांकरोतिवैनंदःपरलोकेसचा
दृतः भवत्यस्यनचस्नेहः सहवासिषुजायते पूर्वमैत्रेचशैथिल्यंप्रीतिमन्यैःकरोतिच तथैव
सत्वरजसीयोबिभर्तिमहानिधिः सनीलसंज्ञस्तत्संगीनरस्तच्छीलवान्भवेत् वस्त्रकार्पासधा
न्यादिफलपुष्पपरिग्रहं मुक्ताविद्रुमशंखानांशुक्त्यादीनांतथामुने काष्ठानांचकरोत्येषय
च्चान्यज्जलसंभवं क्रयविक्रयमप्येषांनान्यत्ररमतेमनः तडागान्पुष्करिण्यश्चतथारामा
न्करोतिच बंधंचसरितांवृक्षांस्तथारोपयतेनरः गंधलेपनपुष्पादिभोगभुक्ताभिजायते

पु०
१५६

२

त्रीपुरुषस्यापिनिर्विन्नीलोनामेतिविश्रुतः रजस्तमोमयातान्यःसंखसंज्ञोद्वियोनिधिः तेन
पिनीयतेविप्रतद्गुणात्वंनिधीश्वरः एकस्यैवभवत्येषनरंनान्यमुपैतिवै यःसशंखोनिधिस्तस्य
स्वरूपंक्रौष्टुकेशृणु एकएवात्मनामृष्टमन्नंभुंक्तेतथासुरं कदन्नभुक्परिजनोनचशोभनव
स्त्रधृक् नददातिस्वकुत्रार्थ्यासुतापुत्रस्नुषादिषु सुपोषणापरःशंगीनरोभवतिसर्वदा
दृत्येतेनिधयःख्यातानराणामनुदेवताः मिश्रावलोकनान्मिश्रस्वभावफलदायिनः
यथाख्यातःस्वभावस्तुभवत्येकविलोकनात् सर्वेषामाधिपत्येचभुवेषाड्जिपद्मिनी इतिमार्कंडेय
पुराणेनिखिलक्षणां क्रौष्टुकिरुवाच विस्तारात्कथितंब्रह्मन्ममस्वारोचिषंमुने मन्वंतरंतथैवाष्टो
येपृष्टानिधयोमया स्वायंभुवंपूर्वमेवमन्वंतरमुदाहृतं मन्वंतरंतृतीयंमेकथयोत्तमसंज्ञितं मार्कं
डेयउवाच उत्तानपादपुत्रोभूदुत्तमोनाममनामतः स्वरुच्यास्तनयःख्यातोमहाबलपराक्रमः स
र्वधर्मात्मामहात्माचपराक्रमधनोनृपः अतीत्यसर्वभूतानिबभौभानुरिवापरः समःशत्रौ

मार्कं० १५८ 157

चमित्रेचपरेपुत्रेचधर्मवित् दुष्टादुष्टेचयमभवत्सोमवत्समहामुने वाउथ्यांवहुलानामउपयेमेस
धर्मतः उत्तानपादतनयः शचीमिंद्रइवोत्तमः तस्यामतीवरक्तस्यामी द्विजवर्यमनः सदाः
स्नेहवच्छशिनोयद्वद्रोहिण्यांनिहितापरं अन्याप्रयोजनाशक्तमुपैतिनहितन्मनः स्वप्नेचैव
तदानस्त्रिमनोभुत्तस्यभूभृतः सतुतस्याः सुचार्वंग्याः दर्शनादेवपार्थिवः ददाह्लोचनेत्रांत्र
गात्रस्पर्शश्रुतन्मयः श्रोत्राह्लेगकरंवाक्यंप्रियमप्यवनीपते तस्यावभूवसम्मानंकमनेपरि
भवंततः सुपमेनेश्रजंदत्तांशुभान्याभरणानिच उत्तन्थावर्द्धपीतेचपिवतोस्यवरासवं भुंज
ताचैरंद्रेणाह्नणमात्रंकरेधृता वुभुजेस्वल्पकंभक्ष्यंद्विजनातिमुदावती एवंतस्यानुकूलस्यना
नुकूलामहामुनः प्रभूततनवमत्यर्थेचक्रेरागंमहीभृतः अथापानगतोभूपःकदाचित्तामनिंदि पु० १५८
तां सुराभृतंपाणमात्रंग्राहयामाससादरं पश्यतांभूमिपालानांचारुमुख्यासमन्वितः उपगीय
मानोमधुरैर्गीतिगाधनतत्परैः सातुनेछतितत्पात्रमादातुंतत्परांमुखी सम्भक्ष्यमवनीशानां

ततः क्रुद्धः स पार्थिवः उवाचत्वास्थमाहूयनिश्वसन्रुष्टोयथा निराकृतस्त्वयादेव्याप्रिययापतिरव्ययः
दुष्टेतांदुष्टहृदयामादायविजनेवने परित्यजाशुनैतत्तेविचार्य्यंसुवचनम्मम मार्कंडेयउवाच ततो
नृपस्यवचनमविचार्य्यसवेत्स्यसः द्वास्थस्त्याजतांसुभ्रूमारोप्यसंदनवने साचतंविपिनेत्यागंकृतं
तेनमहीभृता अपश्यमानातंमेनेपरंकृतमनुग्रहं सोपितच्चानुरागाग्निर्दह्यमानात्ममानसः उत्तान
पादिर्भूपालोनान्यांभार्य्यामविंदत सस्मारतांसुचार्वंगीमहर्निशमनिर्वृतः चकारचनिजंराज्यं
प्रजांधर्मेणापालयत् प्रजाःपालयतस्तस्यपितुःपुत्रानिवौरसान् आगम्यब्राह्मणःकश्चिदिद
माहार्त्तमानसः ब्राह्मणउवाच महाराजत्वशान्तोस्मिश्रूयतांगदतोमम नृणामार्त्तिपरित्राणमन्यतोन
नराधिपात् ममभार्य्याप्रसुप्तस्यकेनाप्यपहृतानिशि गृहद्वारमनुद्घाट्यतांसमानेतुमर्हसि राजोवा
च नवेत्सिकेनापहृताकवानीताचसाद्विज यतामिनिग्रहेकस्यकुतोवाप्यानयामितां ब्राह्मणउवा
च तथैवसंगितेद्वारिप्रसुप्तस्यमहीपते हृताहिभार्य्याकिंकेनेत्येतद्विज्ञास्यतांभवान् त्वंरक्षिता

नोनृपतेषड्भागादानवेनवेतनः धर्मस्यतेननिद्रांताःस्वपंतिमनुजानिशि राजोवाच नतेदृष्टामया
भार्याधात्तुरूपाचदेहतः वयश्चैवसमाख्याहिकिंशीला ब्राह्मणउवाच कठोरनेत्रासायुक्ताहुसुवा
त्तःकृशाननाविरूपरूपाभूपालननिंद्यामितथैवतां वाचिभूपातिपुरुषानश्रीम्यासाचशीलतः
मा॰र्कं॰ दुष्याख्यातामयाभार्यासाकरालनिरीक्षणा मनागतीतंभूपालतस्याश्चप्रथमवयः दृष्टरूपाच
१५८ मेभार्यासत्यमेतन्मयोदितं राजोवाच अनंतेब्राह्मणाभयाभार्यामन्यांददामेते सुखायभार्यांक
158 ल्याणीदुःखदेहनुह्रिताटृशी अन्यांस्वरूपतामिश्रकारणंशीलमुत्तमं रूपशीलविहीनायात्याज्या
सान्यनतेकृता ब्राह्मणउवाच रक्षाभार्यामहीपालइतिनःश्रुतिरुत्तमा भार्यायांरक्ष्यमाणायां पु॰
प्रजाभवतिरक्षिता आत्माभिजायतेतस्यांसारक्ष्यतानरेश्वर प्रजायांरक्ष्यमानायामात्माभवतिर १५८
क्षितः तस्यामरक्ष्यमाणायांभवितावर्णसंकरः सपातयेन्महीपालपूर्वान्स्वर्गादधःपितॄन्
धर्महानिश्चार्थेदिवंममभार्यस्यभवेन्ममः नित्यक्रियाणांविध्वंसात्तसोचापिपतनायमे तस्यांच

पृथिवीपालभवित्रीममसंततिः तवषड्भागदायीसाभवित्रीधर्म्महेतुकी तदेतन्नेमयाख्यातंपत्नीय
मेहृताप्रभो तन्ममानघरक्षायांयाभवानधिकृतोयतः मार्कंडेयउवाच सतस्येतद्वचःश्रुत्वा
विमृष्यचनरेश्वरः सर्वोपकरणोयुक्तःमारुरोहरथोत्तमं द्रुतश्चेतश्चतेनासौपरिवभ्राममेदिनीं
ददर्शचमहारण्येतापसावथमुत्तमं अवतीर्य्यचतत्रासौप्रविश्यददृशेमुनिं कौश्यांवृष्यांसमा
सीनंज्वलंतमिवतेजसा सादृष्ट्वानृपतिंप्राप्तंसमुत्थायद्रुराथितः समान्यस्वागतेनैनंशिष्यमाह
र्घ्यमानय तमाहशिष्यःशनकैर्दातव्योऽर्घोस्यकिंमुने तदाज्ञापयसंचिंत्यत्वयाज्ञांहिकरोम्यहं
ततोवगतवृत्तांतोभूपतेस्तस्यसद्विजः संभाषासनदानेनचक्रेसम्मानमात्मवान् ऋषिरुवाच
किन्निमित्तमिहायातोभवान्किंवाचिकीर्षितं उत्तानपादिस्तनयंवेखित्वासुत्तमंनृपं राजोवाच
ब्राह्मणस्यगृहाद्भार्य्याकेनाप्यपहृतामुने अविज्ञातस्वरूपेणतामन्वेष्टुमिहागतः पृच्छामियत्त्वत्तन्मे
यंप्रणतस्यानुकंपया अभ्यागतस्यायगृहंभावनुक्तुमर्हसि ऋषिरुवाच पृच्छमामांवनीपा

मार्कं०
१५८
159

पालयत्पृष्टश्चमशंकितः वक्तव्यंचेत्तवमयाकथयिष्यामितेततः राजोवाच गृहागताययन्मह्यंप्रथमेद
र्शनेमुने त्वयासंवत्सरोदातुंकस्मादर्घोनिवर्त्तितः ऋषिरुवाच त्वद्दर्शनेननरर्षभसाद्याज्ञप्तोयंमयानृप
यदातदाहमेतेनशिष्येणप्रतिबोधितः एषवेत्तिजगत्यत्रमत्प्रसादादनागतं यथाहंसतीतंचवर्त्तमा
नंचसर्वतः आलोच्यज्ञापयेत्युक्तेततोज्ञातंमयापितत् ततोनदत्तवानर्घमहंतुभ्यंविधानतः सत्यंराजा
न्वमर्घोर्हः कुलेस्वायंभुवस्यवै तथापिनार्घयोग्यंत्वामन्यामोयमुत्तम राजोवाच किंतेकृतेकृतं
मयाब्रह्मन्ज्ञानतोज्ञानतोपिवा येनत्वंनोर्घमर्हामिनाहमभ्यागतश्चिरात् ऋषिरुवाच किंविस्मृ
तंतेयत्पत्नीत्वयात्यक्तामहावने परित्यक्तस्त्वयासार्द्धंत्वयाधर्म्मोनृपाखिलः पक्षेणाकर्म्मणोहान्या
प्रयात्यस्पर्शतांनरः किमुत्रैवाधिकोयस्यहानिर्नित्यकर्म्मणः पत्न्यानुकूलयाभाव्यंयथाशीलेपि
भर्त्तरि दुःशीलापितथाभार्य्यापोषणीयानरेश्वर प्रतिकूलाहिसापत्नीतस्यविप्रस्ययाहृता तथा
पिधर्म्मकामोसौत्वामुपवाचितवान्नृप चलतःस्थापयस्यन्यान्स्वधर्म्मेत्वंमहीपते त्वांस्वधर्म्मात्

पु०
१५८

५

विंतं कोपरःस्थापयिष्यति मार्कंडेय उवाच विनमद्धःसमहीपालदुत्पुक्तस्तेनधीमतां तथेत्युक्ता
तुपप्रछतांपत्नीतुद्विजन्मनः भगवन्केननीतासौपत्नीविप्रस्यकुत्रवा अतीतानागतंवेत्तिजगत्य
वितथंभवान् ऋषिरुवाच तांजहारात्रितनयोवलाकोनामराक्षसः द्रक्ष्यसेचाद्यतांभूपतत्प
लावर्तकेवने गछसंयोजयाशुद्धंभार्य्यायातंद्विजोत्तम मापापास्पदतांयातुत्वमिवासौदिनेदिने
इतिमार्कंडेयपुराणे ॥ ॥ मार्कंडेयउवाच अथारुरोहसुरथंप्रणिपत्यसतंमुनिं तेनाख्यातंवनं
तच्चप्रययावुत्पलावतं यथाख्यातस्वरूपंचभार्य्यांतत्रद्विजस्यतां भक्षयंतीददर्शाथश्रीफला
निनरेश्वरः पप्रछचकथंभद्रेत्वमेतद्वनमागता स्फुटंब्रवीहिवैवालेअपिभार्य्यासुशर्म्मणः ब्राह्म
ण्युवाच सुताहमतिरात्रस्यद्विजस्यवनवासिनः पत्नीविशालपुत्रस्ययस्यनामत्वयोदितं साहं
हृतावलाकेनराक्षसेनत्वरामुना प्रसुप्ताभवनेस्वाथभ्रातृमातृवियोजिता मात्राभ्रातृभिरन्यैश्च
तिष्ठाम्यत्रसुदुःखिता भस्मीभवतुतत्रासौयेनाहमेवंवियोजिता तस्मिन्वनेहिगहनेतेनानीयामुञ्जि

तामिषंविकारणांकिंनुनोपभुंक्तेनखादति राजोवाच अपितत्क्षणायातेरक्षस्त्वामुन्मज्ज्यक्कवेगतं अ
हंभर्त्तातवैवाप्रप्रेषितोद्विजनंदिनि ब्राह्मण्युवाच अस्येवकाननस्यांतःसतिष्ठतिनिसाचरः प्रवि
श्यपश्यतुभवान्नविभेतिततोयदि मार्कंडेयउवाच प्रविवेशततःसोथतयावर्त्मनिदर्शिते
मांर्कं० ददृशेपरिवारेणासमवेतंसराक्षसं दृष्टमात्रेततस्तस्मिंस्त्वमानःसराक्षसः दूरादेवमहींमूर्द्ध्ना
१६० स्पृशन्नृपादांतिकंययौ राक्षसउवाच ममात्रागच्छतागेहंप्रसादःसुमहान्कृतस्त्वं प्रशाधिकिं

करोम्येषवसामिविषयेतव अर्घंचेमंप्रतीच्छस्वस्थीयतांचेदमासनं वयंभृत्याभवान्स्वामी
दृढमाज्ञापयस्वमां राजोवाच कृतमेवत्वयासर्वंसर्वाचैवातिथिक्रिया किमर्थंब्राह्मणावधूस्त्वया
नीतानिशाचर नेयंस्वरूपसंपन्नाभार्य्यात्वंचेद्धृतात्वया भक्ष्यार्थंचेत्कथंनात्तानात्वयैतत्कथ्यताम्मम पु०
राक्षसउवाच नवयंमानुषाहारा अन्येतेनृपराक्षसाः सुकृतस्यफलंयत्रतदश्नीमोवयंनृप। १६०
स्वभावंचमनुष्याणांयोषितांचविमानिताः मानिताश्चसमश्नीमोनवयंजंतुखादकाः यदास्मा

र्शांज्ञांतिर्भुक्त्वाक्रुध्यंतिनेतदा भुंक्तेदुष्टस्वभावेचगुणावंतोभवंतिच संतिनःप्रमदाभूपरू
पेणाप्सरसांसमा वाद्यस्यत्वाख्यतिष्ठ तमसानुपूर्वीयुवतिःकथं राजोवाच यत्येषानोपभोगाय
नाहारायनिशाचर गृहंप्रविश्यविप्रस्यतत्किमेषाकृतात्वया राक्षसउवाच मंत्रविद्भिर्द्विजश्रे
ष्ठायज्ञेयज्ञेगतस्यमे रक्षोघ्नमंत्रपठणात्कुरुक्षुद्बाटनंनृप बुभुक्षितावयंतस्यमंत्रोच्चारणाक
र्मणा क्रयामःसर्वयज्ञेषुसत्राद्भिर्भवतिद्विजः ततोस्माभिरिदंतस्यवैकल्यमुपपादितं पत्न्या
विषपुमानिज्याकर्मयोग्योनजायते मार्कंडेयउवाच वैकल्योच्चारणात्तस्यब्राह्मणस्यमहा
मुनेः ततःसराजासुदृशंविषमःसमजायत वैकल्यमेषविप्रस्यवदमामेवनिंदति अनर्हेम
वैस्यचमांसोप्याहमुनिसत्तमः वैकल्यंतस्यविप्रस्यराक्षसोप्याहमेयथा अपत्नीकतयासोऽ
हंसंकटंमहदास्थितः मार्कंडेयउवाच एवंचिंतयतस्तस्यपुनरप्याहराक्षसः प्रणामनम्रो
राजानंबद्धांजलिपुटंमुने नरेंद्राज्ञाप्रदानेनप्रसादःक्रियतांमम भृत्यस्यप्रणतस्येप्सं

मार्कं०
१६१
161

युष्मद्विषयवासिनः राजोवाच स्वभावं वयमप्रीमत्वयोक्तं यनिशाचर तदर्थिनो वयं येन कार्य्यं तच्छृणुत
स्व मे अस्मात्वयाद्यब्राह्मण्यादौःशील्यमुपभुज्यतां येन त्वयात्ते दौशतस्येव नीतभे वेदियं नीयतां य
स्य भार्य्या यं तस्य वेश्मनिशाचर अस्मिन्कृते कृतं सर्वं गृहमभ्यागतस्य मे मार्कंडेय उवाच ततः स
राक्षसस्तस्याः प्रविश्यान्तःसुमायया भक्षयामास दौःशील्यं निजशक्त्यान्नृपाज्ञया दौःशील्येनातिरौ
द्रेण पत्नी तस्य द्विजन्मनः तेन सा संपरित्यक्ता तमाह जगतीपतिं स्वकर्मफलपाकेन भर्त्तुस्तस्य म
महात्मनः वियोजिताहं तच्छुत्वयमामी निशाचरः नास्य दोषो न वा तस्य मम भर्त्तुर्महात्मनः ममै
व दोशो नाप्यस्य नकृतं त्वुपभुज्यते अन्यजन्मनि कस्यापि विप्रयोगः कृतो मया सोयं ममाप्युपगतः को
दोषोस्य महात्मनः राक्षस उवाच प्राप्यधित्वान वांदेशाद्दिमां भर्त्तृगृहं प्रभो यदन्यत्करणीयं ते तद्ब्रू पु०
हियप पार्थिव राजोवाच अस्मिन्नुहृते कृतं सर्वं त्वया मे रजनीचर आगंतव्यं च ते वीर कार्य्यका १६१
लेस्मृते न मे मार्कंडेय उवाच तथेत्युक्त्वा तु तद्रक्षसामासादयत्न निन्ये भर्त्तृगृहं सुद्धां दौःशी

७

न्यापगमान्तदा इतिमार्कंडेयपुराणे ॥०॥ मार्कंडेय उवाच तांप्रेषयित्वाराजापिस्वभर्तृगृहमंगनां
चिंतयामासनिःश्वस्यकिमत्रसुकृतंभवेत् अनर्व्वयोपपत्तांकष्टांसमामाहमहामनाः वैकल्यंवि
प्रमुक्तिश्यतथाह्यायंनिशाचरः सोहंकथंकरिष्यामित्युक्तापत्नीभयाद्दिमा अथवाज्ञानदृष्टिंतंप्र
क्ष्यामिमुनिसत्तमं संचिंत्येथंसभूपालःसमारुह्यरथंतदा ययौसयत्रधर्मात्मात्रिकालज्ञोमहा
मुनिः अवरुह्यतथासोथतंसमेत्यप्रणम्यच यथावृत्तंसमाचख्यौराक्षसेनसमागमं ब्राह्मणा
दर्शनंचैवदौःशील्यापगमंतथा प्रेषणंभर्तृगेहेच कार्य्यमागमनेचयत् ऋषिरुवाच ज्ञात
मेतंमयासर्वंयत्कृतंतेनराधिप कार्य्यमागमनेचैवमत्समीपेनवाखिलं प्रष्टुमामिहकिंकार्य्यमय
त्युद्विग्नमानसः त्वमागतोमहीपालशृणुकार्य्यंचयत्त्वया पत्नीधर्मार्थकामानांकारणंप्रवरंनृणां
विशेषसक्तधर्मश्चसंत्यक्तस्त्यजताहितां अपत्नीकोनरोनरोभूपनयोग्योनिजकर्मणां ब्राह्मणः
क्षत्रियोवापिवैश्यःशूद्रोपिवानृपः त्यजताभवतापत्नीनशोभनमनुष्ठितं अत्याज्योहियथाभर्त्ता

स्त्रीणां भार्य्यां तथा नृणां राजोवाच भगवन्किं किशेम्येष विपाको मम कर्म्मणां नानुकूलानुकूलस्य
यस्मात्यक्तानतो मया यच्छत्कुरोक्षितत्सर्वं दह्यमानेन चेतसा भगवंस्तद्वियोगार्त्तिभीतेन मुनिति
न्नुणा सांप्रतं तु वने त्यक्ता न विद्मि क नु सा गता भक्षिता वापि विपिने सिंहव्याघ्रनिशाचरैः ऋषि
मां०के० १६२ 162 रुवाच न भक्षिता च भूपाल सिंहव्याघ्रनिशाचरैः सा तु रिच्युतचारित्र्या सांप्रंतु रसातले राजोवा
च सा नीता केन पातालमास्ते चाद्दूषिका कथं अत्यद्भुतमिदं ब्रह्मन्यथावद्वक्तुमर्हेसि ऋषि
रुवाच पाताले नागराजोसि प्रख्यातः शालपोतकः तेन दृष्टा त्वया त्यक्ता भ्रममाना महावने
सारूपशालिनी तेन सानुरागेण पार्थिव विदितार्थेन पातालं नीता सा वततस्तदा ततस्तस्य सुताशु
भ्रनंदा नाम महीपते भार्य्या मनोरमा ह्यस्य नागराजस्य धीमतः तया मातुः सपत्नीयं नाभविष्यतीति पु० १६२
शोभना हृत्वात्मगेहमानीता गुप्ता चांतःपुरे धृता यदा तु याचिता नंदं न ददाति नृपोत्तरं मूकाभ
विष्यसीत्याह तदा सां तनयां पिता एवं शप्ता तदा तेन सा चास्ते तत्र भूपते नीता तेनोरगेंद्रेण धृता तात

न्सुतयासती मार्कंडेयउवाच ततोराजापरंहर्षमवाप्यतमपृछत द्विजवर्य्यसदौभाग्यकारणंद
यितांप्रति राजोवाच भगवन्सर्वलोकस्यमयिप्रीतिरनुत्तमा किंतुतत्कारणंयेनमत्पत्नीनाति
वत्सला ममसाचावतीरेषाप्राणेभ्योपिमहामुने साचमांप्रीतिदुःशीलाब्रूहि यत्कारणंमुने
ऋषिरुवाच पाणिग्रहणकालेतुसूर्य्यभौमशनैश्चरैः शुक्रराचस्पतिभ्यां चतवभार्य्यावनेपि
वा तन्मुहूर्त्तेदृष्टचंद्रस्तस्याः सोमसुतस्तथा परस्परविपक्षौतोततस्तेपार्थिवेदृशं तद्गच्छत्वंसध
र्मेणापरिपालयमेदिनीं पत्नीसहायः सर्वचकुरुधर्मवतीक्रियां मार्कंडेयउवाच इत्युक्तःप्र
णिप्रणिपत्यैनमारुह्यस्यंदनंततः उत्तमंपृथिवीपाल आजगामनिजंपुरं इतिमार्कंडेयपुराणेऔत्त
ममन्वंतरे ॥०॥ मार्कंडेयउवाच ततःसनगरंप्राप्यतंददर्शद्विजंनृपः समेतंभार्य्ययागेहेशीलवत्या
मुदान्वितं ब्राह्मणउवाच राजवर्य्यकृतार्थोस्मिकृतोधर्माचरन्नितः धर्मज्ञेनेहभवताभार्य्याभा
नयतामम राजोवाच कृतार्थस्त्वंद्विजश्रेष्ठनिजधर्मार्थपालनात् वयंसंकटिनोविप्रयेषांपत्नीन

वेत्सनि ब्राह्मण उवाच नरेंद्र याहि विपिने भक्षिता श्वापदैर्वने अनं तया किमन्यस्यान पाणिर्गृह्य
ते त्वया राजोवाच न भक्षिता न ते दयिता श्वापदैः सा हि जीवति अविदूषितचारित्रा कथमेतत्करोम्य
हं ब्राह्मण उवाच यदि जीवति ते भार्या न तथैवाप्यभिचारिणी तदपत्नीकता जन्म किं पापं क्रियते
मार्कं० त्वया राजोवाच आनीतापि हि सा विप्र प्रतीकूला सदैव मे दुःखाय न सुखायालं तस्या मैत्री न
१६३ वै मयि ब्राह्मण उवाच तव संप्रीतये तस्मभुराष्टिरुपकारिणी क्रियते मित्रकामेष्टा मित्रविंदां
163 ते मितां अप्रीतयोः प्रीतिकरी सा हि संवदनं परं भार्यापत्योर्मनुष्येंद्र तां तवेष्टिं करोम्यहं यत्र
तिष्ठति सा सुभ्रूस्तव भार्या मदृदिते तस्मादानीयतां साते परां प्रीतिमुपैष्यति मार्कंडेय उवाच
इत्युक्तः सन्नसंभारानशेषानवनीपतिः आनिनाय च कारिष्टिं स चेमां द्विजसत्तमः सप्तकृत्वः सन्न पु०
तदा चकारेष्टिं पुनः पुनः तस्य राज्ञो द्विजश्रेष्ठ भार्यामंवाहनावे यदाशेपितमैत्रीनाम अन्यतम १६३
हामतिः स भर्त्तारिनदा विप्रस्तमुवाच नराधिपं आनीयतां नृपश्रेष्ठ सा भवेष्टात्मनेंतिकं भुङ्क्ष्व

भोगांस्तथासांद्रं यजयज्ञांस्तथाद्भुतः मार्कंडेय उवाच इत्युक्तस्तेन विप्रेण भूपालो विस्मितस्तदा स
स्मार तं महावीर्यं सत्यसंधं निशाचरं स्मृतस्तेन तथा सत्यः समुत्पन्न नराधिपः किं करोमीति सोप्याह
प्रणिपाताद्दूतो मुने ततस्तेन नरेंद्रेण विस्तरेण निवेदिते गत्वा पातालमादाय राजपत्नीमुपायौ
आनीता चाहिता तेन सा ददर्श पतिं तदा उवाच च प्रसीदेति भूयो भूयो मुदावती ततः स राजा वभ
सान्त्वयन्प्राह भाविनीं त्वयि भद्रे प्रसन्नोहं भूयोप्येवं ब्रवीमि किं पत्न्युवाच यदि प्रसादप्रवणं
नरेंद्र मयि ते मनः तदेतदभिधास्येहं तत्कुरुष्व ममाचिरं राजोवाच निःशंकं ब्रूहि मत्तो यद्यद्
वत्त्या किंचिदीप्सितं तदलभ्यं न ते भीरु तवायत्तोस्मि नातथा पत्न्युवाच मदर्थे तेन नागेन सुता शप्ता
सखी मम मूका भविष्यसीत्याशु सा च मूकत्वमागता तस्याः प्रतिक्रियां प्रीत्या मम यः शक्तो निवेद्य
वान् वाग्विघातप्रशान्त्यर्थं ततः किं न कृतं मम मार्कंडेय उवाच ततः स राजा तं विप्रं प्राहास्मिन्
कीदृशी क्रिया तन्मूकतापनोदाय स च तं प्राह पार्थिवं ब्राह्मण उवाच भूपः सारस्वतीमिष्टिं

करोमिवचनात्तव पत्नीत्वेयमनूत्यंयात्सुतद्वाक्यवदूनात् मार्कंडेयउवाच इष्टिंसारस्वतींच
क्रेतदर्थंसद्विजोत्तमः सारस्वतानिसूक्तानिजजापचसमाहितः ततःप्रवृत्तवाक्यांतांगर्गःप्राहर
मातले उपकारःसखीभर्त्राकृतोयमतिदुष्करः इत्थंज्ञातेसमागम्यनंदाशीघ्रगतिःपुरं ततोरा
मार्कं० ज्ञीम्परिष्वज्यतांसखीसुरगात्मजा तंचसंस्तूयभूपालंकन्याशोक्यापुनःपुनः उवाचमधुरं
१६४ नारीकृतात्मसनपरिग्रहा उपकारःकृतोवीरभवतायोममाधुना तेनाहृष्टासुहृदयातद्ब्रवी
164 मिश्रृणुष्वतत् तवपुत्रोमहावीर्योभविष्यतिनराधिपः तस्याप्रतिहतंचक्रमस्यांभुविभवि
ष्यति सर्वास्त्रशस्त्रशास्त्रज्ञोधर्मानुष्ठानतत्परः मन्वंतरेश्वरोधीमान्भविष्यतिसवैमनुः मार्कं
डेयउवाच इतिदत्वावरंतस्मैनागराजसुताततः सखीतांसंपरिष्वज्यपातालमगावन्मुने तस्य पु०
तत्रतयासार्द्धंरमतःपृथिवीपतेः जगामकालःसुमहान्प्रजाःपालयतस्तथा ततःसतस्यांतन १६४
योजज्ञेराज्ञोमहामुनेः पौर्णमास्यांयथाकांतश्चंद्रःसंपूर्णमंडलः तस्मिन्जातेमुदंप्रापुःप्रजाः

१०

सर्वोमहात्मनि देवदुंदुभयोनेदुः पुष्पवृष्टिःपपातह तस्यदृष्ट्वावपुःकांतिंभविष्यंशीलमेवच
उत्तमस्यैवमुनयोनामचक्रुःसमागताः जातोयमुत्तमेवंशेवालःकालेनयोत्तमे उत्तमाख्यंयतस्ते
नउत्तमोयंभविष्यति मार्कंडेयउवाच उत्तमस्यसुतःसोथनाम्नाख्याताततोत्तमः मनुरासीत्तत्प्र १
भावोभागुरेश्रूयतांममः उत्तमाख्यानमखिलंजन्मचैवोत्तमस्ययः नित्यंशृणोतिविद्वेषंसकदा
चिन्नगच्छति दुष्टैर्द्दानैस्तथापुत्रैर्वैधुभिर्वाकदाचन वियोगोनास्यभवितापठतःशृणुतोऽपिवा
तस्यमन्वंतरंब्रह्मन्नवदतोममविस्तरात् श्रूयतांयश्चतत्रेंद्रोयेदेवायेमहर्षयः इतिमार्कंडेयपुराणे
॥०॥ मार्कंडेयउवाच मन्वंतरेतृतीयेस्मिन्नौत्तमस्यप्रजापतेः देवानिंद्रमृषीन्भूपान्निबोधगदतोमम
स्वधामानस्ततोदेवायथानामार्थधारिणः सत्याख्याश्चतृतीयोन्यस्त्रिदशानांतदागुणः तृतीयेतुग
णेदेवाःशिवाख्यावैमहामुनेः शिवाःस्वरूपतस्तेतुश्रुताःपापप्रणाशनाः प्रतर्दनाख्यश्चगणोदेवा
नांमुनिसत्तम चतुर्थस्तस्यकथितउत्तमस्यांतरेमनोः वशवर्तिनःपंचमेतुयेदेवास्तत्रगणोद्विजः

यथाख्याताः स्वरूपाणि सर्वे त्रयश्च महाबलाः एते देवगणाः पंच स्मृता यज्ञभुजस्तदा मंवंतरे मुनिश्रेष्ठाः सर्वे द्वा
दशका गणाः तेषामिंद्रो महावीर्यस्त्रैलोक्यस्येश्वरोभवत् शतंक्रतूनामाहृत्य स्वशांतिर्नाम नामतः
मार्कं० यस्योपसर्गनाशाय नामाक्षरविभूषिताः अद्यापि मानवैर्गाथा गीयंते च महीतले स्वशांतिर्देवराट् शांतः
१६५ स्वशांतिर्थः प्रयच्छतु सहितः शिरसत्याद्यैस्तथैव वरशवर्तिभिः अजरामराः स्वशुचयो महाबलपराक्रमाः
165 पुत्रास्तस्य मनोवासन् विख्यातास्त्रिदशोपमाः तत्सूतिसंभवैर्भूमिः पालिताभून्वरेश्वरैः यावन्मन्वंतरं
तस्य मनोरुत्तमतेजसः चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः कृतत्रेतादिसंज्ञानां यान्युक्ता
निपुरा मया स्वतेजसः स्वरूपाश्च वशिष्ठस्य महात्मनः तनयाश्चांतरे तस्मिन् सप्त सप्तर्षयोभवन्
तृतीयमेतत्कथितं तव मन्वंतरं मया तामसस्य चतुर्थं च मनोरंतरमुच्यते वियोनिजन्मनो यस्य यश पु०
साद्योतितं जगत् जन्म तस्य तथा ब्रह्मन् श्रूयतां गदतो मम अतींद्रियमशेषाणां मनूनां चरितं यथा तथा १६५
जन्मापि विज्ञेयं प्रभावस्य महात्मनां इति मार्कंडेयपुराणे औत्तमं मन्वंतरं समाप्तं ॥ मार्कंडेय उवाच

राजाभून्नैवविख्यातःस्वराष्ट्रोनामवीर्य्यवान् अनेकयज्ञकृत्प्राज्ञःसंग्रामेष्वपराजितः तस्यायुःसु १
महद्दत्तंमंत्रिणाराधितेनवै पत्नीनांचशतंतस्यधन्यानामभवद्द्विज तस्यदीर्घायुषःपत्न्योनाति
दीर्घायुषोमुने कालेनजग्मुर्निधनंसर्वेभृत्यजनस्तथा सभार्य्याभिस्तथायुक्तोभृत्यैश्चसहज
न्मभिः उद्विग्नचेताःसंप्रापवीर्य्यहानिमहर्निशं तंवीर्य्यहानिनिर्भृतंतैर्भृत्यैस्त्यक्तंसुदुःखितं अनं
तरोविमर्दाख्याराज्याच्यावयत्तदा राज्याच्युतःसोपिवनंगत्वानिर्विण्णमानसः तपस्तेपेमहा
भागोवितस्तापुलिनेस्थितः ग्रीष्मेपंचतपाभूत्वावर्षासुस्थावकाशिकः जलशायीचशिशिरेनिराहारो
यतव्रतः ततस्तपस्यतस्तस्यप्रावृट्कालेमहाप्लवः बभूवानुदिनंमेघैर्वर्षद्भिरनुसंततं नदिग्विज्ञा पु०
यतेपूर्वादक्षिणावानपश्चिमा नोत्तराततसासर्वमनुनिपूर्णमिवाभवत् ततोतिपूरेणानृपःसनद्याः
प्रेरितंतटं प्रार्थयन्नपिनावापक्रियमाणोतिवेगिना अथदूरंजलौघेनक्रियमाणोमहीपतिः
आससादजलेरोहीसमुच्छ्रोजगृहेचतां तेनप्लवेनसहयायावुह्यमानानदीजलैः इतश्चेतश्चावका

११ १

मा॰ कं॰
१६६
166

रेव्याप्रसादात्तस्य ततः विभाविपंकमत्यन्तंदुस्तरंस नृपोभवत् तथैवकृष्यमाणोथरम्यंवनमवापच तत्रांध
कारेसारोहिचकर्षेववसुधाधिपं प्रफुल्लगुंममहाभागंकृशंधमनिसंततं तस्याश्चस्पर्शसंभूतामवापमुदमु
त्तमां सोंधकारेभ्रमतभूयोमदनाहृष्टमानसः विज्ञायसानुरागंतंदृष्टास्पर्शनतत्परं नरेंद्रतद्दुतस्मा
तः सामृगीतमुवाचह किंपृष्टंवेपथुमताकरेणास्पृशसेमम अन्यथैवास्यकार्य्यस्यसंजातोनृपते
पतिः नास्थानेगैमनोयातंनागम्याहंनरेश्वरः किंतुत्वत्संगमेविघ्नमेषलोलः करोतिते मार्कंडे
यउवाच इतिश्रुत्वावचस्तस्यामृग्याः सजगतीपतिः जातकौतूहलोरोहीमिदंवचनमब्रवीत्
कात्वंब्रूहिमृगीवाक्यंकथंमानुषवत्तव कश्चैवलोलोयोविघ्नंत्वत्संगेकुरुतेमम मृग्युवाच अहंते
रुपिताभूपप्रागासीत्उत्पलावती भार्याशताग्रमहिषीदुहितादृढधन्वनः राजोवाच किंतयात्व
त्कृतंकर्मयेनमांयोनिमागता पतिव्रताधर्मपरासंचैवंकथमीदृशी मृग्युवाच अहंपितृगृहेबा
लासखीभिःसहितावनं वनंगतादृदृशैकंमृगंमृग्यासमागतं ततःसमीपवर्तिन्यानतयाताद्विना

पु॰
१६६

१२

मृगी मयात्रत्वागतान्यत्रऋतुःप्राहततोमृगः मूढेकिमेवंमन्नासिधिक्तेदैः शीलमीदृशं आधानकाले
धेनार्थंत्वयाद्येविकलीकृतः वाचंश्रुत्वाततस्तस्यमानुषास्यवभाषतः भीताहमब्रुवंकोशीत्वंसितांधी
निमुपागतां ततःसप्राहपुत्रोहमृषेर्निवृत्तचक्षुषः सुतपानांममृगांनुयामिलासोमृगोभवं इमां
चानुगतःप्रेम्णावांछितस्त्वानयावने त्वयावियोजितादुष्टेतस्माच्छापंददामिते मयाचोक्तंनवाज्ञा
नाहंपराधंमहामुने प्रसादंकुरुशापंमेनभवांदातुमर्हति इत्युक्तःप्राहमांसोपिपुनरित्थंमहीपते
महीपते नप्रयच्छामितेशापंयद्यात्मानंददासिमे मयाचोक्तंमृगीनाहंमृगरूपधरोवने लप्स्यसे
त्वांमृगींचापिमयिभावोनिवर्त्यतां इत्युक्तःकोपरक्ताक्षःप्राहसस्फुरिताधरः नाहंमृगीत्वयाप्युक्तं
मृगीमूढेभविष्यसि ततोहंभृशंप्रव्यथिताप्रणम्यमुनिमब्रवं स्वरूपस्थमतिक्रुप्रसीदेतिपुनःपुनः बाला
नभिज्ञावाक्यानांततःप्रोक्तामिदंमया पितर्यसतिनारीभिःपतिःसंव्रियतेस्वयं सभिनातेकथं
त्वाहंवृणोमिमुनिसत्तमं अबलानाथदुत्पादोप्रसीदेशनमाम्यहं प्रसीदेतिप्रसीदेतिप्रणताधाम

मां॰के॰ १६७
167

द्वामते इत्थं लालप्यमानायाः समाहृमुनिसत्तमः न भवत्पृष्ठा चोक्तं मम वाक्यं कदाचन मृगी भविष्यसि
मृता वनेस्मिन्नेव जन्मनि मृगत्वे च महाबाहु तव गर्भमुपैष्यति लोलो नाम मुनेः पुत्रः सिद्धवीर्यस्य
भाविनि जातिस्मरा भवित्री त्वं तस्मिन् गर्भमुपागते स्मृतिं प्राप्य तथा वाचं मानुषीमीरयिष्यसि तस्मि
न्जाते मृगत्वाच्च विमुक्ता पतिनार्जितान् लोकानवाप्स्यसेऽप्राप्यनासत्येन दुष्कृतकर्मभिः सोपिलो
लो महावीर्यः पितृशत्रून्निपात्य वै जित्वा वसुंधरां कृत्स्नां भविष्यति ततो मनुः एवं शापमहं लब्ध्वा
मृता तिर्यक्त्वमागता त्वत्संस्पर्शाच्च गर्भोसौ संभूतो जठरे मम ततो ब्रवीमि नैवास्ति तव जाते मनो म
यि न चाप्यगम्यागर्भस्तु लोलो लोकपद्मं करोत्यसौ मार्कंडेय उवाच एवमुक्तस्ततः सोपि राजा प्राप्य प
रं मुदं पुत्रो ममारीन्न् जित्वेति पृथिव्यां भविता मनुः ततः स्वषावतं पुत्रं सा मृगी लक्षणान्वितं तस्मिन् पु॰
जाते च भूतानि सर्वाणि प्रययुर्मुदं विशेषतश्च राजासौ पुत्रे जाते महाबले सापि मुक्ता मृगी शापा १६७
त्प्राप लोकानभीप्सितान् ततोऽस्य ऋषयः सर्वे समेत्य मुनिसत्तम श्रवेक्ष्य भाविनीं मृद्धिं नामचक्रु

महात्मनः तामसीभजमानायांयोनिंमातर्य्यजायत तमसाचवृतेलोकेतामसोयंभवद्धतः ततः
सतामससतेनपित्रासमुद्धितोवने जातबुद्धिरुवाचेदंपितरंमुनिसत्तम कस्त्वंतातकथंवाहमत्र
माताचकामम किमर्थमागतश्चत्वमेतत्सर्वंब्रवीहिमे मार्कंडेयउवाच ततःपितायथावृत्तंस्वरा
ज्याद्यावनादिकं तस्याचष्टमहाबाहोःपुत्रस्यजगतीपतिः श्रुत्वातत्सकलंसोथसमाराध्यच
भास्करं अवापदिव्यान्यस्त्राणिससंहाराण्यशेषतः कृतास्त्रःशत्रूनवीन्नजित्वापितुरानीयचांति
कं अनुज्ञातोमुमोचाथतेनस्वंधर्ममास्थितः पितापितस्यस्वाल्लोकांस्तपोयज्ञसमार्जितान्
निसृष्टदेहःसंप्राप्तोदृष्ट्वापुत्रमुखंसुखं जित्वासमस्तांपृथिवींतांसमाख्यःसपार्थिवः तामसाख्योम
नुरभूत्तस्यमन्वंतरंशृणु येदेवास्तत्पतिर्यश्चदेवेंद्रायेतथर्षयः येचपुत्रामनोस्तस्यपृथिवीपरिपा
लकाः सत्यास्तथान्येसुधयःस्वरूपाहरयस्तथा एतेदेवगणास्तत्रसप्तविंशतिकामुने महाब
लोमहावीर्य्यःशतयज्ञोपलक्षणः शिखिरिंद्रस्तथातेषांदेवानामभवत्प्रभुः ज्योतिर्द्धामापृथुः

काव्यश्चैत्रोग्निर्वरकस्तथा पीवरश्चतथाब्रह्मन्सप्तसप्तर्षयोभवन् नवःख्यातिःशांतिर्हयोजानुजंघा
दयस्तथा पुत्रास्तुतामसस्यासन्राजानःसुमहाबलाः इतिमार्कंडेयपुराणेतामसमन्वंतरं ॥७॥
मार्कंडेयउवाच पंचमोपिमनुर्ब्रह्मन्रैवतोनामविश्रुतः तस्योत्पत्तिंविस्तरतःशृणुष्वकथयामिते
मार्कं० १६८ 168 ऋषिरासीन्महाभागऋतवागितिविश्रुतः तस्यापुत्रस्यपुत्रोभूद्रेवत्यंतमहात्मनः सतस्यविधिव
च्चक्रेजातकर्मादिकाःक्रियाः तथोपनयनादींश्चसचाशीलोभवन्मुने यतःप्रभृतिजातोसौततः
प्रभृतिसोप्युषि दीर्घरोगपरामर्षमवापमुनिपुंगवः माताचास्यपरामार्त्तिंकुष्टरोगातिपीडि
ता जगामसापिताचास्यचिंतयामासदुःखितः किमेतदितिसोप्यस्यचिंतयामासदुःखितः पुत्रो
त्यंतसुदुर्मतिः जग्राहभार्यामन्यस्यमुनिपुत्रस्यमन्मथात् ततोविषण्णमनाःसऋतवागिदमुक्त पु०
वान् अपुत्रतामनुष्याणांश्रेयसेनकुपुत्रता कुपुत्रोहृदयायासंसर्वथाकुरुतेपितुः मातुश्चस्वर्ग १६८
संस्थांश्चस्वपितॄन्पातयत्यधः सुहृदांनोपकारायपितॄणांनापितृप्तये पित्रोर्दुःखायधिग्जन्मतस्य

दुष्कृतकर्मिणाः धन्यास्तेतनयायेषांसर्वलोकाभिसम्मताः परोपकारिणाःशांताःसाधुकर्म्मणियनु
वृताः अनिर्वृत्तंतथानष्टंपरलोकपराङ्मुखं नरकायनसांगत्यैःकुपुत्रालंविजन्मनः करोतिसुहृ
षांदैन्यमहितानांतथामुदं अकालेचजरांपित्रोःकुपुत्रःकुरुतेहिवै मार्कंडेयउवाच एवंसो
यंतदुष्टस्यपुत्रस्यचरितैर्मुनिः दह्यमानमनोवृत्तिर्वृद्धंगर्गमपृछत ऋतवागुवाच सुव्रतेपुनरा
वेदागृहीताविधिवन्मया समाप्यवेदान्विधिवत्कृतोदारपरिग्रहः सदारेणाह्रियाःकार्याःश्रौ
तस्मार्त्तास्तथाक्रियाः नमेन्यूनाःकृताःकाश्चिद्यावदत्यमहात्मने गर्भाधानविधानेननकाम
मनुरुध्यता पुत्रार्थंजनितश्चायपुन्नाम्नोविभ्यतामुने सोयंकिमात्मदोषेणममदोषेणवापुनः अस्म
द्दुःखावहोजातोदौःशील्याद्बंधुशोकदः गर्गउवाच रेवत्यंतेमुनिश्रेष्ठजातोयंतनयस्तव तेनदुः
खायवैकष्टेकालेतस्मात्तुजायत ननेपराधोनैवास्यमातुर्थेचकुलस्यते अस्यदौःशील्यहेतुश्चरेवत्यं
तमुपागतं ऋतवागुवाच यस्मान्ममैकपुत्रस्यरेवत्यंतसमुद्भवं दौःशील्यमेतत्सातस्मात्पततामा

श्चरेवती मार्कंडेयउवाच तेनैवंव्याहृतेशापेरेवत्यृक्षंपपातह। पश्यतःसर्वलोकस्यविस्मयाविष्टचेतसः
रेवत्यृक्षंचपतितंकुमुदाद्रौसमंततः भावयामाससहसावनकंदरनिर्झरान् कुमुदाद्रिश्चतत्ख्या
मांके० १६९ 109 तात्ख्यातोरैवतकोभवत् अतीवरम्यःसर्वस्यांपृथिव्यांपृथिवीधरः तस्यर्क्षस्यतुयाकांतिर्जातापंक
जिनीसरः ततोजज्ञेतदाकन्यारूपेणातीवशोभना रेवतीकांतिसंभूतांतांदृष्ट्वाप्रमुचोमुनिः तस्या
नामतदाचक्रेरेवतीमितिभागुरे पोषयामासचैवैतांस्वाश्रमाभ्याससंभवां प्रमुचःसमहाभाग
स्तस्मिन्नेवमहाचले तांतुयौवनिनींदृष्ट्वाकन्यकांरूपशालिनीं समुनिश्चिंतयामासकोस्याभ
र्ताभवेदिति एवंचिंतयतःकालोजगामसुमहात्मनः नचाससादसदृशंवरंतस्यामहामतिः
ततस्तस्यावरंप्रष्टुमग्निंसप्रमुचोमुनिः विवेशवह्निशालायांप्रष्टारंप्राहहव्यभुक् महाबलोमहा पु० १६९
वीर्यःप्रियवाक्धर्मवत्सलः दुर्गमोनामभविताभर्ताह्यस्यामहीपतिः मार्कंडेयउवाच अनं
तरंमृगयाप्रसंगेनागतोमुने तस्याश्रमपदंधीमान्दुर्गमःसनराधिपः प्रियव्रतान्वयभवो

महाबलपराक्रमः पुत्रोविक्रमशीलस्यकान्तीदीजठरोद्भवः सप्रविश्याश्रमपदंतातन्वीजगतीपतिः
अपश्यमानस्तनृषिंप्रियेत्यामंत्रपृष्ठवान् राजोवाच क्वगतोभगवानस्मादाश्रमान्मुनिपुंगवः
तंप्रणंतुमिहेछामितत्वंप्रब्रूहिशोभने मार्कंडेयउवाच अग्निशालांगतोविप्रस्तेक्रत्वातस्यभाषितं
प्रियेत्यामंत्रणांचैवनिश्चक्रामत्वरान्वितः सददर्शमहात्मानंराजानंदुर्गमंमुनिः नरेंद्रचिह्नसहितंप्र
श्रयावनतंपुरः तस्मिन्दृष्टेततंशिष्यमुवाचचसगौतमं गौतमानीयतांशीघ्रमर्घ्योस्यजगतीपतेः
एकस्तावदयंभूपश्चिरकालादुपागतः जामाताचविशेषेणयोग्योमर्घ्यस्यमतोमम मार्कंडेयउ
वाच ततःसंचिंतयामासराजाजामातृकारणं विदितमयत्वंमौनीजगर्हेवेचतत्नृपः तमासनगतंवि
प्रगृहीतार्घ्यंमहात्मनिः प्रश्नितंप्राहराजेंद्रमपितेकुशलंपुरे कोषेबलेथमित्रेषुभृत्यामात्येषुचे
श्वर तथात्मनिमहाबाहोयत्रसर्वप्रतिष्ठितं पत्नीचतेकुशलिनीयतएवात्रतिष्ठति पृछाम्यस्या
ततोनाहंकुशलिन्यापरास्तव राजोवाच त्वत्प्रसादादकुशलंनकश्चिन्मुनिसत्तम जातकोमू

मार्कं०
१७०
१७०

हृल्लखासीन्मम भार्य्यात्र का मुने ऋषिरुवाच वेवतीन्न महाभागा त्रैलोक्यस्यापि सुंदरी तव भा
र्य्या वरारोहा राजास्तां त्वं न वेत्सि किं राजोवाच सुभद्रां शांततनयां कावेरीतनयां प्रभो सूरात्म
जां स्वजातां च कदंबां च वरूथिनीं विपाठां नंदिनीं चैव वेद्मि भार्य्यां गृहे द्विया: तिष्ठंति ये भगवन्
रेवतीं वेत्सि का द्वियं ऋषिरुवाच प्रियेति सांप्रतं येविता ये[illegible]का वरवर्णिनी किं विस्मृतं ते भूपाल श्ला
घ्येयं गृहिणी तव राजोवाच सत्यमुक्तं त्वया किं तु भावो दुष्टो न मे मुने नात्र कोपं भवान् कोपं
भवान् कर्त्तुमर्हत्यस्मासु याचितः ऋषिरुवाच सत्यं ब्रवीषि भूपाल न भावस्तव दूषितः व्याज
हार भवानेतद् द्विजानां नृपचोदितः मयापृष्टो द्भूतवहः कोस्या भर्तेति पार्थिव भवितातेन चाप्युक्तो पु०
भवानेवास्य वै वरः तद् दृष्टतां मया दत्ता तुभ्यं कन्या नराधिप प्रियेत्यामंत्रिता येयं विचारं कुरुषे क १७०
थं मार्कंडेय उवाच ततोऽसाव भवन्मौनी तेनोक्तः पृथिवीपतिः ऋषिस्तु थोद्यतः कर्त्तुं तस्या वैवा
हिकं विधिं तमुद्यतं सा पितरं विवाहाय महात्मने उवाच कन्या सा किंचित्प्रश्रयावनतानना

कन्योवाच यदिमेप्रीतिमांस्तातप्रसादंकर्त्तुमर्हसि रेवतर्क्षेविवाहंमेतत्करोतुप्रसादितः ऋषि
रुवाच रेवतर्क्षंनवैभद्रेचंद्रयोगेव्यवस्थितं अन्यानिसंतिऋक्षाणिसुभ्रुवैवाहिकानिते कन्योवा
च ताततेनविनाकालोविफलःप्रतिभातिमे विवाहोविफलेकालेमद्विधायाःकथंभवेत् ऋषिरु
वाच ऋतवागितिविख्यातस्तपस्वीरेवतिंप्रति चकारकोपंक्रुद्धेनतेनर्क्षंमन्निपातितं मयाचास्मैप्र
तिज्ञाताभार्येतिमदिरेक्षणा नचेच्छसिविवाहंत्वंसंकटंथेःसमागतं कन्योवाच ऋतवाक्स
मुनिस्तातकिमेकंतप्तवांस्तपः नत्वयाममतातेनब्रह्मबंधोःसुतास्मिकं ऋषिरुवाच ब्रह्मबंधोः
सुतानत्वंबालेनैवासितपस्विनः सुतात्वंममयोदेवान्कर्त्तुमन्यान्समुत्सहे कन्योवाच तपस्वी
यदिमेतातस्तत्किमर्थमिदंदिवि समारोप्यविवाहोमेनतत्रक्रियतेपितः ऋषिरुवाच एवंभवतुभ
द्रंतेभद्रेप्रीतिमतीभव आरोपयामीन्दुमार्गेरेवतर्क्षंकृतेतव मार्कंडेयउवाच ततस्तपःप्रभावेन
रेवतर्क्षंमहामुनिः यथापूर्वंतथाचक्रेसोमयोगिद्विजोत्तमः विवाहंचैवदुहितुर्विधिवन्मंत्र

मार्कं० ८२

योधितं निष्पाद्यप्रीतिमान्स भूपो जामातरमथाब्रवीत् औद्वाहिकं ते भूपाल कथ्यतां किं ददाम्यहं दुर्ल्लभमपि
दास्यामि ममाप्रतिहतं तपः राजोवाच मनोः स्वायंभुवस्याहमुत्पन्नः संततौ मुने मन्वंतराधिपं पुत्रं
त्वत्प्रसादाद्वृणोम्यहं मुनिरुवाच भविष्यत्येषते कामो मनुस्त्वत्तनयो महीं सकलां भुज्यते भूपधर्म
विद्भविष्यति मार्कंडेय उवाच तामादाय ततो भूपः स्वमेव नगरं ययौ तस्यांचाजायत सुतो रैवत्यां
रैवतो मनुः समेतः सकलैर्द्धर्म्मैर्म्मानवैरपराजितः विज्ञाताखिलशास्त्रार्थो वेदवित्सकलार्थवित्
तस्य मन्वंतरे देवान् मुनिदेवेंद्रपार्थिवान् कथ्यमानान्मया ब्रह्मन्निबोध सुसमाहितः सुमेधसस्तत्र
देवास्तथा भूतरजो द्विज वैकुंठश्चामिताभाश्च चतुर्द्दश चतुर्द्दश तेषां देवगणानां तु चतुर्ण्णामपि चेश्व
रः नाम्ना विभुरभूदिंद्रः शतयज्ञोपलक्षणः हिरण्यरोमा वेदश्रीः ऊर्द्ध्वबाहुस्तथापरः वेदबाहुः सुधा
मा च पर्ज्जन्यश्च महामुनिः वसिष्ठश्च महाभागो वेदवेदांगपारगा एवमेते महाभागाः सर्वे वेदांगपारगाः
सप्तर्षयश्चासन् रैवतस्यांतरे मनोः बलबंधुर्म्महावीर्य्यः सुयष्टव्यस्तथापरः सत्यकाद्यास्तथैवासन्

पु० ८२

वैवत्तस्यमनोःसुताः वैवत्तांतास्तुमनवःकथितायेमयातव स्वायंभुवोत्वयाद्येतेस्वारोचिषमृतेमनुं इतिमा
र्कंडेयपुराणेवैवत्तमन्वंतरं ॥ ०॥ मार्कंडेयउवाच इत्येतत्कथितंतुभ्यंपंचमन्वंतरंमया चाक्षुषस्यमनोःषष्ठं
श्रूयतामिदमंतरं अन्यजन्मनिजातोसौब्रह्मणःपरमेष्ठिनः ब्राह्मणत्वमतंस्तस्यजन्मन्यस्मिन्नपिद्विजः जातं
मातानिजोत्संगेस्थितमन्नापयद्यथ परित्यजतिछात्रैणापुनःकांतापयद्यथ जातिस्मरःसद्योजातोमातुरु
त्संगमास्थितः जहासतंतदामातासंक्रुद्धावाक्यमब्रवीत् भीतास्मिकिमिदंवत्सहासोयद्वदनेतव
अकालबोधःसंजातःकच्चित्पश्यसिशोभनं पुत्रउवाच मामत्तुमिच्छतिपुरोमार्जारीकिंनपश्यसि
अंतर्द्धानगताचेयंद्वितीयाजातहारिणी पुत्रप्रीत्याचभवतीसहार्द्दामामवेक्षते तथांतर्द्धानगाचेयंद्विती ना
यजातहारिणी पुत्रप्रीत्याचभवतीसहार्द्दामामवेक्षते उत्थाप्योत्थाप्यबहुशःपरित्यजतिमांयतः उद्भूत
पुलकस्नेहसंभवास्राविलेक्षणा ततोममागतोहासःशृणुचाप्यत्रकारणं स्वार्थप्रसक्तामार्जारीप्रस
क्तंमामवेक्षते तथांतर्द्धीगताचेयद्वितीयाजातहारिणी स्वात्वाघस्निग्धहृदयातथैवेतिममोपरि

प्रष्टेनेत्वानुमामास्थायतथैवप्रतिभातिमे किंतुमामुपभोगायमार्जारीजातहारिणी त्वंतुकर्मणोपभोगंस
न्नफलमभीप्ससि नसांजानासिकोप्येषनचैवोपकृतमया संगतंनातिकालीनंपंचसप्तदिनांत
कं तथापिस्निग्धसेसास्त्वापरिस्वजसिचाप्यति तानेतिवसतद्दृंतेनिर्घृणीकंब्रवीसिमां मातोवाच
मार्कं० नदृष्टमुपकारार्थंत्वमप्रीत्यापरिस्वजे नचेदंतद्भवेत्प्रीत्यैःपरिमुक्तोप्यलंत्वया परित्यक्तोमया
१७२ स्वात्येघत्वंत्रोनेभविष्यति इत्युक्त्वासातमुत्सृज्यनिष्क्रांतासूतिकागृहात जातमेवंयकरणांत
172 दंतःकरणात्मकं जहावतंपरित्यक्तंसातदाजातहारिणी साहृत्वांतदावालंविक्रांतस्यमहीभृतः
प्रसूतपत्नीशयनेन्यस्त्वातस्याद्दृदेसुतं तमप्यन्यगृहेनीत्वागृहीत्वातस्यचात्मजं तृतीयंभक्षयामास
मा सातदाजातहारिणी साहृत्वांतदावालंविक्रांतस्यमहीभृतः हृत्वाहृत्वातृतीयंक्रमभक्षयत्यतिनिर्घृणा पु०
करोत्यनुदिनंसातुपरिवर्तंतथान्ययोः विक्रांतोऽपितत्तस्यसुतस्यैवमहीपतिः कारयामाससं १७२
स्कारान्राजन्यस्यभवंतिये आनंदेतिचनामास्यचक्रेविप्रविधानतः मुदापरमयायुक्तोविक्रांतः

सनराधिपः कृतोपनयनंतंतुगुरुराधिसमारकं जनित्र्याःप्रागुपस्थानाक्रियतामभिवादनं सगुरो
स्तद्वचःश्रुत्वाविहास्यदमथाब्रवीत् वंद्यामेकतमामाताजनित्रीपाल्यनीनुकिं गुरुरुवाच नन्विद
यंतेमहाभागजनित्रीजारुथात्मजा विक्रांतस्याग्रमहिषीहैमिनीनामनामतः आनंदउवाच इयंज
नित्रीचैत्रस्यक्षत्रियस्यगृहेद्विज विप्राग्र्यबोधपुत्रस्ययोस्यांजातोन्यतोवद गुरुरुवाच कुतस्त्वंक
थयानंदचैत्रकोवातयोच्यते संकटंमहदाभातिजातोत्रत्वंब्रवीषिकिं आनंदउवाच जातंमा
यानिवृत्तस्यक्षत्रियस्यगृहेद्विज तत्पत्न्यांगिरिभद्रायामादौजातहारिणी तयानुयुक्तेहैमि
न्यागृहीत्वाचसुतस्तथा बोधस्यद्विजमुख्यस्यगृहेनीतवतीपुनः भद्रायामासचस्वतंतस्यबोधद्विज
न्मनः सतत्रद्विजसंस्कारैःसंस्कृतोहैमिनीसुतः वयमत्रमहाभागसंस्कृतोगुरुणात्वया मयातव
वचःकार्यमुपैमिकतमागुरोः गुरुरुवाच अतीवपुत्रगहनांसंकटंमहदागतं नवेद्मिकिंचि
न्मोहेनभ्रमंतीवहिवृद्धयः आनंदउवाच मोहस्यावसरःकोपिजगत्येवंव्यवस्थिते कःकस्य

पुत्रोविप्रर्षेकोवाकस्यचवांधवः आरभ्यजन्मनोनृणांसंवंधीत्वमुपैतियः अन्यसंवंधितोविप्रमृत्युना
सन्निवर्त्तितः अत्रापिजातस्यसतःसंवंधोयोऽस्यवांधवैः सोप्यस्तमंतेदेहस्यप्रयात्येषोऽखिलक्रमः
अतोब्रवीमिसंसारेसरतःकोनवांधवः कोवापिसततंवंधुःकिंवोविभ्राम्यतेमतिः पितृद्वयंमयाप्राप्त
मस्मिन्नेवहिजन्मनि मातृद्वयंचकिंचित्रंयद्वान्यद्देहसंभवैः सोऽहंतपःकरिष्यामित्वयाप्याद्यस्य
मार्कं० ८३ 173
भूपतेः विशालग्राममत्तःपुत्रश्चैत्रंवानीयतामिह मार्कंडेयउवाच ततस्सविस्मितोराजासभार्य्यः
सहवंधुभिः तस्मान्निवर्त्यममतामनुमेनेवनायतं चैत्रंचानीयतनयंराज्ययोग्यंचकारसः संमान्य
ब्राह्मणंयेनपुत्रत्वन्नासपालितः सोप्यानंदस्तपःस्तेपेवालएवमहावने कर्म्मणांक्षपणार्थायविमुक्तेः
परिपंथिनां तपस्यंततत्तंचप्राहदेवःप्रजापतिः किमर्थंतप्यसेवत्सतपस्तीव्रंवदस्वतत् आनंदरु पु० ८३
वाच आत्मनःशुद्धिकामोऽहंकरोमिभगवांस्तपः वंधायममकर्म्माणियानितत्क्षयणोन्मुखः
ब्रह्मोवाच क्षीणाधिकारोभवतिमुक्तियोग्योनकर्म्मवान् सत्वाधिकारणान्मुक्तिमवाप्स्यतिकथं

भवान् मनुर्नाम भविता भाव्यं षष्ठेन व्रजतत्कुरु अनंतेन तपसा तस्मिन् कृते मुक्तिमवाप्स्यसि मार्कंडेय
उवाच इत्युक्तो ब्रह्मणा सोपि तथेत्युक्त्वा महामतिः तत्कर्माभिमुखो जातो न तपसो विरराम ह चाक्षु
षेत्याह तं ब्रह्मा तपसोऽपि निवर्तयन् पूर्वनामा बभूवाथ प्रख्यातश्चाक्षुषो मनुः उपयेमे विदर्भा
सुतां सुग्रस्य भूभृतः तस्यामुत्पादयामास पुत्रान् प्रख्यात विक्रमान् तस्य मन्वंतरेशस्य ये देवास्ते
त्रिदशा द्विज ये च र्षयस्तथैवेंद्रा ये सुताश्चास्य तान् शृणु आर्द्यानाम सुरास्तत्र तेषामेकोष्टको गणः
प्रख्यात कर्मणां विप्र यज्ञे हव्यभुजामयं प्रख्यात बलवीर्याणां प्रभामंडल दुर्दृशां द्वितीयश्च प्रसूता
ख्या देवानामष्टको गणः तथैवाष्टक एवान्योह्व्याख्यो देवतागनः चतुर्थश्च गणस्तत्र पृथगाख्यस्तथाष्टकः
लेखसंज्ञास्तथैवान्यस्तत्र मन्वंतरे द्विज पंचमेच गणो देवास्तत्संख्या ह्यमृताशिनः शतं क्रतूनामाहृत्य यस्ते
षामधिपो भवत् मनोजवस्तथैवेंद्रः संख्यातो यज्ञभागभुक् सुमेधा विरजाश्चैव हविष्मानुत्तमो मधुः
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ऊरुः पुरुः शतद्युम्न प्रमुखाः सुमहाबलाः चाक्षुषस्य मनोः

मया

पुत्राःपृथिवीपतयोऽभवान् एतत्तेकथितंषष्ठंमन्वंतरंद्विजः चाक्षुषस्यतथाजन्मचरितंचमहात्मनः सां
प्रतंवर्त्ततेयोयंनाम्नावैवस्वतोमनुः सप्तमेयंतरेतस्यदेवाद्यास्तन्मसुषवमे इतिमार्कंडेयपुराणेचाक्षुस
मांकं० १७४ 174 मन्वंतरं॥०॥मार्कंडेयउवाच मार्त्तंडस्यरवेर्भार्यातनयाविश्वकर्मणः संज्ञानाममहाभागातस्यां
भानुरजीजनत् मनुंप्रख्यातयशसमनेकज्ञानपारगं विवस्वतसुतोयस्मात्तस्माद्वैवस्वतश्चसः
संज्ञाचारविंदृष्ट्वानिमीलयतिलोचने यतस्ततःसरोषोऽर्कःसंज्ञांवचनमब्रवीत् मयिदृष्टेसदा
यस्मात्कुरुषेनेत्रसंयमं तस्माज्जनिष्यसेमूढेप्रजासंयमनंयमं मार्कंडेयउवाच ततःसाचप
लांदृष्टिंदेवीचक्रेभयाकुला विलोलितदृशंदृष्ट्वापुनराहचतांरविः यस्माद्विलोलितादृष्टिर्मयिदृष्टेत्व पु० १७४
याधुना तस्माद्विलोलांतनयांनदींत्वंप्रसविष्यसि मार्कंडेयउवाच ततस्तस्यांतुसंजज्ञेभर्तृशापेनतेन
वै यमश्चयमुनाचेयंप्रख्यातासुमहानदी सापिसंज्ञारवेस्तेजःसेहेदुःखेनभाविनी असहंतीचसा
तेजश्चिंतयामासवैतदा किंकरोमिक्वगच्छामिक्वगतायाश्चनिर्वृतिः भवेन्ममकथंभर्त्ताकोपमर्कश्च

रिष्यति इतिसंचिंत्यवहुधाप्रजापतिसुतातदा वहुमेनेमहाभागापितृसंश्रयमेवसा ततःपितृगृहंगंतुं
कृतवुद्धिर्यशस्विनी छायामयीमात्मतनुंनिर्म्मिमेदयितांरवेः तांचोवाचत्वयावेश्मन्यत्रभानोर्यथाम
या तथासम्यगपत्येषुवर्त्तितव्यंयथारवौ पृष्टयापिनवाच्यंतेतथैतद्गमनंमम सैवास्मिनामसंयते
तिवाच्यमेतत्कथंचनः छायाःसंज्ञोवाच आकेशग्रहणाद्देवि आसाशापाच्चवचस्तव करिष्येक
थयीष्यामिशापकेशापकर्षणे इत्युक्तासातदादेवीजगामभवनंपितुः ददर्शतत्रत्वष्टारंतपसाधूतक
ल्मषं वहुमानाच्चतेनापिपूजिताविश्वकर्म्मणा तस्थौपितृगृहेकंचित्कालमल्पमनिंदिता ततस्तां
प्राहचार्वंगींपितानातिचिरोषितां स्तुत्वाचतनयांप्रेमवहुमानपुरःसरं त्वांचमेपश्यतोवत्सदिनानिसु
वहून्यपि मुहूर्त्तेनसमानिस्युःकिंतुधर्म्मोविलुप्यते वांधवेषुचिरंवासोननारीणांयशस्करः मनोर
थोवांधवानांनार्य्याभर्तृगृहेस्थितिः सात्वंत्रैलोक्यनाथेनभर्त्रासूर्य्येणसंगता पितुर्गृहेचिरंकालं
वस्तुंनार्हसिपुत्रिके तत्वंभर्तृगृहंगच्छ तुष्टोहंपूजितासिमे पुनरागमनंकार्य्यंदर्शनायशुभेमम।

मार्कंडेयउवाच इत्युक्त्वासातदापित्रातथेत्युक्त्वाचवैमुने संपूजयित्वापितरंजगामाथोत्तरान्कुरून् सूर्य
तापमनिच्छंतीतेजसस्तस्यविभ्यती तपश्चचारतत्रापिवडवारूपधारिणी संज्ञेयमितिमन्वानोद्वितीया
मार्कं० यांदिवस्पतिः जनयामासतनयौकन्यांचैकांमनोरमां छायासंज्ञात्वपत्येषुयथातिष्ठतिवत्सला तथा
१७५ नसंज्ञाकन्यार्थ्यापुत्राद्याश्चानुवर्त्तते लालनाद्युपभोगेषुविशेषमनुवासरं मनुस्तत्क्षांतवानस्या
यमस्तस्यानचक्षमे ताडनायततःकोपात्पादस्तेनसमुद्यतः तस्याःपुनःक्षांतिमतानतुदेहेनिपाति
175
तः ततःशशापतंकोपात्छायासंज्ञायमंद्विज। किंचित्प्रस्फुरमाणोष्ठीविचलत्पाणिपल्लवा पितुः
पत्नीममर्यादयन्मांतर्जयसेपदा भुवितस्मादयंपादस्तवाद्यैवपतिष्यति मार्कंडेयउवाच इत्याक
र्ण्ययमःशापंमात्रादत्तंभयातुरः अभ्येत्यपितरंप्राहप्रणिपत्यपुनःपुनः तातैतन्महदाश्चर्यंनदृष्टमि पु०
तिकेनचित मातावात्सल्यमुत्सृज्यशापंपुत्रेप्रयच्छति यथामनुर्ममाचष्टेनेयंमातातथामम विगु १७५
णेष्वपिपुत्रेषुनमाताविगुणाभवेत् मार्कंडेयउवाच यमस्यैतद्वचःश्रुत्वाभगवांस्तिमिरापहः

छायासंज्ञामथार्कश्चपप्रच्छक्वगतेतिसा साचाहतनयात्वष्टुरहंसंज्ञाविभावसोः पत्नीतवत्वयापत्यान्येता
निजनितानिवै॥ इत्थंविवस्वतस्तांतुबहुशःपृच्छतोयदा नाचचक्षेततःक्रुद्धोभास्वांस्तांशप्तुमुद्यतः
ततःसाकथयामासयथावृत्तंविवस्वतः विदितार्थश्चभगवान्जगामत्वष्टुरालयं ततःसंपूजयामास
त्वष्टात्रैलोक्यपूजितं भास्वंतंपरयाभक्त्यानिजगेहमुपागतं संज्ञांपृष्टस्ततस्तस्मैकथयामासविश्वकृत्
आगतैरेहमेवेश्मभवतःप्रेषितेतिवै दिवाकरःसमाधिस्थोवडवारूपधारिणी तपश्चरंतीकुदृशे
उत्तरेषुकुरुष्वथ सौम्यमूर्तिःशुभाकारोममभर्ताभवेदिति अभिसंधिंचतपसाबुद्ध्वाचास्यादिवा
करःशातंतेजसामेत्पक्रियतामितिभास्करः तंचाहविश्वकर्माणंसंज्ञायाःपितरंद्विजा संवत्सरंभ्रमि
स्तस्यविश्वकर्मारवेस्ततः तेजसःशातनंचक्रेस्तूयमानःसदैवतैः इतिमार्कंडेयपुराणेवैवस्वतेमन्वंतरे
॥०॥मार्कंडेयउवाच ततस्तंतुष्टुवुर्देवास्तथादेवर्षयोरविं वाग्भिरीड्यमशेषस्यत्रैलोक्यस्यसमागताः
देवाऊचुः नमस्तेऋक्स्वरूपायसामरूपाययेनमः यजुःस्वरूपरूपायसाम्नांधामवतेनमः ज्ञानैकदे

मार्कं० १७६ 176 ह्यभूतायनिर्वृतनमस्तेनमः शुद्धज्योतिःस्वरूपायविशुद्धायामलात्मने वरिष्ठायवरेण्यायपरस्मैपरमात्मने
नमोखिलजगद्व्याप्तिस्वरूपायात्ममूर्त्तये सर्वकारणभूतायनिष्ठायैज्ञानचेतसां नमःसूर्य्यस्वरूपायप्र
काशात्मस्वरूपिणे भास्करायनमस्तुभ्यंतथादिनकृतेनमः सर्वरीहेतवेचैवसंध्याज्योत्स्नाकृतेनमः
त्वंसर्वमेतद्भगवान्युगपद्भ्रमतात्वया भ्रमत्यविद्धमखिलंब्रह्मांडंसचराचरं त्वदंशुभिरिदंसर्वसंस्पृ
ष्टंजायतेशुचिः क्रियतेत्वत्करस्पर्शाज्जलादीनांपवित्रता होमदानादिकोधर्मोनोपकारायजायते
तावद्यावन्नसंयोगीजगदेतत्त्वदंशुभिः ऋचस्तेसकलाह्येतायजूंष्येतानितान्यतः सकलानिचसा
मानिनिपतंतित्वदंगतः ऋङ्मयस्त्वंजगन्नाथत्वमेवचयजुर्मयः यतःसाममयश्चैवततोनाथत्रयीमयः
त्वमेवब्रह्मणोरूपंपरंचापरमेवच मूर्त्तामूर्त्तस्तथासूक्ष्मःस्थूलरूपस्तथास्थितः निमेषकाष्ठादिमयःकाल पु० १७६
रूपःक्षयात्मकः प्रसीदस्वेच्छयारूपंस्वंतेजस्तमपाकुरु इतिमार्कंडेयपुराणे ॥०॥ मार्कंडेयउवाच
एवंसंस्तूयमानस्तुदेवैर्देवर्षिभिस्तथा मुमोचस्वंतदातेजस्तेजसांराशिरव्ययः यत्तस्यऋग्भवंतेजोभ

त्रिशांतेनमेदिनी यज्जुर्मयेनापिदिवंस्वयंसाममयंरवेः शातितास्तेजसोभागायेत्वष्टादशपंचच दृष्टाच
तेनसर्वस्यकृतंशूलंमहात्मा चक्रंविष्णोर्वसूनांचशंकरोऽथसुदारुणाः पावकस्यतथाशक्तिः शिवि
काधनदस्यच अन्येषांचसुरारीणांशस्त्राण्युग्राणियानिवै यक्षविद्याधराणांचतानिचक्रे सवि
श्वकृत् ततश्चषोडशंभागंविभार्त्तिभगवान्रविः तत्तेजः पंचदशधाशातितंविश्वकर्मणा ततोऽ
श्वरूपधृक्भानुरुत्तमामगमत्कुरून् ददृशेतत्रसंज्ञांचवडवारूपधारिणीं साचदृष्ट्वातमायां
तंपरपुंसोविशंकया जगामसंमुखंसंज्ञापृष्ठरक्षणतत्परा ततश्चनासिकायोगंतयोस्तनसमेतया नासत्यद
स्रौतनयावश्वीवक्त्रविनिर्गतौ रेतसोंतेचरेवंतखड्गीधन्वीतनुत्रधृक् अश्वारूढःसमुद्भूतोवाणतूणसमन्वि
तः ततःस्वरूपममलंदर्शयामासभानुमान् तस्मैसाचसमालोक्यस्वरूपंस्वमाददे स्वरूपधारिणींचेमा
मानिनानिजाश्रमं संज्ञांभार्यांप्रीतिमंतींभास्करोवारितस्करः ततःपूर्वसुतोयोस्याःसोभूद्वैवस्वतोमनुः
द्वितीयश्चयमःशापाद्धर्मदृष्टिरभूत्ततः कृमयोमांसमादायपादतोऽस्यमहीतले पतिष्यंतीतिशापां

तंतस्यचक्रेपितास्वयं धर्मदृष्टिर्यतश्चासीत्समोमित्रेतथाहिते ततोनियोगेतंयाम्येचकारतिमिरापहः
यमुनाचनदीजज्ञेकालिंदीपुनरवाहिनी अश्विनौदेवभिषजौकृतौपित्रामहात्मना गुह्यकाधिपति
त्वेचरेवंतोपिनियोजितः छायासंज्ञासुतानांचनियोगःश्रूयतांमम पूर्वजस्यमनोस्तुल्यश्छायासंज्ञा
मार्कं० १७७ 177 सुतोग्रजः ततःसावर्णिकींसंज्ञामवापतनयोरवे भविष्यतिमनुःसोपिबलिरिंद्रोभविष्यति शनै
श्चरोग्रहाणांचमध्येपित्रानियोजितः तयोस्तुतीयायाकन्यातपतीनामसाकुरुन् नृपात्संवर
णात्पुत्रमवापमनुजेश्वर तस्यवैवस्वतस्याहंमनोःसप्तममंतरं कथयामिसुतान्भूपान्ऋषीन्देवान्
सुराधिपान् इतिमार्कंडेयपुराणेवैवस्वतोत्पत्तिः ॥०॥ मार्कंडेयउवाच आदित्यावसवोरुद्राःसाध्या पु० १७७
विश्वेमरुद्गणाः भृगवोंगिरसश्चाष्टौरुद्रदेवगणास्तथा आदित्यावसवोरुद्राविज्ञेयाःकश्यपात्म
जाः साध्याश्चवसवोविश्वेधर्मपुत्रागणास्त्रयः भृगोस्तुभार्गवाःपुत्राह्यंगिरसोंगिरसःस्मृताः एषस
र्गस्तुमारीचोविज्ञेयःसांप्रताधिपः तेजस्वीनामचात्रेंद्रोमहात्मायज्ञभागभुक् अतीतानागतायेच

वर्त्ततेसांप्रतंवघे सर्वेतेत्रिदशेंद्रावैविज्ञेयास्तुल्यलक्षणाः सहस्राक्षाकुशलिनःसर्वएवपुरंदराः
मघवंतोवृषाःसर्वेशृंगिणोगजगामिनः तेशतक्रतवःसर्वेभूताहभवतेजसः धर्माद्यैःकारणैः
शुद्धैराधिपत्यगुणान्विताः भूतभव्यभवन्नाथाशृणुचैतत्त्रयंद्विज भूर्लोकोयंस्मृताभूमिरंतरि
क्षंभुवःस्मृतं दिव्याख्यश्चमतःस्वर्गस्त्रैलोक्यमितिगद्यते अत्रिश्चैववसिष्ठश्चकाश्यपश्चमहा
नृषिः गौतमःसभरद्वाजोविश्वामित्रश्चकौशिकः तथैवपुत्रोभगवानृचीकस्यमहात्मनः
जमदग्निश्चसप्तैतेमुनयश्चतथांतरे इक्ष्वाकुर्नाभगश्चैवधृष्टःपर्यातिरेवच नरिष्यंतश्चवि
ख्यातोनाभोगोदिष्टएवच करूषश्चपृषध्रश्चभूमिपालोकविश्रुताः मनोर्वैवस्वतस्यैतेनवपुत्राः
प्रकीर्त्तिताः वैवस्वतमिदंब्रह्मन्कथितंतेमयांतरं अस्मिन्श्रुतेनरःसद्यःपठितेचैवसत्तमः
मुच्यतेपातकैःसर्वैःपुण्यंचसमवप्नुते इतिमार्कंडेयपुराणेवैवस्वतकीर्त्तनं ॥७॥ क्रौष्टुकिरु
वाच स्वायंभुवाद्याःकथिताःसप्तैतेमनवोमम तदंतरेषुयेदेवाराजानोमुनयस्तथा तस्मि

मार्कं० १७८ 178

नूकल्पेसप्तमेऽन्येभविष्यंतिमहात्मने मनवस्तानूसमावज्ञंतेषुदेवादयश्चये मार्कंडेयउवाच
कथितास्तवसावर्णिश्छायासंज्ञासुतास्तुयः पूर्वजस्यमनोस्तुल्यःसमनुर्भवितामः शरामोव्यासो
गालवश्चदीप्तिमान्कृपएवच ऋष्यशृंगस्तथाद्रौणिस्तत्रसप्तर्षयोभवन् सुतपाश्चामिताभा
श्चमुख्याश्चैवत्रिधासुराः विंशकःकथितश्चैषांत्रयाणांत्रिगुणोगणः तपस्तप्तश्चचक्रश्चसुति
र्ज्योतिप्रभाकरः प्रभासोदयितोधर्मस्तेजोरश्मिःसुरःक्रतुः इत्यादिकश्चसुतपादेवानांविंश
कोगणः प्रभुर्विभुर्विभासाद्यस्तथान्योविंशकोगणः सुराणाममिताभानांतृतीयमपिमेशृ
णु दमोदांतऋभासोमाश्विंतायाश्चैकविंशतिः मुख्याश्चैतेसमाख्यातादेवामन्वंतराधिपाः पु० ७८
मारीचस्यैवतेपुत्राःकाश्यपस्यप्रजापतेः भविष्यस्यभविष्यंतिसावर्णस्यांतरेमनोः तेषामिंद्रो
भविष्यस्तुवलिर्वैरोचनिर्मुनिः पातालेचास्तियोस्याद्यापिदैत्यःसमयवंधनः विरजाश्चार्ववरीवां
श्चनिर्मोहःसत्यवाक्कृतिः विष्णाद्याश्चैवतनयासावर्णस्यमनोर्नृपाः इतिमार्कंडेयपुराणे

सावर्निक मन्वंतरं ॥०॥ मार्कंडेय उवाच ॥ सावर्निः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥ निशामयत
दुत्पत्तिं विस्तराद्गतो मम १ महामायानुभावेन यथा मन्वंतराधिपः ॥ स बभूव महाभागः सावर्निस्तन
यो रवेः २ स्वारोचिषेंऽतरे पूर्वं चैत्रवंशसमुद्भवः ॥ सुरथो नाम राजाभूत्समस्ते क्षितिमंडले ३ तस्य पालय
तः सम्यक् प्रजाः पुत्रानिवौरसान् ॥ बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तथा ४ तस्य तैरभवद्युद्ध
मतिप्रबलदंडिनः ॥ न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ५ ततः स्वपुरमायातो निजदेशाधिपो
ऽभवत् ॥ आक्रांतः स महाभागस्तैस्तदा प्रबलारिभिः ६ अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ॥
कोषो बलं चापहृतं तत्रापि स्वपुरे ततः ७ ततो मृगयाव्याजेन हृतःस्वाम्यः स भूपतिः ॥ एकाकी हयमा
रुह्य जगाम गहनं वनं ८ स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः ॥ प्रशांतश्वापदाकीर्णं मुनिशिष्यो
पशोभितं ९ तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः ॥ इतश्चेतश्च विचरंस्तस्मिन्मुनिवरा
श्रमे १० सोऽचिंतयत्तदा तत्र ममत्वाकृष्टचेतनः ॥ मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ११ मद्

मां॰ के॰ २८५

179

मैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥ न जाने स प्रधानो मे शूरहस्ती सदामदः १२ मम वैरिवशं जातः कान्भो
गानुपलप्स्यते ॥ ये ममानुगता नित्यं प्रसाददधनभोजनैः १३ अनुवृत्तिं ध्रुवं तेद्य कुर्वंत्यन्यमहीभृतां ॥
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययं १४ संचितः सोतिदुःखेन क्षयं कोषो गमिष्यति ॥ एतच्चा
न्यच्च सततं चिंतयामास पार्थिवः १५ तत्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः ॥ स पृष्टस्तेन कस्त्वं भो
हेतुश्चागमनेत्र कः १६ सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ॥ इत्याकर्ण्य वचस्तस्य भूपतेः प्र
णयोदितं १७ प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपं ॥ वैश्य उवाच ॥ समाधिर्नाम वैश्योहमुत्पन्नो ध
निनां कुले १८ पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥ विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनं १९ वनम
भ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः ॥ सोहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकां २० प्रवृत्तिं स्वजनानां
च दाराणां चात्र संस्थितः ॥ किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतं २१ कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु
मे सुताः ॥ राजोवाच ॥ यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः २२ तेषु किं भवतः स्नेहमनुबध्ना

कु

पु॰ २८५

तिमानसं ॥ वैश्य उवाच ॥ एवमेतत्तयथा प्राह भवानस्मद्गतं वच २३ किं करोमि न वध्नाति मम निष्ठुरतां
मनः ॥ यैः संत्यज्य पितृस्नेहं धनलुब्धै निराकृतः २४ पतिस्वजनहार्दं च हार्द्दि तेष्वेव मे मनः ॥ किमेतन्नाभि
जानामि जानन्नपि महामते २५ यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु ॥ तेषां कृते मे निश्वासो दौर्मनस्यं
च जायते २६ करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरं ॥ मार्कंडेय उवाच ॥ ततस्तौ सहितौ विप्र तं मुनिं
समुपस्थितौ २७ समाधिर्नाम वैश्योसौ स च पार्थिवसत्तमः ॥ कृत्वा तु तौ यथान्यायं यथार्हं तेन संवि
दं २८ उपविष्टौ कथाः काश्चिच्चक्रतु वैश्यपार्थिवौ ॥ राजोवाच ॥ भगवंस्त्वामहं प्रष्टुमिछाम्येकं वद
स्वतत् २९ दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥ ममत्वं मम राज्यस्य राज्यांगेष्वखिलेष्वपि ३० जानतोपि
यथाज्ञस्य किमेतन्मुनिसत्तम ॥ अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ३१ स्वजनेन च संत्यक्तस्तेषु हा
र्द्दी तथाप्यति ॥ एवमेष तथाहं च द्वावप्यत्यंतदुःखितौ ३२ दृष्टदोषेपि विषये ममत्वाकृष्टचेतसौ ॥ तत्केनै
तन्महाभाग यन्मोहो ज्ञानिनोरपि ३३ ममामास्य च भवत्येषा विवेकांधस्य मूढता ॥ ऋषिरुवाच ॥ ज्ञानम

स्तिसमस्तस्यजंतोर्विषयगोचरे ४७ विषयश्च महाभागयांतिचैवंपृथक्पृथक् ॥ दिवांधाः प्राणिनः के
चिद्रात्रावंधास्तथापरे ४८ केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः ॥ ज्ञानिनो मनुजाः सत्यंकिंतुतेन
मा॰के॰ हिकेवलं ४९ यतोहिज्ञानिनः सर्वेपशुपक्षिमृगादयः ॥ ज्ञानंचतन्मनुष्याणां यत्तेषांमृगपक्षिणां ५०
१८० मनुष्याणांचयत्तेषांतुल्यमन्यत्तथोभयोः ॥ ज्ञानेपिसतिपश्यैतान्पतंगांछावचंचुषु ५१ कणमोक्षादृ
तान्मोहात्पीड्यमानानपिक्षुधा ॥ मानुषामनुजव्याघ्रसाभिलाषाः सुतान्प्रति ५२ लोभात्प्रत्युपकारा त्ति
यनन्वेतेकिंनपश्यसि ॥ तथापिममतावर्त्तेमोहगर्त्तेनिपातिताः ५३ महामायाप्रभावेनसंसारस्थिति
कारिणा ॥ तन्नात्रविस्मयः कार्योयोगनिद्राजगत्पतेः ५४ महामायाहरेश्चैतत्तयासंमोह्यतेजगत् ॥ ज्ञानिना पु॰
मपिचेतांसिदेवीभगवतीहिसा ५५ बलादाकृष्यमोहायमहामायाप्रयच्छति ॥ तयाविसृज्यतेविश्वंजगदे १८०
तच्चराचरं ५६ सैषाप्रसन्नावरदानृणांभवतिमुक्तये ॥ साविद्यापरमामुक्तेर्हेतुभूतासनातनी ५७ संसार
बंधहेतुश्चसैवसर्वेश्वरेश्वरी ॥ राजोवाच ॥ भगवन्काहिसादेवीमहामायेतियांभवान् ५८ ब्रवीतिक

४६

यमुत्पन्नासाकर्म्मास्याश्चकिंद्विज॥यत्स्वभावाचसादेवीयत्स्वरूपायदुद्भवा४६तत्सर्वंश्रोतुमिच्छामित्वत्तो
ब्रह्मविदांवर॥ऋषिरुवाच॥नित्यैवसाजगन्मूर्त्तिस्तयासर्वमिदंततं॥तथापितत्समुत्पत्तिर्बहुधाश्रूयतां
मम४७देवानांकार्य्यसिद्ध्यर्थमाविर्भवतिसायदा॥उत्पन्नेतितदालोकेसानित्याप्यभिधीयते४८योगनि
द्रांयदाविष्णुर्जगत्येकार्णवीकृते॥आस्तीर्य्यशेषमभजत्कल्पांतेभगवान्प्रभु४९तदाद्वावसुरौघोरौवि
ख्यातौमधुकैटभौ॥विष्णुकर्णमलोद्भूतौहंतुंब्रह्माणमुद्यतौ५०सनाभिकमलेविष्णोःस्थितोब्रह्माप्रजाप
ति॥दृष्ट्वातावसुरौचोग्रौप्रसुप्तंचजनार्दनं५१तुष्टावयोगनिद्रांतामेकाग्रहृदयस्थितः॥विबोधनार्थायहरेर्हरि
नेत्रकृतालयं५२विश्वेश्वरींजगद्धात्रींस्थितिसंहारकारिणीं॥निद्रांभगवतींविष्णोरतुलांतेजसप्रभु५३ब्रह्मो
वाच॥त्वंस्वाहात्वंस्वधात्वंहित्वंवषट्कारस्वरात्मिका॥सुधात्वमक्षरेनित्येत्रिधामात्रात्मिकास्थिता१अर्द्ध
मात्रास्थितानित्यायानुच्चार्य्याविशेषतः॥त्वमेवसात्वंसावित्रीत्वंदेविजननीपरा२त्वयैवधार्य्यतेसर्वंत्वयै
तत्सृज्यतेजगत॥त्वयैतत्पाल्यतेदेवित्वमत्स्यंतेचसर्वदा३विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपालने॥तथासंह

तिरूपांते जगतोस्य जगन्मये ४ महाविद्या महामाया महामेधा महास्मृतिः ॥ महामोहा च भवती महादेवी
महासुरी ५ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ६ त्वं श्री
स्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च ७ खड्गिनी शूलिनी
मार्कं॰ घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ८ सौम्या सौम्यतराशेषसौम्येभ्य
१८१ स्त्वतिसुंदरी ॥ परापराणां परमा त्वमेव परमेश्वरी ९ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥
181 तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा १० यया त्वया जगत्स्रष्टा जगत्पातात्ति यो जगत् ॥ सोपि निद्राव
शं नीतः कस्त्वां स्तोतुमिहेश्वरः ११ विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतोतस्त्वां कः स्तोतुं श
क्तिमान्भवेत् १२ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ १३ प्रबो पु॰
धं च जगत्स्वामी नीयतामच्युतो लघु ॥ बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ ॥ ऋषिरुवाच ॥ एवं स्तुता १८१
तदा देवी तामसी तत्र वेधसा ॥ विष्णोः प्रबोधनार्थाय निहंतुं मधुकैटभौ १४ नेत्रास्यनासिकाबाहुहृद

येस्यप्रत्ययोरसः॥ निर्गमस्यदर्शनेतस्थौब्रह्मणोव्यक्तजन्मनः ६९ उत्तस्थौचजगन्नाथस्तयामुक्तोजनार्दनः॥
एकार्णवेहिशयनात्ततःसददृशेचतौ ७० मधुकैटभौदुरात्मानावतिवीर्यपराक्रमौ॥ क्रोधरक्तेक्षणावत्तुं
ब्रह्माणंजनितोद्यमौ ७१ समुत्थायततस्ताभ्यांयुयुधेभगवान्हरिः॥ पंचवर्षसहस्राणिबाहुप्रहरणो
विभुः ७२ तावप्यतिबलोन्मत्तौमहामायाविमोहितौ॥ उक्तवंतौवरोस्मत्तोव्रियतामितिकेशवं ७३ भग
वानुवाच॥ भवेतामद्यमेतुष्टौममवध्यावुभावपि॥ किमन्येनवरेणात्रएतावद्धिवृतंमम ७४ ऋषिरुवाच
वंचिताभ्यामितितदासर्वमापोमयंजगत्॥ विलोक्यताभ्यांगदितोभगवान्कमलेक्षणः ७५ प्रीतौस्वस्तव
युद्धेनश्लाघ्यस्त्वंमृत्युरावयोः॥ आवांजहिनयत्रोर्वीसलिलेनपरिप्लुता ७६ ऋषिरुवाच॥ तथेत्युक्त्वाभग
वताशंखचक्रगदाभृता॥ कृत्वाचक्रेणवैछिन्नेजघनेशिरसीतयोः ७७ एवमेषासमुत्पन्नाब्रह्मणासंस्तु
तास्वयं॥ प्रभावमस्यादेव्यास्तुभूयःशृणुवदामिते ७८ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमा
हात्म्येमधुकैटभवधोध्यायः१ ऋषिरुवाच॥ देवासुरमभूद्युद्धंपूर्णमब्दशतंपुरा॥ महिषेसुराणामधि

पेदेवानांचपुरंदरे१तत्रासुरैर्म्महावीर्यैर्द्देवसैन्यंपराजितं॥जित्वाचसकलांदेवानिंद्रोभून्महिषासुर२
ततःपराजितादेवाःपद्मयोनिंप्रजापतिं॥पुरस्कृत्यगतास्तत्रयत्रेषगरुडध्वजौ३यथावृत्तंतयोस्तद्वन्महि
मार्कं० १८२ षासुरचेष्टितं॥त्रिदशाःकथयामासुर्द्देवाभिभवविस्तरं४सूर्येंद्राग्न्यनिलेंदूनांयमस्यवरुणस्यच॥अ
न्येषांचाधिकारान्सस्वयमेवाधितिष्ठति५स्वर्गान्निराकृताःसर्वेतेनदेवगणाभुवि॥विचरंतियथा
182 मर्त्यामहिषेणदुरात्मना६एतद्वःकथितंसर्वममरारिविचेष्टितं॥शरणंचप्रपन्नाःस्मोवधस्तस्यविचिं
त्यतां७इत्थंनिशम्यदेवानांवचांसिमधुसूदनः॥चकारकोपंशंभुश्चभ्रकुटीकुटिलाननौ८ततोति
कोपपूर्णस्यचक्रिणोवदनात्ततः॥निश्चक्राममहत्तेजोब्रह्मणःसंकरस्यच९अन्येषांचैवदेवानांशक्रा पु०
दीनांशरीरतः॥निर्गतंसुमहत्तेजस्तच्चैक्यंसमगछत१०अतीवतेजसःकूटंज्वलंतमिवपर्वतं॥ददृशुस्ते १८२
सुरास्तत्रज्वालाव्याप्तदिगंतरं११अतुलंतत्रतत्तेजःसर्वदेवशरीरजं॥एकस्थंतदभून्नारीव्याप्तलोकत्र
यंत्विषा१२यदभूत्सांभवंतेजस्तेनाजायततन्मुखं॥याम्येनचाभवन्केशाबाहवोविष्णुतेजसा१३सौम्ये

नस्तनयोर्युग्मंमध्यंचैंद्रेणाचाभवत॥वारुणेनचजंघोरुनितंवस्तेजसाभुव॥१४॥ब्रह्मणस्तेजसादौतदंगुल्यो
र्कतेजसा॥वसूनांचकरांगुल्यः कौवेरेनचनासिका॥१५॥तस्यास्तुदंताःसंभूताप्राजापत्येनतेजसा॥नयन
त्रितयंजज्ञेतथापावकतेजसा॥१६॥भ्रुवौचसंध्ययोस्तेजः श्रवणावानलस्यच॥अन्येषांचैवदेवानांसंभ
वस्तेजसांशिवा॥१७॥ततःसमस्तदेवानांतेजोराशिसमुद्भवां॥तांविलोक्यमुदंप्रापुरमरामहिषार्दिता॥१८॥
शूलंशूलाद्विनिष्कृष्यददौतस्यैपिनाकधृक॥चक्रंचदत्तवान्कृष्णःसमुत्पाद्यस्वचक्रत॥१९॥शंखंचव
रुणः शक्तिंददौतस्यैहुताशनः॥मारुतोदत्तवांश्चापंवाणपूर्णेतथेषुधी॥२०॥वज्रमिंद्रःसमुत्पाद्यकुलि
शादमराधिपः॥ददौतस्यैसहस्राक्षोघंटामैरावताद्गजात॥२१॥कालदंडाद्यमोदंडंपाशंचांबुपतिर्ददौप्र
जापतिश्चाक्षमालांददौब्रह्माकमंडलुं॥२२॥समस्तरोमकूपेषुनिजरश्मीदिवाकरः॥कालश्चदत्तवान्खं
ड्गंतस्याश्चर्मचनिर्मलं॥२३॥क्षीरोदश्चामलंहारमजरेचतथांवरे॥चूडामनिंतथादिव्यंकुंडलेकटका
निच॥२४॥अर्द्धचंद्रंतथाशुभ्रंकेयूरान्सर्ववाहुषु॥नूपूरौविमलौतद्वद्ग्रैवेयकमनुत्तमं॥२५॥अंगुलीयक

मार्कं० १८३
183

रत्नानि समस्तान्यंगुलीषु च ॥ विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलं २६ अस्त्राण्यनेकरूपाणि तथाभेद्यं च
दंशनं ॥ अम्लानपंकजां मालां शिरस्युरसि चापरां २७ अददज्जलधिस्तस्यै पंकजं चातिशोभनं ॥ हिमवान्
वाहनं सिंहं रत्नानि विविधानि च २८ ददावशून्यं सुरया पानपात्रं धनाधिपः ॥ शेषश्च सर्वनागेशो महाम
णिविभूषितं २९ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमां ॥ अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ३० सम्मानि
ता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥ तस्या नादेन घोरेण कृत्स्नमापूरितं नभ ३१ अमायतातिमहता प्रति
शब्दो महानभूत् ॥ चुक्षुभुः सकला लोकाः समुद्राश्च चकंपिरे ३२ चचाल वसुधा चेलुः सकलाश्च मही
धराः ॥ जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीं ३३ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ॥ दृष्ट्वा सम पु० १८३
स्तं संक्षुब्धं त्रैलोक्यममरारयः ३४ सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ३५ आः किमेतदिति क्रोधा
दाभाष्य महिषासुरः ३६ अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥ स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ३७
पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बरं ॥ क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन तां ३८ दिशो भुज

सहस्रेणासमंताद्याप्यसंस्थितान्॥ततःप्रववृतेयुद्धंतयादेव्यासुरद्विषां॥३९॥शस्त्रास्त्रैर्बहुधामुक्तैरादीपित
दिगंतरं॥महिषासुरसेनानीश्चिक्षुराख्योमहासुर॥४०॥युयुधेचामरश्चान्यैश्चतुरंगबलान्वितः॥रथा
नामयुतैःषड्भिरुदग्राख्योमहासुरः॥४१॥अयुध्यतायुतानांचसहस्रेणमहाहनुः॥पंचाशद्भिश्चनियु
तैरसिलोमामहासुर॥४२॥अयुतानांशतैःषड्भिर्बाष्कलोयुयुधेरणे॥गजवाजिसहस्रौघैरनेकैःप
रिवारितः॥४३॥वृतोरथानांकोट्याचयुद्धेतस्मिन्नयुध्यत॥बिडालाख्योयुतानांचपंचाशद्भिरथायुतैः॥४४॥
युयुधेसंयुगेतत्ररथानांपरिवारितः॥अन्येचतत्रायुतशोरथनागहयैर्वृताः॥४५॥युयुधुःसंयुगेदेव्या
सहतत्रमहासुराः॥कोटिकोटिसहस्रैस्तुरथानांदंतिनांतथा॥४६॥हयानांचवृतोयुद्धेतत्राभून्महिषा
सुरः॥तोमरैर्भिंदिपालैश्चशक्तिभिर्मुसलैस्तथा॥४७॥युयुधुःसंयुगेदेव्याखड्गैःपरशुपट्टिशैः॥केचिच्चचि
क्षिपुःशक्तीःकेचित्पाशांस्तथापरे॥४८॥देवींखड्गप्रहारैस्तुतेतांहंतुंप्रचक्रमुः॥सापिदेवीततस्तानिश
स्त्राण्यस्त्राणिचंडिका॥४९॥लीलयैवप्रचिच्छेदनिजशस्त्रास्त्रवर्षिणी॥अनायस्ताननादेवीस्तूयमानासु

र्षिभिः ॥५०॥ मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥ सोऽपि क्रुद्धो धुतशटो देव्या वाहनकेशरी ॥५१॥ चचारा
सुरसैन्येषु वनेष्विव हुताशनः ॥ निश्वासान्मुमुचे यांश्च युध्यमाना रणेंबिका ॥५२॥ त एव सद्यः संभू
ता गणाः शतसहस्रशः ॥५३॥ युयुधुस्ते परशुभिर्भिंदिपालासिपट्टिशैः ॥ नाशयंतोऽसुरगणान्देवीश
मा०र्कं० १८५ क्त्युपबृंहिताः ॥५४॥ अवादयंत पटहान्गणाः शंखांस्तथापरे ॥ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहो
त्सवे ॥५५॥ ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ॥ खड्गादिभिश्च शतशो निजघान महासुरान् ॥५६॥
184 पातयामास चैवान्यान्घंटास्वनविमोहितान् ॥ असुरान्भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ॥
केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥५७॥ विपोथिता शरौघेन गदया भुवि शेरते ॥ वेमुश्च केचि पु०
द्रुधिरं मुषलेन भृशं हताः ॥५८॥ केचिन्निपातिता भूमौ भिन्नाः शूलेन वक्षसि ॥ निरंतराः शरौघेन कृ १८५
ताः केचिद्रणाजिरे ॥५९॥ श्येनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ॥ केषांचिद्बाहवश्छिन्ना
श्छिन्नग्रीवास्तथापरे ॥६०॥ शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥ विच्छिन्नजंघास्त्वपरे पेतुरु

र्यो महासुरा॥ ६१ एकबाह्वक्षिचरणाः केचिद्देव्या द्विधाकृताः॥ छिन्नेपि चान्ये शिरसि पतिताः पुनरु
त्थिताः॥ ६२ कबंधाः युयुधुर्देव्या गृहीतपरमायुधाः॥ ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः॥ ६३ कबंधा
श्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः॥ तिष्ठतिष्ठेति भाषंतो देवीमन्ये महासुराः॥ ६४ पातितै रथनागाश्वै
रसुरैश्च वसुंधरा॥ अगम्या साभवत्तत्र यत्राभूत्स महारणः॥ ६५ शोणितौघा महानद्यः सद्यस्तत्र विसु
स्रुवुः॥ मध्ये चासुरसैन्यस्य वारणासुरवाजिनां॥ ६६ क्षणेन तन्महासैन्यमसुराणां तथांबिका॥ निन्ये
क्षयं यथा वह्निस्तृणदारुमहाचयं॥ ६७ स च सिंहो महानादमुत्सृजन्धुतकेशरः॥ शरीरेभ्योऽमरा
रीणामसूनिव विचिन्वति॥ ६८ देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः॥ यथैषां तुतुषुर्देवाः पुष्पवृष्टिमु
६९ चो दिवि॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरसैन्यवधः॥ ऋषि
रुवाच॥ निहन्यमानं तत्सैन्यमवलोक्य महासुरः॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकां॥
स देवी शरवर्षेण ववर्ष समरेसुरः॥ यथा मेरुगिरेः शृंगं तोयवर्षेन तोयदः॥ तस्य छित्वा ततो देवी ली

लयैवशरोत्करान॥ जघानतुरगान्वाणैर्यंतारंचैववाजिनां ३ चिछेदचधनुःसद्योध्वजंचातिसमु
छ्रितं॥ विव्याधचैवगात्रेषुछिन्नधन्वानमाशुगैः ४ सछिन्नधन्वाविरथोहताश्वोहतसारथिः॥ अभ्य
धावततांदेवींखड्गचर्मधरोसुरः ५ सिंहमाहत्यखड्गेनतीक्ष्णधारेणमूर्द्धनि॥ आजघानभुजेसव्ये
मा॰के॰ देवीमप्यतिवेगवान् ६ तस्याःखड्गोभुजंप्राप्यपफालनृपनंदन॥ ततोजग्राहशूलंसकोपादरुण
१८५ लोचनः ७ चिक्षेपचततस्तत्तुभद्रकाल्यांमहासुरः॥ जाज्वल्यमानंतेजोभीरविबिंबमिवांवरात् ८
185 दृष्ट्वातदापतच्छूलंदेवीशूलममुंचत॥ तच्छूलंशतधातेननीतंसचमहासुरः ९ हतेतस्मिन्महावी
र्येमहिषस्यचमूपतौ॥ आजगामगजारूढश्चामरस्त्रिदशार्दनः १० सोपिशक्तिंमुमोचाथदेव्यास्तामंबि
काद्रुतं॥ हुंकाराभिहतांभूमौपातयामासनिष्प्रभां ११ भग्नांशक्तिंनिपतितांदृष्ट्वाक्रोधसमन्वितः॥ पु॰
चिक्षेपचामरःशूलंबाणैस्तदपिसाछिनत् १२ ततःसिंहःसमुत्पत्यगजकुंभांतरस्थितः॥ बाहुयुद्धे १८५
नयुयुधेतेनोच्चैस्त्रिदशारिणा १३ युध्यमानौततस्तौतुतस्मान्नागान्महींगतौ॥ युयुधातेतिसंरब्धौप

हारैरतिदारुणैः १४ ततोवेगात्खमुत्पत्यनिपत्यचमृगारिणा॥करप्रहारेणशिरश्चामरस्यपृथक्कृतं
१५ उदग्रश्चरणेदेव्याशिलावृक्षादिभिर्हतः॥दंतमुष्टितलैश्चैवकरालश्चनिपातितः १६ देवीक्रुद्धाग
दापातैश्चूर्णयामासचोद्धतं॥वाष्कलंभिंदिपालेनवाणैस्ताम्रंतथांधकं १७ उग्रास्यमुग्रवीर्यंचत
थैवचमहाहनुं॥त्रिनेत्राचत्रिशूलेनजघानपरमेश्वरी १८ विडालस्यासिनाकायात्पातयामासवै
शिरः॥दुर्द्धरंदुर्मुखंचोभौशरैर्निन्येयमक्षयं १९ एवंसंक्षीयमाणेतुस्वसैन्येमहिषासुरः॥माहिषे
णस्वरूपेणत्रासयामासतान्गणान् २० कांश्चित्तुंडप्रहारेणखुरक्षेपैस्तथापरान्॥लांगूलताडितांश्चा
न्यान्शृंगाभ्यांचविदारितान् २१ वेगेनकांश्चिदपरान्नादेनभ्रमणेनच॥निश्वासपवनेनान्यान्पातया
मासभूतले २२ निपात्यप्रमथानीकमभ्यधावतसोऽसुरः॥सिंहंहंतुंमहादेव्याःकोपंचक्रेततोंबि
का २३ सोपिकोपान्महावीर्यःखुरक्षुण्णमहीतलः॥शृंगाभ्यांपर्वतानुच्चांश्चिक्षेपचननादच २४ वेग
भ्रमणविक्षुण्णामहीतस्यव्यशीर्यत॥लांगूलेनाहतश्चाब्धिःप्लावयामाससर्वतः २५ धूतशृंगविभि

मार्कं॰ १८६ 186
न्नाभ्रखंडखंडंययुर्वेगा॥ स्वाशानिलास्ताशतशोनिपेतुर्नभसोचला २६ इतिकोपसमाध्मातमापतंतंमहा
सुरं॥ दृष्ट्वासाचंडिकाकोपंतद्वधायतदाकरोत् २७ साक्षिप्त्वातस्यवैपाशंतंबबंधमहासुरं॥ तत्याजमा
हिषंरूपंसोपिबद्धोमहामृधे २८ ततःसिंहोऽभवत्सद्योयावत्तस्यांबिकाशिर॥ छिनत्तितावत्पुरु
षःखड्गपाणिरदृश्यत २९ ततएवाशुपुरुषंदेवीचिच्छेदशायकैः॥ तंखड्गचर्मणासार्द्धंततःसोभून्म
हागज ३० करेणचमहासिंहंतंचकर्षजगर्ज्जच॥ कर्षतस्तुकरंदेवीखड्गेननिरकृंतत ३१ ततोम
हासुरोभूयोमाहिषंवपुरास्थित॥ तथैवक्षोभयामासत्रैलोक्यंसचराचरं ३२ ततःक्रुद्धाजगन्माता
चंडिकापाणमुत्तमं॥ पपौपुनःपुनश्चैवजहासारुणलोचना ३३ ननर्द्दचासुरःसोऽपिबलवीर्य्यमदोद्धु पु॰
तं॥ विषाणाभ्यांचचिक्षेपचंडिकांप्रतिभूधरान् ३४ साचतान्प्रहितांस्तेनचूर्णयंतीशरोत्करैः॥ उवा १८६
३५ चतंमदोद्धृतमसुखरागाकुलाक्षरं ३५ देव्युवाच॥ गर्ज्जगर्ज्जक्षणंमूढमधुयावत्पिबाम्यहं॥ मयात्वयिहते
नेत्रैवगर्ज्जिष्यंत्याशुदेवता ३६ एवमुक्त्वासमुत्पत्यसारूढातंमहासुरं॥ पादेनाक्रम्यकंठेचशूलेनै

नमत्ताडयत् ३७ ततःसोपिपदाक्रांतस्तयानिजमुखात्ततः॥ अर्द्धनिष्क्रांतएवासिदेव्यावीर्येनसंवृतः
अर्द्धनिष्क्रांतएवासौयुध्यमानोमहासुरः ३८ तयामहासिनादेव्याशिरश्छित्वानिपातितः॥ ततो
हाहाकृतंसर्वंदैत्यसैन्यंननाशतत् ३९ प्रहर्षंचपरंजग्मुःसकलादेवतागणाः॥ तुष्टुवुस्तांसुरादे
वींसहदिव्यैर्महर्षिभिः ४० जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः॥ इतिमार्कंडेयपुराणेसावर्णिके
मन्वंतरेदेवीमाहात्म्येमहिषासुरवधः ॥३॥ ऋषिरुवाच॥ शक्रादयःसुरगणानिहतेतिवीर्ये
दुर्गा
तस्मिन्दुरात्मनिसुरारिबलेचदेव्या॥ तांतुष्टुवुःप्रणतिनम्रशिरोधरांसावाग्भिःप्रहर्षपुलकोद्गम
चारुदेहाः १ देव्याययाततमिदंजगदात्मशक्त्यानिःशेषदेवगणशक्तिसमूहमूर्त्यातामंबिकामखिल
देवमहर्षिपूज्यांभक्त्यानताःस्मविदधातुशुभानिसानः २ यस्याःप्रभावमखिलंभगवाननंतोब्रह्माहर
श्चनहिवक्तुमलंबलंच॥ साचंडिकाखिलजगत्परिपालनाय॥ नाशायचाशुभभयस्यमतिंकरोतु ३ य
याश्रीःस्वयंसुकृतिनांभवनेष्वलक्ष्मीः॥ पापात्मनांकृतधियांहृदयेषुबुद्धिः॥ श्रद्धासतांकुलजनप्र

भवस्यलज्जातांत्वांनताःस्मपरिपालयदेविविश्वं किंवर्न्नयामतवरूपमचिंत्यमेतत्किंचातिवीर्यमसु
रक्षयकारिभूरि किंचाहवेषुचरितानितवातियानिसर्वेषुदेव्यसुरदेवगणाधिपेषु हेतुःसमस्त
जगतांत्रिगुणापिदोषैर्नज्ञायसेहरिहरादिभिरप्यपारा सर्वाश्रयाखिलमिदंजगदंशभूतमव्या
मार्कं० कृताहिपरमाप्रकृतिस्त्वमाद्या यस्याःसमस्तसुरतासमुदीरणेनतृप्तिंप्रयातिसकलेषुमखेषु
१८७ देवि स्वाहासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैःस्वधाच यामुक्तिहेतुरवि
187 चिंत्यमहाव्रताच अभ्यस्यसेसुनियतेंद्रियतत्वसारैः मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्या
सिसाभगवतीपरमाहिदेवि शब्दात्मिकासुविमलर्ग्यजुषांनिधानमुद्गीथरम्यपदपाठवतांचसाम्नां
देवीत्रयीभगवतीभवभावनायवार्त्ताचसर्वजगतांपरमार्त्तिहंत्री मेधासिदेविविदिताखिलशा पु०
स्त्रसारादुर्गासिदुर्गभवसागरनौरसंगा श्रीःकैटभारिहृदयैककृताधिवासागौरित्वमेवशशि १८७
मौलिकृतःप्रतिष्ठा ईषत्सहासममलंपरिपूर्णचंद्रबिंबानुकारिकनकोत्तमकांतिकांतं अत्य

द्भुतंप्रहृतमात्तरुषा तथापिवक्त्रंविलोक्यसहसामहिषासुरेण: दृष्ट्वातुदेविकुपितंभ्रकुटीकराल
मुद्यच्छशांकसदृशच्छवियन्नसद्यः प्राणान्मुमोचमहिषस्तदतीवचित्रंकैर्जीव्यतेहिकुपितांत
कदर्शनेन देविप्रसीदपरमाभवतीभवायसद्योविनाशयसिकोपवतीकुलानि विज्ञातमेतदधुनै
वयदस्तमेतन्नीतंबलंसुविपुलंमहिषासुरस्य तेसंमताजनपदेषुधनानितेषांतेषांयशांसिनचसी
दतिधर्मवर्गः धन्यास्तएवनिभृतात्मजपुत्रदारायेषांसदाभ्युदयदाभवतीप्रसन्ना धर्म्याणि
देविसकलानिसदैवकर्म्माण्यत्यादृतःप्रतिदिनंसुकृतीकरोति स्वर्गंप्रयातिचततोभवतीप्रसादा
ल्लोकत्रयेपिफलदाननुदेविनेन दुर्गेस्मृताहरसिभीतिमशेषजंतोःस्वस्थैःस्मृतामतिमतीवशुभांद
दासि दारिद्र्यदुःखभयहारिणिकात्वदन्यासर्वोपकारकरणायसदार्द्रचित्ता एभिर्हतैर्जगदुपैति
सुखंतथैतेकुर्वंतुनामनरकायचिरायपापं संग्राममृत्युमधिगम्यदिवंप्रयांतुमत्वेतिनूनमहि म
तान्विनिहंसिदेवि दृष्ट्वैवकिंनुभवतीप्रकरोतिभस्मसर्वासुरानरिषुयत्प्रहिणोषिशस्त्रं

लोकान्प्रयांतु रिपवोपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वपि तेति साध्वी खड्गप्रभानिकरविस्फुरणै
स्तथोग्रैः शूलाग्रकांतिनिवहेन दृशोसुराणां यन्नागता विलयमंशुमदिंदुखंडयोग्याननं तव विलो
कयतां तदेतत् दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिंत्यमतुल्यमन्यैः वीर्यं च हंतृ हृत
मार्कं० १८८ 188 देवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थं केनोपमा भवतु तेस्य पराक्रमस्य रूपं च शत्रु
भयकार्यतिहारि कुत्र चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेपि त्रैलो
क्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्द्धनि तेपि हत्वा नीता दिवं रिपुगणा भयमप्यपा
स्तमस्माकमुन्मदसुरारिभवं नमस्ते शूलेन पाहि नो देवि पाहि खड्गेन चांबिके घंटास्वनेन नः पा पु० १८८
हि चापज्यानिस्वनेन च प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे भ्रामणेनात्मशूलस्य उत्तरस्यां
श्व तथे[श्व]रि सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भु
वं खड्गशूलगदादीनि यानि चास्त्राणि तेंबिके करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ऋषिरुवाच

एवंस्तुतासुरैर्दिव्यैःकुसुमैर्नंदनोद्भवैः अर्चिताजगतांधात्रीतथागंधानुलेपनैः भक्त्यासमस्तैस्त्रि
दशैर्दिव्यैर्धूपैश्चधूपिता प्राहप्रसादसुमुखीसमस्तान्प्रणतान्सुरान् व्रियतांत्रिदशाःसर्वंयदस्म
त्तोभिवांछितं देवाऊचुः भगवत्याकृतंसर्वंनकिंचिदवशिष्यते यदयंनिहतःशत्रुरस्माकं
महिषासुरः यदिचापिवरोदेयस्त्वयास्माकंमहेश्वरि संस्मृतासंस्मृतात्वंनोहिंसेथापरमाप
दः यश्चमर्त्यस्तवैरेभिस्त्वांस्तोष्यत्यमलानने तस्यवित्तर्द्धिविभवैर्धनदारादिसंपदांवृद्धये
स्मत्प्रसन्नात्वंभवेथाःसर्वदांबिके ऋषिरुवाच इतिप्रसादितादेवैर्जगतोर्थेतथात्मनः तथे
त्युक्त्वाभद्रकालीबभूवांतर्हितानृप इत्येतत्कथितंभूपसंभूतासायथापुरा देवीदेवशरीरेभ्योजगत्त्रय
हितैषिणी पुनश्चगौरीदेहात्सासमुद्भूतायथाभवत् वधायदुष्टदैत्यानांतथाशुंभनिशुंभयोः रक्षणा
यचलोकानांदेवानामुपकारिणी तच्छृणुष्वमयाख्यातंयथावत्कथयामिते इतिमार्कंडेयपुराणे
सावर्णिकेमन्वंतरेदेवीमाहात्म्येमहिषासुरवधःसमाप्तः ॥०॥ ऋषिरुवाच पुराशुंभनिशुंभाभ्यां

मसुराभ्यांशचीपतेः त्रैलोक्यंयज्ञभागाश्चहृतामदवलाश्रयात् ताावेवसूर्य्यतांतद्वदधिकारंतथैं

दवं कौवेरमथयाम्यंच चक्रातेवरुणस्यच ताावेवपवनर्द्धिंच चक्रतुर्वह्निकर्म्मच ततोदेवा

विनिर्द्धूताभ्रष्टराज्याःपराजिताः हृताधिकारास्त्रिदशास्ताभ्यांसर्वेनिराकृताः महासुराभ्यांतां

देवींसंस्मरंत्यपराजितां तयास्माकंवरोदत्तोयथापत्सुस्मृताखिलाः भवतांनाशयिष्यामितत्क्ष

णात्परमापदः इतिकृत्वामतिंदेवाहिमवंतंनगेश्वरं जग्मुस्तत्रततोदेवींविष्णुमायांप्रतुष्टुवुः

देवाऊचुः नमोदेव्यैमहादेव्यैशिवायैसततंनमः नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मतां रौद्रा

यैनमोनित्यायैगौर्य्यैधात्र्यैनमोनमः ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंनमः कल्याण्यैप्रणता

वृद्ध्यैसिद्ध्यैकुर्म्मोनमोनमः नैरृत्यैभूभृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः दुर्गायैदुर्गपारायैसारा

यैसर्वकारिण्यै ख्यात्यैतथैवकृष्णायैधूम्रायैसततंनमः अतिसौम्यातिरौद्रायैनतास्तस्यैनमो

नमः नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः यादेवीसर्वभूतेषुविष्णुमायेतिशब्दिता नमस्त

मा॰कें॰
१८९
189

पु॰
१८९

स्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुचेतनेत्यभिधीयते नमस्तस्यैनमस्तस्यैनमस्त
स्यैनमोनमः यादेवीसर्वभूतेषुशक्तिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादे
वीसर्वभूतेषुबुद्धिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुनिद्रा
रूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुक्षुधारूपेणसंस्थिता
नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुछायारूपेणसंस्थिता नमस्तस्यैनमस्तस्यै
नमस्तस्यैनमोनमः यादेवीसर्वभूतेषुतृष्णारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः
यादेवीसर्वभूतेषुक्षांतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुजा
तिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुलज्जारूपेणसंस्थिता
नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुशांतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यै
नमस्तस्यैनमोनमः यादेवीसर्वभूतेषुश्रद्धारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः

मां॰
१४०
१७०

यादेवीसर्वभूतेषुकांतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुल
क्ष्मीरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुवृत्तिरूपेणसंस्थिता:
नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसभूतेषुस्मृतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनम
स्तस्यैनमोनमः यादेवीसर्वभूतेषुदयारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवी
सर्वभूतेषुपुष्टिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुमातृरू
पेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः यादेवीसर्वभूतेषुभ्रांतिरूपेणसंस्थिता नम
स्तस्यैनमस्तस्यैनमोनमः इंद्रियाणामधिष्ठात्रीभूतानांचाखिलेषुया भूतेषुसततंतस्यैव्याप्तिदेव्यैनमो
नमः चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थिताजगत् नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः स्तुतासुरैः
पूर्वमभीष्टसंश्रयात्तथासुरेंद्रेणदिनेषुसेविता करोतुसानःशुभहेतुरीश्वरीशुभानिभद्राण्यभिहंतु
चापदः यासांप्रतंचोद्धतदैत्यतापितैरस्माभिरीशाचसुरैर्नमस्यते याचस्मृतातत्क्षणमेवहंति

पु॰
१४०

३६

तिनः सर्वापरोभक्तिविनम्रमूर्त्तिभिः ऋषिरुवाच एवंस्तवादियुक्तानां देवानां तत्र पार्वती स्नातु
मभ्याययौ तोयेजाह्नव्यान्नृपनंदन साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेत्रका शरीरकोशतश्चा
स्याः समुद्भूताब्रवीच्छिवा स्तोत्रंममैतत्क्रियते शुंभदैत्यनिराकृतैः देवैः समेतैः समरे निशुंभेन
पराजितैः शरीरकोशाद्यत्तस्याः पार्वत्या निःसृतांबिका कौशिकीति समस्तेषु ततो लोकेषु
गीयते तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती कालिकेति समाख्याता हिमाचलकृता
श्रया ततोंबिकां परं रूपं बिभ्राणां सुमनोहरं ददर्श चंडोमुंडश्च भृत्यो शुंभनिशुंभयोः ताभ्यां शुंभा
य चाख्याता अतीव सुमनोहरा काप्यास्ते स्त्री महाराज भासयंती हिमाचलं नैव तादृक्क्वचिद्रूपं
दृष्टं केनचिदुत्तमं ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर स्त्रीरत्नमतिचार्वंगी द्योतयंती दि
शस्त्विषा सानुतिष्ठति दैत्येंद्र तां भवान्द्रष्टुमर्हति यानि रत्नानि सुयोगजाश्वादीनि वै प्रभो त्रैलो
क्ये तु समस्तानि सांप्रतं भांति ते गृहे ऐरावतः समानीतो गजरत्नं पुरंदरात् पारिजाततरुश्चा

यंतथैवोच्चैःश्रवाहयः विमानंहंससंयुक्तमेतत्तिष्ठतितेंगणे रत्नभूतमिहानीतंयदासीद्वेधसोद्भुतं निधि
रेषमहापद्मःसमानीतोधनेश्वरात् किंजल्किनींददौचाब्धिर्मालामम्लानपंकजां छत्रंतेवारुणं
गेहेकांचनस्रावितिष्ठति तथायंस्यंदनवरोयःपुरासीत्प्रजापतेः मृत्योरुत्क्रांतिदानामशक्तिरी
मार्कं० १८१ शत्वयाहृता पाशःसलिलराजस्यभ्रातुस्तवपरिग्रहे निशुंभस्याब्धिजाताश्चसमस्तारत्नजातयः
वह्निरपिददौतुभ्यमग्निशौचेचवाससी एवंदैत्येंद्ररत्नानिसमस्तान्याहृतानिते स्त्रीरत्नमेषा
१९१ कल्याणीत्वयाकस्मान्नगृह्यते ऋषिरुवाच निशम्येतिवचःशुंभःसतदाचंडमुंडयोः प्रेषयामा
ससुग्रीवंदूतंदेव्यामहासुरः इतिचेतिचवक्तव्यासागत्वावचनान्मम यथाचाभ्येतिसंप्रीत्यातथाका पु० १८१
र्यंत्वयालघु सतत्रगत्वायत्रास्तेशैलोद्देशेतिशोभने सादेवींतांततःप्राहश्लक्ष्णंमधुरयागिरा दूत
उवाच देविदैत्येश्वरःशुंभस्त्रैलोक्येपरमेश्वरः दूतोहंप्रेषितस्तेनत्वत्सकाशमिहागतः अव्याह
ताज्ञःसर्वासुसर्वदादेवयोनिषु निर्जिताखिलदैत्यारिःसयदाहशृणुष्वतत् ममत्रैलोक्यम

खिलं मम देवा वसानुगाः यज्ञभागानहं सर्वानुपाश्नामि पृथक्पृथक् त्रैलोक्ये वररत्नानि मम वश्या
न्यशेषतः तथैव गजरत्नानि हृत्वा देवेंद्रवाहनं क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः उच्चैःश्रवस
संज्ञं तत्प्रणिपत्य समर्पितं यानि चान्यानि देवेषु गंधर्वेषूरगेषु च रत्नभूतानि भूतानि तानि मय्येव शो
भने स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयं सा त्वमस्मानुपागच्छ यतो रत्नभुजो भयं मां वा मम
नुजं वापि निशुंभमुरुविक्रमं भज त्वं चंचलापांगि रत्नभूतासि वै यतः परमैश्वर्यमतुलं प्राप्स्यसे
मत्परिग्रहात् एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ऋषिरुवाच इत्युक्ता सा तदा देवी गंभीरांतः
स्मिता जगौ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् देव्युवाच सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदि
तं त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथं श्रूयता
मल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा यो मां जयति संग्रामे यो मे दर्पं व्यपोहति यो मे प्रतिबलो लोके स
मे भर्ता भविष्यति तदागच्छतु शुंभोत्र निशुंभो वा महासुरः मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे ३१

मार्कं० १५२ लब्धु दूत उवाच अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुंभनिशुंभ
योः अन्येषामपि दैत्यानां सर्वे देवा न वै युधि तिष्ठंति संमुखे देवि किं पुनः स्त्री त्वमेकिका इंद्राद्याः
सकला देवास्तस्थुर्येषां न संयुगे शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखं सा त्वं गच्छ मयैवोक्ता
पार्श्वे शुंभनिशुंभयोः केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि देव्युवाच एवमेतद्बली शुंभो नि
शुंभश्चातिवीर्यवान् किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा सा त्वं गच्छ मयोक्तं ते यदेतत्सर्व
मादृतः तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु यत् इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमा
हात्म्ये देव्या दूतसंवाद ॥०॥ ऋषिरुवाच इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः समाचष्ट समागम्य पु० १५२
दैत्यराजाय विस्तरात् तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः सक्रोधः प्राह दैत्यानामधिपं धूम्रलो
चन हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः तामानय बलाद्दुष्टां केशाकर्षणविह्वलां तत्परित्रा
णदः कश्चिद्यदि वोत्तिष्ठते परः स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थितां जगादोच्चैः प्रयाहीति मू

त्तंशुंभनिशुंभयोः नचेत्प्रीत्याद्यभवतीमद्भर्तारमुपैष्यति ततोवलान्नयाम्येषकेशाकर्षणविह्वलां
देव्युवाच दैत्येश्वरेणप्रहितोवलवान्वलसंवृतः वलान्नयसिमामेवंततःकिंतेकरोम्यहं ऋषिरु
वाच इत्युक्तःसोभ्यधावत्तामसुरोधूम्रलोचनः हुंकारेणैवतंभस्मसचकारांविकाततः अथक्रु
द्धंमहासैन्यमसुराणांतथांविकां ववर्षसायकैस्तीक्ष्णैस्तथाशक्तिपरश्वधैः ततोधुतसटःकोपात्
कृत्वानादंसुभैरवं पपातासुरसेनायांसिंहोदेव्याःस्ववाहनः कांश्चित्करप्रहारेणदैत्यानास्येनचा
परान् आक्रांत्याचाधरेणान्यान्जघानसुमहासुरान् केषांचित्पाटयामासनखैःकोष्ठानिकेशरी
तथातलप्रहारेणशिरांशिकृतवान्पृथक् विछिन्नवाहुशिरसःकृतास्तेनतथापरे पपौचरुधिरंको
ष्ठादन्येषांधुतकेशरः क्षणेनतद्बलंसर्वंक्षयंनीतंमहात्मना तेनकेशरिणादेव्यावाहनेनातिकोपि
ना श्रुत्वातमसुरंदेव्यानिहतंधूम्रलोचनं वलंचक्षयितंकृत्स्नंदेवीकेशरिणाततः चुकोपदैत्याधिप
तिःशुंभप्रस्फुरिताधरः आज्ञापयामासचतौचंडमुंडौमहासुरौ हेचंडहेमुंडवलैर्वहुलैःपरिवा

वारिणौ तत्र गछत गत्वा च सा समानीयतां लघु केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि तदाशेषा
युधैः सर्वैरसुरैर्विनिहन्यतां तस्यां हतायां दुष्टायां सिंहे च विनिपातिते शीघ्रमागम्यतां बद्ध्वा गृही
त्वा तामथांबिकां इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये शुंभनिशुंभसेनानीधू
मार्कं० म्रलोचनवधः ॥६॥ ऋषिरुवाच आज्ञप्तास्ते ततो दैत्याश्चंडमुंडपुरोगमाः चतुरंगबलोपेता
१८३ ययुरभ्युद्यतायुधाः ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थितां सिंहस्योपरि शैलेंद्रशृंगे महति कां
193 चने ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ततः को
पं चकारोच्चैरंबिका तानरीन्प्रति कोपेन चास्या वदनं मसीवर्णमभूत्तदा भ्रुकुटीकुटिलात्तस्या ल पु०
लाटफलकाद्द्रुतं काली करालवदना विनिष्क्रांतासिपाशिनी विचित्रखट्वांगधरा नरमालावि १८३
भूषणा द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा अतिविस्तारवदना जिह्वाललनभीषणा निम
ग्नारक्तनयना नादापूरितदिङ्मुखा सा वेगेनाभिपतिता घातयंती महासुरान् सैन्ये तत्र सुरारी

गा[illegible]तत्तद्बलं पार्ष्णिग्राहांकुशग्राहियोधघंटासमन्वितान् समादायैकहस्तेन मुखे चिक्षेप वारणा
न् तथैव योधं तुरगै रथं सारथिना सह निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यतिभैरवं एकं जग्राह केशेषु ग्री
वायामथ चापरं पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथा
सुरैः मुखेन जग्राह रुषा दशनैर्मथितान्यपि बलिनां तद्बलं सर्वमसुराणां महात्मनां ममर्द्दाभक्ष
यच्चान्यानन्यांश्चाताडयत्तथा असिना निहताः केचित्केचित्खट्वांगताडिताः जग्मुर्विनाशमसु
रा दंताग्राभिहतास्तथा क्षणेन तद्बलं सर्वमसुराणां निपातितं दृष्ट्वा चंडोभिदुद्राव तां कालीमति
भीषणां शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः तानि चक्रा
ण्यनेकानि विशमानानि तन्मुखं बभुर्यथार्कबिंबानि सुबहूनि घनोदरं ततो जहासातिरुषा भीमं भै
रवनादिनी काली करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला उत्थाय च महासिं हं देवी चंडमधावत गृही
त्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् अथ मुंडोभ्यधावत्तां दृष्ट्वा चंडं निपातितं तमप्यपातयद्भूमौ

मावेगाभिहतं रुषा हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितं मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं शिर
श्चंडस्य काली च गृहीत्वा मुंडमेव च प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकां मया तवात्रोपहृतौ चंड
मुंडौ महापशू युद्धयज्ञे स्वयं शुंभं निशुंभं च हनिष्यसि ऋषिरुवाच तावानीतौ ततो दृष्ट्वा चंडमुंडौ महा
मार्कं० सुरौ उवाच कालीं कल्याणी ललितं चंडिका वचः यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता चामुंडे
१८५ ति ततो लोके ख्याता देवि भविष्यति इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये चंडमुंड
वधः ॥७॥ ऋषिरुवाच चंडे च निहते दैत्ये मुंडे च विनिपातिते बहुलेषु च सैन्येषु क्षयितेषु सुरेश्वरः
ततः कोपपराधीनचेताः शुंभः प्रतापवान् उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह अद्य सर्वबलैर्दै पु
त्याः षडशीतिरुदायुधाः कंबूनां चतुरशीतिर्निर्यांतु स्वबलैर्वृताः कोटिवीर्याणि पंचाशदसुराणां कुला १८५
नि वै शतं कुलानि धौम्राणां निर्गच्छंतु ममाज्ञया कालका दौर्हृता मौर्याः कालकेयास्तथासुराः युद्धा
य सज्जा निर्यांतु आज्ञया त्वरिता मम इत्याज्ञाप्यासुरपतिः शुंभो भैरवशासनः निर्जगाम महासैन्यसह

सैर्बहुभिर्वृतः आयातं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणं ज्यास्वनैः पूरयामास धरणीगगनांतरं
ततः सिंहो महानादमतीव कृतवान्नृप घंटास्वनेन तन्नादमंबिका चोपबृंहयत् धनुर्ज्यासिंहघं
टानां शब्दापूरितदिंमुखाः निनादैर्भीषणैः काली जिग्ये विस्तारितानना तन्निनादमुपश्रुत्य दैत्यसै
न्यैश्चतुर्दिशं देवीसिंहस्तथा काली शरोषैः परिवारिताः एतस्मिन्नंतरे भूप विनाशाय सुरद्विषां
भवायामरसिंहानामतिवीर्यबलान्विताः ब्रह्मेशगुहविष्णुनां तथेंद्रस्य च शक्तयः शरीरेभ्यो विनि
ष्क्रम्य तद्रूपैश्चंडिकां ययुः यस्य देवस्य यद्रूपं यथाभूषणवाहनं तद्वदेव हि तच्छक्तिरसुरान्योद्धु
माययौ हंसयुक्तविमानाग्रे साक्षसूत्रकमंडलुः आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते माहे
श्वरी वृषारूढा त्रिशूलवरधारिणी महाहिवलया प्राप्ता चंद्ररेखाविभूषणा कौमारी शक्तिहस्ता च
मयूरवरवाहना योद्धुमभ्याययौ दैत्यानंबिका गुहरूपिणी तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थि
ता शंखचक्रगदाशार्ंगखड्गहस्ताभ्युपाययौ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः शक्तिः साप्याय

ययौतत्रवाराहीविभ्रतीतनुं नारसिंहीनृसिंहस्यविभ्रतीसदृशंवपुः प्राप्तातत्रषटाक्षेपक्षिप्तनक्षत्र
संहति वज्रहस्तातथैवैंद्रीगजराजोपरिस्थिता प्राप्तासहस्रनयनायथाशक्रस्तथैवसा ततःपरि
वृतस्ताभिरीशानोदेवशक्तिभिः हन्यंतामसुराःशीघ्रंममप्रीत्याहचंडिकां ततोदेवीशरीरात्तुविनि
मां॰कं॰ ष्क्रांतातिभीषणा चंडिकाशक्तिरत्युग्राशिवाशतनिनादिनी साचाहधूम्रजटिलमीशानमपरा
१ जिता दूतत्वंगच्छभगवन्पार्श्वंशुंभनिशुंभयोः ब्रूहिशुंभंनिशुंभंचदानावतिगर्वितौ येचा
१८५ न्येदानवास्तत्रयुद्धायसमुपस्थिताः त्रैलोक्यमिंद्रोलभतांदेवाःसंतुहविर्भुजः यूयंप्रातपा
तालंयदिजीवितुमिच्छथ बलावलेपादथचेद्भवंतोयुद्धकांखिणः तदागच्छततृप्यंतुमच्छिवा पु॰
पिशितेनवः यतोनियुक्तोदौत्येनतयादेव्याशिवःस्वयं शिवदूतीतिलोकेस्मिनततःसाख्यातिमा १८५
गता तेपिश्रुत्वाततोदेव्याःशर्वाख्यातंमहासुराः अमर्षापूरिताजग्मुर्यतःकात्यायनीस्थिता
ततःप्रथममेवाग्रेशरस्वारशक्त्यृष्टिविष्टिभिः ववर्षुरुद्धतामर्षातांदेवीममरारयः साचतान्यु

हितान्वालान्शूलचक्रपरश्वधान् चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः तस्याग्रतस्त
थाकाली शूलपातविदारितान् खट्वांगपोथितांश्चारीन्कुर्वती व्यचरत्तदा कमंडलुजला
क्षेपहृतवीर्यान्हृतौजसः ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति माहेश्वरी त्रिशूलेन
तथा चक्रेण वैष्णवी दैत्यान्जघान कौमारी तथा शक्त्यातिकोपना ऐंद्री कुलिशपातेन श
तशो दैत्यदानवाः पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षत
वक्षसः वराहमूर्त्या न्यपतंश्चक्रेण च विदारितां नखैर्विदारितांश्चान्यान्भक्षयंती महासुरान्
नारसिंही चचाराजौ नादापूर्णदिगंबरा चंडाट्टहासैरसुराः शिवदूत्यभिभूषिताः पेतुः पृथि
व्यां पतितांस्तांश्चखादाथ सा तदा इति मातृगणं क्रुद्धं मर्दयंतं महासुरं दृष्ट्वाभ्युपायैर्विवि
धैर्नेशुर्देवारिसैनिकाः पलायनपरान् दृष्ट्वा दैत्यान्मातृगणार्दितान् योद्धुमभ्याययौ क्रुद्धो
रक्तबीजो महासुरः रक्तबिंदुर्यदा भूमौ पतत्यस्य शरीरतः समुत्पतति मेदिन्यां तत्प्रमा

णास्तदासुरः युयुधे स गदापाणिरिंद्रशक्त्या महासुरः ततश्चैंद्री स्ववज्रेण रक्तबीजमताडयत्
कुलिशेनाहतस्याशु तस्य सुस्राव शोणितं समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः यावं
तः पतितास्तस्य शरीराद्रक्तविंदवः तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः ते चापि युयु
मार्कं० धुस्तत्र पुरुषा रक्तसंभवाः समं मातृभिरत्युग्रशस्त्रपातातिभीषणं पुनश्च वज्रपातेन क्षत
१९६ मस्य शिरो यदा ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः वैष्णवी समरे चैनं चक्रेणाभि
जघान ह गदया ताडयामास ऐंद्री तमसुरेश्वरं वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः
196 सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः शक्त्या जघान कौमारी वाराही च तथासिना माहेश्वरी पु०
त्रिशूलेन रक्तबीजं महासुरं स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् मातॄः कोपसमाविष्टो रक्त १९६
बीजो महासुरः तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि पपात यो वै रक्तौघस्तेनासञ्छतशो
सुराः तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत् व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमं

तान्विषण्णान् सुरान् दृष्ट्वा चंडिका प्राह सत्वरा उवाच कालीं चामुंडे विस्तारं वदनं कुरु मच्छस्त्रपात
संभूतान् रक्तविंदुं महासुरान् रक्तविंदोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना भक्षयंती चर रणे तदुत्पन्ना
न्महासुरान् एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यंति चा
परे इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तं मुखेन काली जगृहे रक्तवीजस्य शोणितं ततो सा
वाजघानाथ गदया तत्र चंडिकां न चास्या वेदनां चक्रे गदापातोल्पिमपि तस्याहतस्य देहा
त्तु बहु सुस्राव शोणितं यतस्ततस्तद्वक्त्रेण चामुंडा संप्रतीच्छति मुखे समुद्गता येस्या रक्तपा
तान्महासुराः तांश्चखादाथ चामुंडा पपौ तस्य च शोणितं देवी शूलेन वज्रेण बाणैरसिभिरृष्टिभिः
जघान रक्तवीजं तं चामुंडापीतशोणितं सपपात महीपृष्ठे शस्त्रसंघसमाहतः नीरक्तश्च महीपाल रक्त
वीजो महासुरः ततस्ते हर्षमतुलमवापुस्त्रिदशा नृपः तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः
इति मार्कंडेयपुराणे सावर्निके मन्वंतरे देवीमाहात्म्ये रक्तवीजवधः राजोवाच विचित्रमिद

माख्यातं भगवन्भवता मम देव्याश्चरितमाहात्म्यं रक्तवीजवधाश्रितं भूयश्चेच्छाम्यहं श्रोतुं रक्तवीजे निपा
तिते चकार शुंभो यत्कर्म निशुंभश्चातिकोपनः ऋषिरुवाच चकार कोपमतुलं रक्तवीजे निपा
तिते शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् अभ्यधाव
मांकं०
१८७
न्निशुंभोऽथ मुख्ययासुरसेनया तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः संदष्टौष्ठपुटाः क्रुद्धा हं
देवीमुपाययुः आजगाम महावीर्यः शुंभोपि स्वबलैर्वृतः निहंतुं चंडिकां कोपात्कृत्वा युद्धं तु मा
तृभिः ततो युद्धमतीवासीद्देव्याः शुंभनिशुंभयोः शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः चिच्छेदा पु०
स्तान्शरास्ताभ्यां चंडिका स्वशरोत्करैः ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ निशुंभो निशितं खड्गं १८७
चर्म चादाय सुप्रभं अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमं ताडिते वाहने देवी क्षुरप्रेणासिमु
त्तमं निशुंभस्याशु चिच्छेद चर्म चाप्यष्टचंद्रकं छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ता

मध्यस्यद्विधाचक्रेचक्रेणाभिमुखागतां कोपाध्मातोनिशुंभोथशूलंजग्राहदानवः आयांतंमुष्टि
पातेनदेवीतच्चाप्यचूर्णयत् आविध्याथगदांसोपिचिक्षेपचंडिकांप्रति सापिदेव्यात्रिशूलेनभि
न्नाभस्मत्वमागता ततःपरशुहस्तंतमायांतंदैत्यपुंगवं आहत्यदेवीबाणौघैरपातयतभूतले
तस्मिन्निपतितेभूमौनिशुंभेभीमविक्रमे भ्रातर्यतीवसंक्रुद्धःप्रययौहंतुमंबिकां सरथस्थस्तथा
त्युच्चैर्गृहीतपरमायुधैः भुजैरष्टाभिरतुलैर्व्याप्याशेषंबभौनभः तमायांतंसमालोक्यदेवीशंख
मवादयत् ज्याशब्दंचापिधनुषश्चकारातीवदुःसहम् पूरयामासककुभोनिजघंटास्वनेनच
समस्तदैत्यसैन्यानांतेजोवधविधायिना ततःसिंहोमहानादैस्त्याजितेभमहामदैः पूरयामासगगनं
गांतथोपदिशोदश ततःकालीसमुत्पत्यगगनंक्ष्मामताडयत् कराभ्यांतन्निनादेनप्राक्स्वनास्तेतिरो
हिताः अट्टट्टहासमशिवंशिवदूतीचकारह तैःशब्दैरसुरास्त्रेसुःशुंभःकोपंपरंययौ दुरात्मंस्तिष्ठति
ष्ठेतिव्याजहारांबिकायदा तदाजयेत्यभिहितंदेवैराकाशसंस्थितैः शुंभेनागत्ययाशक्तिर्मुक्ताज्वा

लातिभीषणा आयंतीवह्निकूटाभासानिरस्तामहोल्कया सिंहनादेनशुंभस्यव्याप्तंलोकत्रयां
तरं निर्घातनिस्वनोघोरोजितवानवनीपते शुंभमुक्तान्शरांदेवीशुंभस्तत्प्रहितान्शरान् चिच्छेद
स्वशरैरुग्रैः शतशोथसहस्रशः ततःसाचंडिकाक्रुद्धाशूलेनाभिजघानतं सतदाभिहतोभूमौमू
मार्कं० र्च्छितोनिपपातह ततोनिशुंभंसंप्राप्यचेतनामात्तकार्मुकः आजघानशरैर्देवीकालींकेशरि
१९८ णंतथा पुनश्चकृत्वाबाहूनामयुतंदनुजेश्वरः चक्रायुधेनदितिजश्छादयामासचंडिकां ततो
198 भगवतीक्रुद्धादुर्गादुर्गार्तिनाशनी चिच्छेदतानिचक्राणिस्वशरैःसायकांश्चतान् ततोनिशुं
भोवेगेनगदामादायचंडिकां अभ्यधावतवैहंतुंदैत्यसेनासमावृतः तस्यापततएवाशुगदांचि पु०
च्छेदचंडिका खड्गेनशितधारेणसचशूलंसमाददे शूलहस्तंसमायांतंनिशुंभममरार्द्दनं हृदिवि १९८
व्याधशूलेनवेगाविद्धेनचंडिका भिन्नस्यतस्यशूलेनहृदयान्निःसृतोपरः महाबलोमहावीर्यस्ति
ष्ठेतिपुरुषोवदन् तस्यनिष्क्रामतोदेवीप्रहस्यस्वनवत्ततः शिरश्चिच्छेदखड्गेनततोसावपतद्

भुवि ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथा काली शिवदूती तथापरान्
कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः माहेश्व
रीत्रिशूलेन भिन्नाः पेतुस्तथापरे वाराहीतुंडघातेन केचिच्चूर्णीकृता भुवि खंडखंडं च चक्रेण वै
ष्णव्या दानवाः कृताः वज्रेण चैंद्रीहस्ताग्रविमुक्तेन तथापरे केचिद्विनेशुरसुराः केचिन्नष्टा महाहवा
त् भक्षिताश्चापरे काली शिवदूती मृगाधिपैः इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये
निशुंभवधः ॥९॥ ऋषिरुवाच निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितं हन्यमानं बलं चैव शुंभः क्रुद्धो
ब्रवीद्वचः बलावलेपदुष्टे त्वं मा दुर्गे गर्वमावह अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी देव्यु
वाच एकैवाहं जगत्यत्र द्वितीया का ममापरा पश्यैता दुष्ट मय्येव विशंत्यो मद्विभूतयः ततः स
मस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका देव्युवाच अहं
विभूत्या बहुभिरिह रूपैर्यदास्थिता तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ततः प्रववृते यु

द्धं देव्याः शुंभस्य चोभयो पश्यतां सर्वदेवानामसुराणां च दारुणं शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव
दारुणैः तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरं दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथांबिका
बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरि बभंज ली
मार्कं० १९९ लयैवोग्रहुंकारोच्चारणादिभिः ततः शरशतैर्देवीमाच्छादयत सोऽसुरः सापि तत्कुपिता दे
वी धनुश्चिच्छेद चेषुभिः छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे चिच्छेद देवी चक्रेण तामम
199 प्यस्य करस्थितां ततः खड्गमुपादाय शतचंद्रं च भानुमत् अभ्यधावत्तदा देवीं दैत्यानामधि
पेश्वरः तस्यापतत एवाशु खड्गं चिच्छेद चंडिका धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलं हता
श्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः चिच्छेदापततस्तस्य पु०
मुद्गरं निशितैः शरैः तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् स मुष्टिं पातयामास हृदये दै १९९
त्यपुंगवः देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् तलप्रहाराभिहतो निपपात महीतले

सदैत्यराजःसहसापुनरेवतथोत्थितः उत्पत्यचप्रगृह्योच्चैर्देवींगगणमास्थितः तत्रापिसानिराधा
रायुयुधेतेनचंडिका नियुद्धंखेतदादैत्यश्चंडिकाचपरस्परं चक्रतुःप्रथमंसिद्धमुनिविस्मयकार
कं ततोनियुद्धंसुचिरंकृत्वातेनांबिकासह उत्पात्यभ्रामयामासचिक्षेपधरणीतले सक्षिप्तोध
रणींप्राप्यमुष्टिमुद्यम्यवेगितः अभ्यधावतदुष्टात्माचंडिकानिधनेच्छया तमायांतंततोदेवीसर्व
दैत्यजनेश्वरं जगत्यांपातयामासभित्वाशूलेनवक्षसि सगतासुःपपातोर्व्यांदेवीशूलाग्रविक्षतः
चालयन्सकलांपृथ्वींसाब्धिद्वीपांसपर्वतां ततःप्रसन्नमखिलंहतेतस्मिन्दुरात्मनि जगत्स्वा
स्थ्यमतीवापनिर्मलंचाभवन्नभः उत्पातमेघाःसोल्कायेप्रागासंस्तेसमंययुः सरितोमार्गवाहिन्य
स्तथासंस्तत्रपातिते ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः बभूवुर्निहतेतस्मिन्गंधर्वाललितं
जगुः अवादयंस्तथैवान्येननृतुश्चाप्सरोगणाः ववुःपुण्यास्तथावाताःसुप्रभोभूद्दिवाकरः जज्व
लुश्चाग्नयःशांताःशांतदिग्जनितस्वनाः इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्ये

शुंभवधः ॥१०॥ ऋषिरुवाच देव्याहतेतत्रमहासुरेंद्रेसेंद्राःसुरावह्निपुरोगमास्तां कात्यायनींतु
ना ष्टुवुरिष्टलंभाद्विकाशिवक्त्राब्जविकाशिताशाः देविप्रपन्नार्त्तिहरेप्रसीदप्रसीदमातर्जगतोखि
लस्य प्रसीदविश्वेश्वरिपाहिविश्वंत्वमीश्वरीदेविचराचरस्य आधारभूताजगतस्त्वमेकामही
मार्कं० स्वरूपेणयतःस्थितासि अपांस्वरूपस्थितयात्वयैतदाप्यायतेकृत्स्नमलंघ्यवीर्ये त्वंवैष्णवीश
२०० क्तिरनंतवीर्याविश्वस्यबीजंपरमासिमाया संमोहितंदेविसमस्तमेतत्त्वंवैप्रसन्नाभुविमुक्ति
200 हेतु विद्याःसमस्तास्तवदेविभेदाःस्त्रियःसमस्ताःसकलाजगत्सु त्वयैकयापूरितमंबयैतत्का
तेस्तुतिःस्तव्यपरापरोक्तिः सर्वभूतायदादेवीस्वर्गमुक्तिप्रदायिनी त्वंस्तुतास्तुतयेकावाभवंतु पु०
परमोक्तयः सर्वस्यबुद्धिरूपेणजनस्यहृदिसंस्थिते स्वर्गापवर्गदेदेविनारायणिनमोस्तुते
कलाकाष्ठादिरूपेणपरिणामप्रदायिनि विश्वस्योपरतौशक्तेनारायणिनमोस्तुते सर्वमंग २००
मांगल्ये इति नागेशः लमांगल्येशिवेसर्वार्थसाधिके शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते सृष्टिस्थितिविना

तानांशक्तिभूतेसनातनि गुणाश्रयेगुणमयेनारायणिनमोस्तुते शरणागतदीनार्त्तपरि
त्राणपरायणे सर्वस्यार्त्तिहरेदेविनारायणिनमोस्तुते हंसयुक्तेविमानस्थेब्रह्माणीरूपधा
केशांभःक्षरिकेदेविनारायणिनमोस्तुते त्रिशूलचंद्राहिधरेमहावृषभवाहिनि माहे
श्वरीस्वरूपेणनारायणिनमोस्तुते मयुरकुक्कुटवृतेमहाशक्तिधरेनघे कौमारीरूपसंस्था
नेनारायणिनमोस्तुते शंखचक्रगदाशार्ङ्गगृहीतपरमायुधेप्रसीदवैष्णवीरूपेनारायणि
नमोस्तुते गृहीतोग्रमहाचक्रेदंष्ट्रोधृतवसुंधरे वराहरूपिणिशिवेनारायणिनमोस्तुते नृसिंह
रूपेणोग्रेणहंतुंदैत्यानकृतोद्यमेत्रैलोक्यत्राणसहितेनारायणिनमोस्तुते किरीटिनिम
हावज्रेसहस्रनयनोज्वले वृत्रप्राणहरेचैंद्रीनारायणिनमोस्तुते शिवदूतीस्वरूपेणहतदै
त्यमहाबले घोररूपेमहारावेनारायणिनमोस्तुते दंष्ट्राकरालवदनेशिरोमालावि
भूषणे चामुंडेमुंडमथनेनारायणिनमोस्तुते लक्ष्मिलज्जेमहाविद्येश्रद्धेपुष्टिस्वधेध्रुवे महा

णामि महाविद्ये नारायणि नमोस्तु ते मेधे सरस्वति वरे भूति बाभ्रवि तामसि नियते त्वं प्रसीदेशे
नारायणि नमोस्तु ते सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते भयेभ्यस्त्राहि नो देवि नारायणि
नमोस्तु ते एतत्ते वदनं सौम्यं लोचनत्रयभूषितं पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तु ते ज्वाला
मार्कं० करालमत्युग्रमशेषासुरसूदनं त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते हिनस्ति दैत्यतेजां
श्री सि स्वनेनापूर्य या जगत् सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव असुरासृग्वसापंक
२०१ चर्चितस्ते करोज्वलः शुभाय खड्गो भवतु चंडिके त्वां नता वयं रोगानशेषानपहंसि तुष्टा रुष्टा
